इदानीमुत्तरोत्तरसप्तधातुगतकुष्ठस्य लक्षणं क्रमेणाह-त्वक्स्थे वैवर्ण्यमित्यादि। त्वक्-शब्देनात्र रसोऽभिधीयते, धातुप्रस्तावात्; त्वक्शब्देन रसस्याभिधानं तात्स्थ्यात्; जेज्जटस्तु त्वचमेवाह। वाह्यायास्त्वचश्चरके उदकधरत्वेनोक्ते रसग्रहणस्यानर्हत्वाद् द्वितीयाऽसृग्धराऽत्रोक्ता, उदकाच्च रसो भिन्नः, तथा ह्युक्तम्-'उदकं दशाञ्जलिमितं, रसो नवाञ्जलिमितः' (च. त्रि. स्था. ७) इति। रसं विहाय रक्तयुक्तिश्च प्रागेव रसं क्रोडीकृत्य तिर्यक्सिरागतैर्दोषैः कुष्ठजननात्, सिरासु रक्तस्यावस्थितेश्चेति तत्याशयः। साक्षाद्रस इत्यनभिधानाद् बृहत्कुष्ठं रसगतं न भवतीति नाशङ्कनीयम्। अतः सुश्रुतेनैवोक्तं-'तेषां तु महत्त्वं सर्वधात्वनुसारित्वात्' (सु नि. स्था. ५) इति, सर्वशब्देन च रसस्यापि ग्रहणम्। भोजेऽप्युक्तं-'प्रदुष्टाः प्रच्युता दोषा रसासृङ्मांससंश्रिताः। कुष्ठानि जनयन्त्याशु शरीरेषु शरीरिणाम्' इति। 'त्वक्स्वावो रोमहर्षश्च स्वेदस्यातिप्रवर्तनम्' इत्येतत् केचिच्छोणितगतस्यैव लिङ्गं मन्यन्ते, अन्ये रसगतस्येति इह रौक्ष्यं स्वेदातिप्रवृत्तिर्लोमहर्षश्च कुष्ठारम्भकदोषैः स्वेदवहस्रोतोदुष्ट्या भवति। यदुक्तं-'स्वेदवाहिषु दुष्टेषु पारुष्यं रोमहर्षणम्। अतिस्वेदनमस्वेदः परिदाहश्च जायते' इति। विपूयक इति विशेषेण पूयप्रयोगित्वम्। कौण्यं करभङ्गः। अङ्गानां संभेद इति अङ्गानां भङ्गः। प्रागुक्तानि तथैव चेति रसरक्तमांसधातुगतकुष्ठलिङ्गानीत्यर्थः; एतच्चैकत्राभिहितमपि क्रमेण परापरधातुदुष्टौ पूर्वपूर्वधातुदुष्टिलिङ्गख्यापनपरं, न्यायस्य समानत्वात्। यदुच्यते-'समानेष्वर्थेष्वेकत्राभिहितो विधिरन्यत्राप्यासंजनीयः' इति। शुक्रगतकुष्ठलिङ्गमाह दम्पत्योरित्यादि। कुष्ठं शुक्रगतमपत्येन व्यज्यत इत्यर्थः। अत्र शुक्रदुष्टिलक्षणप्रस्तावेन तत्तुल्यकार्या स्त्रीगताऽऽर्तवदुष्टिरप्युक्ता। तदपीत्यपिशब्दात् पूर्वोक्तान्यपि रसादिमज्जान्तर्गतकुष्ठलिङ्गानि भवन्ति। कुष्ठितमिति संजातं कुष्ठमस्येति तारकादित्वादितच्। अत्र दुष्टं शुक्रमार्तवं वा सर्वथा बीजत्वानुपघातादपत्यजनकं, परन्तु विकृतं जनयतीति द्रष्टव्यम्॥ २५-३०॥

विमर्श—त्वचा से त्वचागत रस धातु का ग्रहण किया जाता है। 'त्वक्स्वाप' इत्यादि लक्षण को कुछ लोग शोणितगत कुष्ठ का लक्षण मानते हैं। कुष्ठोत्पादक दोष से स्वेदवाही स्रोतों के दुष्ट हो जाने से स्वेद की अतिप्रवृत्ति, त्वचामें रूक्षता तथा रोमहर्ष ये लक्षण होते हैं।

कुष्ठोत्पादक जीवाणु से पुरुष और स्त्री बीज के उपसृष्ट हो जाने से सन्तान भी कुष्ठी होती है; क्योंकि चरक ने यह माना है कि बीज-दोष से माता-पिता के रोग सन्तानों में संक्रान्त होते हैं[1]। अर्वाचीन ग्रंथों में कुष्ठ के लिए साधारणतया यह बताया गया है कि वह कुष्ठी माता-पिता के निकट सम्पर्क में रहने से होता है। यदि नवजात शिशु को कुष्ठी माता-पिता से पृथक् कर दिया जाय तो बच्चे में उसके होने की सम्भावना बहुत कम हो जाती है। इसीलिये कुष्ठित का अर्थ संजातकुष्ठ न करके कुष्ठप्रकृति करना चाहिये। कुष्ठी माता-पिता की सन्तान उत्पन्न होते ही कुष्ठी नहीं होती अपितु घनिष्ठ सम्बन्ध रहने पर कालान्तर में होती है। इतना अवश्य है कि अन्यों की अपेक्षा कुष्ठी माता-पिता की सन्तान में इसके होने की अधिक सम्भावना होती है। प्रमेह निदान में 'जातः प्रमेही' इत्यादि श्लोक की व्याख्या में विजयरक्षित ने कहा है—'नहि प्रमेहिनो जात इत्येतावता उत्पन्नमात्र एव प्रमेही भवति किं तर्हि कालवशेन दुष्टेरभिव्यक्त्या यथा कुष्ठिजातस्य कुष्ठम्'। अर्थात् प्रमेही से उत्पन्न सन्तान उत्पन्न होते

---

१. यस्य यस्य ह्यङ्गावयवस्य बीजे बीजभाग उपतप्तो भवति तस्य तस्याङ्गावयवस्य विकृतिरुपजायते नोपजायते चानुपतापात्॥ (चरक शा.)

ही प्रमेही नहीं होती अपितु अनुकूल परिस्थिति प्राप्त करने पर ही उसकी अभिव्यक्ति होती है, जैसे कुष्ठी माता-पिता की सन्तान उनके घनिष्ठ सम्पर्क में रहने के कुछ काल उपरान्त कुष्ठ से पीडित होती है । आधुनिक विद्वान् भी इसी मत के पोषक हैं ।

दोषधातुभेदेन साध्यासाध्यतां विवेचयति—

साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकं च यत् ।
मेदसि द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम् ॥३१॥ (सु. नि. ५)
क्रिमितृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम् ।
प्रभिन्नं प्रस्रुताङ्गं च रक्तनेत्रं हतस्वरम् ॥ ३२ ॥
पञ्चकर्मगुणातीतं कुष्ठं हन्तीह मानवम् । (सु. सू. ३३)

त्वचा रक्त और मांस में स्थित तथा वात एवं कफ की अधिकता से होने वाला कुष्ठ साध्य होता है । मेदोगत कुष्ठ यदि द्वन्द्वज हो तो याप्य होता है । अस्थि और मज्जा में होने वाला कुष्ठ असाध्य होता है । जिस कुष्ठ में कीड़े पड़ गये हों और रोगी प्यास, जलन एवं मन्दाग्नि से पीडित हो वह तथा त्रिदोषज कुष्ठ असाध्य होता है । जिसका शरीर फट गया हो, जिसके अंग सड़ने लगे हों, जिसके नेत्र लाल हों, जिसके बोलने की शक्ति भी नष्ट हो गई हो और जो पञ्चकर्म गुणातीत हो वह भी असाध्य होता है ॥ ३१-३२ ॥

साध्यादिभेदमाह–साध्यं त्वग्रक्तमांसस्थमित्यादि । वातश्लेष्माधिकं च यदिति एककुष्ठकिटिभादिवर्ज्यम् । मज्जास्थिसंश्रितमिति अत्र मज्जास्थिप्रत्यासत्त्या शुक्रगतस्याप्यसाध्यत्वं बोद्धव्यम् । प्रभिन्नमिति विदीर्णम् । पञ्चकर्मगुणातीतमिति पूर्वरूपक्रियया सह रसादिधातूनां चतुर्णां क्रियाकलापाः पञ्चकर्माणि, तेषां गुणा वीर्याणि, तान्यतीतो यः स तथा, अस्थिमज्जागत इत्यर्थः, ताश्च क्रियाः पूर्वरूपे शोधनमुभयतः; त्वक्प्राप्ते शोधनालेपनादि, रक्तप्राप्ते शोधनालेपनकषायपानशोणितावसेकादि, एवं मांसमेदसोरपि द्रष्टव्यमिति । अथवा पञ्चकर्माणि [1]वमनादीनि तेषां गुणाः फलानि, तान्यतीतः ॥ ३१-३२ ॥

विमर्श—पञ्चकर्म गुणातीत के कई अर्थ मिलते हैं ।

(१) विजयरक्षित जी का कहना है कि कुष्ठ के पूर्वरूपों की चिकित्सा और रस, रक्त, मांस और मेद इन चार की चिकित्सा को मिलाकर पञ्चकर्म कहते हैं । इन पांचों से जो परे हो उसे 'पञ्चकर्मगुणातीत' कहते हैं । तात्पर्य यह कि इनसे परे अस्थि और मज्जागत कुष्ठ असाध्य होता है ।

(२) वमन, विरेचन, आस्थापन, अनुवासन और शिरोविरेचन इन पंचकर्मों से असाध्य को भी पंचकर्मगुणातीत कह सकते हैं ।

विभिन्नकुष्ठेषु दोषोल्बणतां प्राह—

वातेन कुष्ठं कापालं पित्तेनौदुम्बरं कफात् ॥ ३३ ॥
मण्डलाख्यं विचर्ची च ऋष्याख्यं वातपित्तजम् ।
चर्मैककुष्ठं किटिभं सिध्मालसविपादिकाः ॥ ३४ ॥

---

१. यदुक्तं—कुष्ठेषु चैव सर्वेषु पञ्चकर्माणि कारयेत् । पक्षे पक्षे च वमनं मासि मासि विरेचनम्॥ षण्मासेन शिरामोक्षो नस्यं सप्तदिनान्तरमिति इति क. ।

वातश्लेष्मोद्भवाः श्लेष्मपित्ताद्दद्रुशतारुषी ।
पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा ॥ ३५ ॥
सर्वैः स्यात्काकणं पूर्वत्रिकं दद्रु सकाकणम् ।
पुण्डरीकर्ष्यजिह्वे च महाकुष्ठानि सप्त तु ॥ ३६ ॥

वात से कापाल, पित्त से औदुम्बर तथा कफ से मण्डल कुष्ठ होते हैं। विचर्चिका और ऋष्यजिह्व नामक कुष्ठ वातपित्तज होते हैं। चर्मकुष्ठ, एककुष्ठ, किटिभ, सिध्म, अलस तथा विपादिका वातकफज होते हैं। दद्रु, शतारु, पुण्डरीक, विस्फोट, पामा तथा चर्मदल नामक कुष्ठ कफपित्तजन्य होते हैं। काकण कुष्ठ सब दोषों के प्रकोप से उत्पन्न होता है। पहिले तीन (कापाल, औदुम्बर, मण्डल), दद्रु काकण, पुण्डरीक तथा ऋष्यजिह्व ये सात महाकुष्ठ कहलाते हैं। (शेष सब क्षुद्र कुष्ठ हैं) ॥३३-३६॥

कुष्ठेषु चिकित्सार्थं प्रधानं दोषमाह-वातेन कुष्टं कापालमित्यादि। विचर्च्यपि कफात्त-थेति श्लेष्मपित्तात्, तेन दद्रुप्रभृति चर्मदलान्तं श्लेष्मपित्तजमित्यर्थः। पूर्वत्रिकमिति कापा-लोदुम्बरमण्डलाख्यम्, अतः सप्तमहाकुष्ठादन्यत् क्षुद्रकुष्ठम् ॥ ३३-३६ ॥

त्वग्दोषसामान्यात् किलासमाह—

कुष्ठैकसम्भवं श्वित्रं किलासं वारुणं भवेत् ।
निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥ ३७ ॥
वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥ ३८ ॥
सकण्डुरं क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥ ३९ ॥ (वा. नि. १४)

श्वित्र, किलास तथा वारुण के उत्पादक कारण कुष्ठ के समान ही हैं। यह स्रावरहित होते हैं एवं वातादि तीनों दोषों से रक्त, मांस और मेद धातु में आश्रित हो कर उत्पन्न होते हैं। वातिक किलास रूक्ष और अरुण वर्ण का, पैत्तिक कमलपत्र के समान ताम्र वर्ण का दाहयुक्त और रोमों को नष्ट करनेवाला होता है। कफज सफेद घन, भारी और खुजली युक्त होता है। इसी प्रकार अरुण, ताम्र और सफेद वर्ण का किलास क्रमशः रक्त, मांस और मेद धातु में होता है। व्रण एवं दोष इन दो कारणों से उत्पन्न होनेवाला किलास उत्तरोत्तर गम्भीर धातु में कृच्छ्रसाध्य होता है ॥३७-३९॥

त्वग्दुष्टितुल्यत्वादत्रैव किलासमाह-कुष्ठैकसंभवमित्यादि। कुष्ठेन सह एकं समानं विरु-द्धाशनपापकर्मादि सम्भवो निदानं यस्य तत्तथा, कुष्ठेन सह समानचिकित्सितत्वं च बोद्धव्यं, 'कुर्याच्चास्मै कुष्ठोक्तं विधानम्' इति वचनात्। चरके त्वस्य हेतुविशेषोऽपि पठ्यते, यथा- 'वचांस्यतथ्यानि कृतघ्नभावो निन्दा गुरूणां गुरुधर्षणं च। पापक्रिया पूर्वकृतं च कर्म हेतुः किलासस्य विरोधि चान्नम्' (च. चि. ७) इति। किलासमेव मांसमेदःसमाश्र-यणयोगत्वादरुणं श्वित्रं च भण्यते, त्वग्गतमेव किलासं, तस्य लक्षणं निर्दिष्टमपरिस्रा-वीति। स्रावो हि रक्तादिदुष्ट्या भवति, तेनास्य त्वग्गतत्वेन स्रावाभावः। उक्तं च- 'त्वग्गतं च यदस्रावि तत् किलासं प्रकीर्तितम्' इति। त्रिधातूद्भवसंश्रयमिति त्रिधातु-स्त्रयो दोषास्तथा रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्तथा; अथवा त्रिधातुः रक्त-

मांसमेदांसि उद्भवाय संश्रयो यस्य तत्तथा; दोषास्तु सर्वसाधारणत्वादुभ्यन्त एव। ननु, यदि धातुत्रयाश्रितं किलासं तत्कथं 'यदा त्वचमतिक्रम्य तद्धातूनवगाहते। हित्वा किलाससंज्ञां च कुष्ठसंज्ञां लभेत्तदा' इति विश्वामित्रवचनं किलाससंज्ञाप्रतिक्षेपकं न विरुध्यते? तथा 'त्वग्गतमेव किलासम्' (सु. नि. ५) इति सुश्रुतेऽवधारणं विरुद्धम्? उच्यते, विश्वामित्रवचनस्य तावदयमर्थः प्रत्येतव्यः—यदोक्तरक्तादिग तसमस्तकुष्ठलक्षण-जनकतया धातूनवगाहते तदा न तत् किलासं, किं तर्हि कुष्ठजनकहेत्वन्तरबृंहितदोषो-पप्लवाद् धातून् दूषयेत्, तथा हेतुलक्षणलक्षणमरुणादिकुष्ठं तत्; अन्यदितररक्तादिगत-कुष्ठलिङ्गान्यतिरिक्तमुत्पादसमकालभाविरक्तताम्रादिवर्णतामात्रकारकं रक्तादिगदोषजन्यं किलासमेव, अन्यथा रक्तादिगतकिलासलक्षणेन चरकोक्तेन विरोधः स्यात्। स यदाह—'दोषे रक्ताश्रिते रक्तं ताम्रं मांससमाश्रिते। श्वेतं मेदःस्थिते श्वित्रं गुरु तच्चोत्तरोत्तरम्॥' (च. चि. ७) इति चरके हि किलासस्यैव धातुत्रयसंम्बन्धकृतवर्णेन दारुणादिसंज्ञा-न्तरमात्रं कृतं, सुश्रुतेऽपि त्वग्गतमेवेत्यनेन रक्तादिदुष्ट्या विशिष्टरक्तादिगतमहाकुष्ठलिङ्गरहि-तत्वं तथा क्षुद्रकुष्ठवद्युगपद्रक्तलसीकात्वङ्मांससंदूषकत्वविरहः ख्याप्यते; अथवा एवका-रोऽयोगव्यवच्छेदे, यथा—नीलं सरोजं भवत्येवेति। उक्तप्रकारेण धातुत्रयमात्रगतत्वेनैकदो-षजत्वेन चास्य कुष्ठाद्भेदः; 'श्वित्रसंज्ञां लभेत्तदा' इति जेज्जटपाठे तु श्वित्रसंज्ञामात्रव्यवहारः किलासस्य, न पुनरर्थभेदः कश्चिदपि। भालुकिना तु धातुभेदेन किलासस्य संज्ञान्तरं दर्शितं—'वारुणं तत्तु विज्ञेयं मांसधातुसमाश्रयम्। मेदःश्रितं भवेच्छ्वित्रं दारुणं रक्तसंश्र-यम्॥' इति। तथा चरकेऽपि—'दारुणं वारुणं श्वित्रं किलासं नामभिस्त्रिभिः' (च. चि. ७) इति। तेनेहापि तथा बोद्धव्यम्। क्रमाद्रक्तमांसमेदःसु चादिशेद्वर्गेनैवेहुभयमिति ईदृश-मेव वर्णेनारुणं ताम्रं श्वेतं च किलासं रक्तमांसमेदःसु यथाक्रमेणादिशेत्। उभयमिति व्रणजं च तच्छ्वित्रं भवति, तथाच भोजः—'श्वित्रं तु द्विविधं विद्याद्दोषजं व्रणजं तथा। तत्र मिथ्योपचाराद्धि व्रणस्य व्रणजं स्मृतम्॥ दोषजं च द्विधा प्रोक्तमात्मजं परजं तथा। परसंस्कारसंस्पर्शाद्येतत् परजमुच्यते। तदात्मजं विजानीयाद्यद्देहेष्वनिलादिजम्'॥ इति। रक्तादिधातुत्रयगतस्य च किलासस्य दूष्यप्रभावाद्यस्य कस्यापि दोषस्य संबन्धनियता एवारुणादयो वर्णा बोद्धव्याः, यदि तु तत्र दोषनियतो वर्णः कल्प्यते तदा वर्णातिदेशो व्यर्थः स्यात्, वाताद्रूक्षारुणमित्यादिनैव सिद्धत्वात्। यद्येवं दोषेणात्र वर्णाभिधानं विफलं? निर्विषयत्वात्; नैवं, त्वग्गते स्वभावेनारुणादिवर्णस्य चरितार्थत्वात्। हन्त तर्हि कथं रक्तादिगतत्वमस्य निश्चेतव्यं? त्वग्गते स्वभावेनारुणादिवर्णस्य सद्भावेन सन्दिग्धत्वात्। उच्यते, क्रमेणारुणादिवर्णोत्पादाद्रक्तादिगतत्वं निश्चेतव्यम्, उत्पत्तिमात्रे त्वरुणादियोगात्त्व-ग्गतत्वमिति॥

विमर्श—कुष्ठ के जो उत्पादक कारण बताये गये हैं वे किलास को भी उत्पन्न करते हैं। इनके अतिरिक्त चरक ने कुछ विशेष कारण भी बताये हैं—

'वचांस्यतथ्यानि कृतघ्नभावो निन्दा गुरूणां गुरुधर्षणं च।
पापक्रिया पूर्वकृतं च कर्म हेतुः किलासस्य विरोधि चान्नम्'॥

किलास को दारुण, वारुण और श्वित्र भी कहते हैं। चरक ने कहा भी है—'दारुणं वारुणं श्वित्रं किलासं नामभिस्त्रिभिः'। इसको आम बोल चाल में सफेद कोढ़ (Leucoderma) कहते हैं। व्रणज और दोषज इसके दो भेद हैं। दोषज भी आत्मज और परज भेद से दो प्रकार का होता है। इससे किसी प्रकार का स्राव नहीं होता। स्राव के लिये रक्त आदि धातु की दुष्टि आवश्यक है। इसमें केवल त्वचा की ही विकृति होती है। सुश्रुत ने कहा भी है—'त्वग्गतमेव किलासम्'।

विश्वामित्र ने भी कहा है—'जब त्वचा को पार कर किलास गम्भीर धातुओं में पहुँचता है तब उसे कुष्ठ ही कहना चाहिए'। इन वचनों का 'त्रिधातूद्भवसंश्रयम्' अर्थात् तीनों दोप कारण और तीन धातु (रक्त, मांस और मेद) आश्रय होते हैं—इस वचन से विरोध नहीं समझना चाहिए, क्योंकि रक्त, मांस या मेद में भी दोप आश्रित होने पर व्याधिस्वभावात् विकृति त्वचा में ही होती है और जब अपचार से दोपवृद्धि होकर रक्तादि भी विकृत हो जाते हैं तब उसे लक्षणानुसार अरुण आदि कुष्ठ ही कहेंगे न कि किलास। इसी का निवेचन मधुकोपकार ने विस्तार से किया है।

इसी प्रकार वर्ण के सम्बन्ध में भी एक सन्देह होता है। वात, पित्त और कफ के कारण तथा रक्त, मांस और मेद में दोष आश्रित होने पर भी क्रमशः अरुण, ताम्र और श्वेत वर्ण होना बताया गया है। उसमें दोप और धातु में किसे महत्त्व देना चाहिये ? अर्थात् त्वचा का वर्ण अरुण होने पर उसे वातकृत मानना चाहिए या रक्ताश्रित दोपकृत ? तथा रक्तगत पित्त या कफ दोप होने पर क्रमशः ताम्र या श्वेत वर्ण होगा या रक्ताश्रित होने के कारण अरुण वर्ण ? इसका उत्तर प्राचीन टीकाकारों ने यही दिया है कि त्वचा मात्र में आरम्भ में उत्पन्न वर्ण को दोपकृत एवं उत्तरोत्तर गम्भीर धातुगत दोप के कारण उत्पन्न वर्ण को धातुकृत समझना चाहिए तथा रक्तादि धातुओं में किसी भी दोप के होने पर वर्ण धातु के अनुसार ही होगा।

अष्टांगसंग्रह में श्वित्र को बाह्य संज्ञा प्रदान की है—'श्वित्रमस्माच्च कुष्ठं बाह्यमुदाहृतम्'। वस्तुतः किलास या श्वित्र में आन्तरिक विकृति न होकर बाह्य विकृति ही होती है। त्वचा के बाह्य-स्तर में मेलेनिन (Melanin) नामक एक रङ्ग द्रव्य रहता है। यही त्वचा को रङ्ग प्रदान करता है। यह त्वचा की उष्णता से रक्षा करता है। उष्ण प्रदेश के निवासियों की त्वचा में इसकी प्रचुरता रहती है। अत एव उनकी त्वचा अधिक काली होती है। किलास रोग में त्वचा में इस रङ्ग द्रव्य का अभाव हो जाता है जिससे त्वचा का वर्ण सफेद हो जाता है। इससे त्वचा की मृदुता नष्ट हो जाती है। यह रोग शरीर में बहुत धीरे-धीरे फैलता है। कभी-कभी शरीर की सारी त्वचा सफेद हो जाती है; बीच-बीच में कुछ काले धब्बे रह जाते हैं। यह रोग औपसर्गिक नहीं है अतः रोगी से घृणा करने की आवश्यकता नहीं है।

कुष्ठ और किलास में भेद

कुष्ठ	किलास
(१) यह कृमिजन्य होता है।	(१) इसमें कृमि का कुछ सम्बन्ध नहीं है।
(२) यह संक्रामक है।	(२) यह संक्रामक नहीं है।
(३) इससे शरीर की धातुओं का नाश होता है।	(३) इससे शरीर की धातुओं का नाश नहीं होता है।
(४) यह त्रिदोषज है।	(४) यह एकदोषज भी होती है।
(५) यह सप्तधातुगत होता है।	(५) यह केवल त्वचा, रक्त, मांस और मेद में ही होता है।

किलासस्य साध्यासाध्यतां प्राह—

अशुक्लरोमाऽबहुलमसंश्लिष्टमथो नवम्।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा ॥ ४० ॥
गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्।
वर्जनीयं विशेषेण किलासं सिद्धिमिच्छता ॥ ४१ ॥

जिसमें बाल सफेद न हुए हों (काले हों), जो थोड़ा, एक दूसरे से न मिला हुआ, नवीन और

आग से जलने से उत्पन्न न हुआ हो वह किलास साध्य होता है। इसके विपरीत लक्षणों से युक्त होने पर असाध्य होता है। गुह्यस्थान, हाथ, पैर के तलुवे और ओष्ठ में होने वाले नवीन किलास की भी सिद्धि की कामना करनेवाले वैद्य को चिकित्सा न करनी चाहिये ॥ ४०-४१ ॥

तस्य साध्यत्वमसाध्यत्वं चाह—अशुक्लेत्यादि। अशुक्लरोम, कृष्णरोम, अबहुलं तनु, असंश्लिष्टं परस्परमसंयुक्तम्। अनग्निदग्धजम् अग्निदग्धजं यच्च भवति, एतत् साध्यम्। अतोऽन्यथा अतोऽन्यथोक्तसर्वप्रकारमसाध्यं, चरकेऽप्येवंविधस्यासाध्यत्वमुक्तम्। यथा— "यच्छुक्लरोमबहुलं यत् संलग्नं परस्परम्। यन्न वर्षगणोपेतं तच्छ्वित्रं नैव सिध्यति' (च. चि. ७) इति। गुह्यपाणितलौष्ठेष्विति तलमत्र पादतलं सुश्रुते 'अन्ते जातम्' इति सामान्येन निर्देशात् ॥ ४०-४१ ॥

कुष्ठस्य संक्रामकतां प्राह—

प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात् सहभोजनात्।
एकशय्यासनाच्चैव वस्त्रमाल्यानुलेपनात् ॥ ४२ ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम् ॥ ४३ ॥ (सु. नि. ५)

इति श्रीमाधवकरविरचिते माधवनिदाने कुष्ठनिदानं समाप्तम् ॥ ४९ ॥

कुष्ठादि रोगों से पीडित रोग के साथ मैथुन करने या निरन्तर सम्पर्क से, शरीर के स्पर्श से, श्वास से, साथ में भोजन करने से, एक शय्या पर सोने से, रोगी के पहिने वस्त्र और माला के धारण करने से कुष्ठ, ज्वर, राजयक्ष्मा, नेत्रभिष्यन्द तथा अन्य औपसर्गिक रोग एक मनुष्य से दूसरे पर संक्रान्त हो जाते हैं ॥ ४२-४३ ॥

कुष्ठस्य संसर्गजप्रसङ्गेन सर्वानेव संसर्गजान् रोगानाह-प्रसङ्गादित्यादि। प्रसङ्गो मैथुनम्, अथवा प्रसङ्गः सातत्यं, तेन कृतात् गात्रसंस्पर्शादेः। औपसर्गिकरोगा[२] इति औपसर्गिकाः पापरोगादयो भूतोपसर्गजाश्च। संक्रामन्ति आविशन्ति। रोगसंक्रान्तिश्च कुष्ठिप्रभृतिपापिजनसंसर्गेण पापसंक्रान्तेर्विकारप्रभावाद्वा बोद्धव्या ॥ ४२-४३ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां कुष्ठनिदानं समाप्तम् ॥ ४९ ॥

विमर्श—मसूरिका, रोमान्तिका, विसर्प, उपदंश, खुजली आदि औपसर्गिक रोग हैं—
मसूरिकाश्च रोमान्त्यो ग्रन्थिवीसर्प एव च। उपदंशश्च कण्ड्वाद्या औपसर्गिकसंज्ञकाः ॥

ये नाम उदाहरण मात्र के। इनके अतिरिक्त अन्य अनेक रोग औपसर्गिक हैं। इन रोगों के उपसर्ग मार्ग भी भिन्न भिन्न होते हैं। कुछ रोग छूने पर त्वचा द्वारा, कुछ श्वास द्वारा और कुछ अन्नपान के साथ मुख द्वारा एक दूसरे से फैलते हैं। आयुर्वेद ने कुछ रोगों की संक्रामकता देखने से भी मानी है—

त्वगक्षिरोगापस्मारराजयक्ष्ममसूरिकाः। दर्शनात् स्पर्शनाद् दानात् संक्रामन्ति नरान्नरम् ॥

जीवाणुओं से उत्पन्न होने वाले अथवा एक मनुष्य या मनुष्येतर प्राणी से दूसरे मनुष्य को होने वाले रोग औपसर्गिक कहलाते हैं। इसके मुख्यतया तीन मार्ग हैं—

---

१. 'यत्परस्परतोऽभिन्नं बहु यद्रक्तलोमवत्' इति वर्तमानचरकप्रतिलिपिषु पाठः।
२. 'औपसर्गिकरोगाः शीतलिकादयः' इति डल्हणः।

(१) त्वचा (Skin), उपदंश, फिरंग, धनुस्तम्भ, विसर्प तथा मसूरिका इनका त्वचा द्वारा संक्रमण होता है।

(२) श्वास-प्रश्वास—राजयक्ष्मा, इन्फ्लुयेन्जा, प्रतिश्याय, रोमान्तिका, कुक्कुर खांसी, निमोनियाँ तथा रोहिणी का उपसर्ग इस मार्ग से होता है।

(३) मुख—खाद्य-पेय के द्वारा भी कुछ रोगों का उपसर्ग होता है यथा—आन्त्रिक ज्वर (Typhoid), अतिसार, विसूचिका। इनके अतिरिक्त कुछ रोग कीड़ों के द्वारा भी फैलते हैं। यथा पिस्सू से प्लेग, मच्छर से मलेरिया व श्लीपद ज्वर एवं एक भुनगे के दंश से कालाजार फैलता है। इन सबका समावेश त्वचा मार्ग में ही किया जाता है।

कुष्ठी की नासिका के मल तथा फोड़े-फुन्सियों के पूय में कुष्ठ के जीवाणु रहते हैं। ऐसे रोगी के साथ बैठने, उसके वस्त्र और पात्रों का उपयोग करने से दूसरे व्यक्ति में रोग का संक्रमण हो जाता है।

समाप्तं चेदं कुष्ठनिदानम्

अथ शीतपित्तोदर्दकोठनिदानम्

त्रयाणां सामान्यनिदानं प्राह—

शीतमारुतसंस्पर्शात्प्रदुष्टौ कफमारुतौ।
पित्तेन सह सम्भूय वहिरन्तर्विसर्पतः॥ १॥

ठण्डी हवा के स्पर्श से कफ और वायु प्रकुपित होकर [अपने हेतु से प्रकुपित] पित्त के साथ मिलकर बाहर त्वचा तथा आन्तरिक रक्त आदि धातुओं में फैलकर [शीतपित्त, उदर्द और कोठ रोगों को उत्पन्न करते हैं]॥ १॥

त्वग्दुष्टिदोषत्रयजन्यत्वसामान्यात् कुष्ठानन्तरं शीतपित्तोदर्दादिनिदानम्। तस्य दोषत्रयजन्यत्वमाह—शीतमारुतसंस्पर्शादित्यादि। पित्तेन सह संभूयेति स्वहेतूपचितेन पित्तेन संभूय मिलित्वा। बहिरन्तरिति बहिस्त्वचि, अन्तः शोणितादौ, विसर्पतः प्रसरतः॥ १॥

विमर्श—शीतपित्त को आजकल अर्टिकेरिया (Urticaria) कहते हैं। यह त्रिदोषज होता है। दोषोल्वणता के भेद से उदर्द और कोठ भी इसी के भेद हैं। यह रोग शरीर में एक साथ गर्मी और सर्दी का प्रभाव होने से होता है। आधुनिक विद्वान् इसका कारण एक प्रकार की अनूर्जता (Alergy) को मानते हैं जो किसी असात्म्यप्रोभूजिन (Unsuitable protien) के सेवन से उत्पन्न होती है। इसमें विकृत मत्स्य, मांस, अण्डा, कृमिदंश, संखिया और किनोन के योग तथा अंकुशमुख कृमि या गण्डूपदकृमि का उपसर्ग (Aucylostomiasis or ascariais) मुख्य हैं।

पूर्वरूपलक्षणान्याह—

पिपासाऽरुचिहृल्लासदेहसादाङ्गगौरवम्।
रक्तलोचनता तेषां पूर्वरूपस्य लक्षणम्॥ २॥

प्यास, अरुचि, मिचली, शरीर का गिरा रहना, अंगों में भारीपन तथा आंखों का लाल होना ये इनके पूर्वरूप हैं॥ २॥

पूर्वरूपमाह—पिपासेत्यादि। रक्तलोचनता प्रभावात्। पूर्वरूपस्य लक्षणमिति पूर्वरूपस्य स्वरूपमित्यर्थः; न तु लक्षणमत्र लिङ्गं, पिपासादिव्यतिरिक्तस्य पूर्वरूपस्याभावात्॥२॥

विमर्श—प्यास तथा आँखों की लाली पित्त के कारण तथा अरुचि और मिचली कफ के कारण होती है।

उदर्दस्य लक्षणमाह—

वरटीदष्टसंस्थानः शोथः संजायते बहिः।
सकण्डूस्तोदबहुलश्छर्दिज्वरविदाहवान्॥ ३॥
उदर्दमिति तं विद्याच्छीतपित्तमथापरे।
वाताधिकं शीतपित्तमुदर्दस्तु कफाधिकः॥ ४॥

त्वचा पर भिड़ या ततैये के काटने से उत्पन्न सूजन के समान जो शोथ उत्पन्न हो जाता है तथा जिसमें खुजली, सुई के चुभने जैसी पीडा की अधिकता, वमन, ज्वर तथा जलन होती है उसे कुछ विद्वान् उदर्द और कुछ शीतपित्त कहते हैं। वस्तुतः शीतपित्त में वायु की और उदर्द में कफ की अधिकता रहती है॥ ३-४॥

उदर्दलक्षणमाह—वरटीत्यादि। सकण्डूस्तोदबहुलश्छर्दिज्वरविदाहवानिति अत्र कण्डूः कफात्, तोदो वातात्, छर्दिज्वरविदाहाः पित्तादिति दोषत्रयलिङ्गम्। अनयोः शीतपित्तोदर्दयोः समानसंस्थानत्वेऽपि वाताधिकं शीतपित्तं, कफाधिक उदर्दः॥ ३-४॥

विमर्श—ज्वर के साथ त्वचा पर ददोरे पड़ जाते हैं। वायु की अधिकता के कारण शीतपित्त में चुभन-सी होती है और उदर्द में कफ की अधिकता के कारण खुजली और वमन के लक्षण होते हैं। इसमें कभी-कभी अतिसार की प्रवृत्ति भी पाई जाती है। यह तीव्र और पुराण दो प्रकार का होता है। तीव्र के लक्षण शीघ्र ही एक दो दिन में नष्ट हो जाते हैं, किन्तु पुराण के लक्षण सप्ताहों और कभी-कभी महीनों तक भी चलते रहते हैं। त्वचा पर खुजली युक्त ददोरों की उत्पत्ति इस रोग का निर्णायक लक्षण है।

उदर्दस्यैव धर्मान्तरं निरूपयति—

सोत्सङ्गैश्च सरागैश्च कण्डूमद्भिश्च मण्डलैः।
शैशिरः कफजो व्याधिरुदर्द इति कीर्तितः॥ ५॥

उत्संग युक्त (मध्य में निम्न), रक्तवर्ण के खुजली युक्त चकत्तों के साथ शिशिर ऋतु में होने वाला कफज रोग उदर्द कहलाता है॥ ५॥

उदर्दस्य धर्मान्तरमाह—सोत्सङ्गैरित्यादि। उत्सङ्गैर्मध्यनिम्नैः शैशिर इति शिशिरसंभवः।

कोठं विवेचयति—

असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते॥ ६॥

इति श्रीमाधवकरविरचिते माधवनिदाने शीतपित्तोदर्दकोठनिदानं समाप्तम्।

वमन के अयोग अथवा मिथ्या योग तथा निकलते हुये पित्त, कफ और अन्न के वेग को धारण करने से खुजली युक्त लालवर्ण के अनेक चकत्ते पड़ जाते हैं जिन्हें कोठ और बार-बार होने पर उत्कोठ कहते हैं ॥ ६ ॥

त्वग्दुष्टिसाम्यादत्रैव कोठोऽभिधीयते—असम्यग्वमनेत्यादि । असम्यक्त्वं वमनस्यायोगमिथ्यायोगादिना, तथोदीर्णानां पित्तश्लेष्मान्नानां निग्रहो वेगविधारणं, तैर्मण्डलानि जायन्ते, स कोठः; अथवाऽयमर्थः—असम्यग्वमनोदीर्णौ पित्तश्लेष्माणौ, तथाऽन्ननिग्रह उपस्थितवेगस्यान्नस्य निग्रहश्छर्दिनिग्रह इति यावत्, तैर्हेतुभिर्भवन्ति । वमनस्य चासम्यक्त्वमयोगमिथ्यायोगाभ्यां ज्ञेयम्, अतियोगस्य तु पित्तश्लेष्मकोठाकरत्वात् । एतेन हेतुलक्षणभेदाद् भिन्नकोठ उदर्दात् । कोठो निरनुबन्धः । तथा चोक्तं—'क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः' इति । सानुबन्ध उत्कोठोऽभिधीयते । सानुबन्धता च पुनः पुनर्भवनेन ॥ ६ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां शीतपित्तोदर्दकोठनिदानं समाप्तम् ॥ ५० ॥

विमर्श—उत्पादक कारण तथा लक्षणों की भिन्नता के कारण कोठ का वर्णन पृथक् किया गया है। अस्थायी कारणों से किञ्चित् काल तक रहने वाले को कोठ और चिरकारी दोषों से उत्पन्न बार-बार होने वाले को उत्कोठ कहते हैं ।

समाप्तं चेदं शीतपित्तनिदानम्

अथाम्लपित्तनिदानम्

निदानप्रतिपादनपूर्वकमम्लपित्तस्य स्वरूपमाह—

विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धम् ।
पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ॥ १ ॥

वर्षा ऋतु आदि के प्रभाव से पहिले से ही सञ्चित पित्त जब विरुद्ध भोजन, विकृत भोजन, अत्यधिक अम्ल, विदाही तथा पित्त प्रकोपक भोजन और पान करने वाले व्यक्ति में विदग्ध (अधिक अम्ल) हो जाता है तो उसे अम्लपित्त कहते हैं ॥ १ ॥

कोठहेतौ पित्तश्लेष्मोल्लेखात् पित्तश्लेष्ममिलितरूपस्याम्लपित्तस्य निदानम् । निदानपूर्वकमम्लपित्तस्य स्वरूपमाह—विरुद्धेत्यादि । विरुद्धं क्षीरमत्स्यादि, दुष्टं व्यापन्नमन्नं, विदाहिस्थाने विदग्धेति पाठान्तरे विदग्धं भर्जितं; पित्तप्रकोपिपानान्नभुज इति पित्तप्रकोपि पानं तक्रसुरादि, अन्नमाशुधान्यमाषादि; पित्तप्रकोपिपानान्नग्रहणेनैवाम्लविदाहिनो ग्रहणे सिद्धे तदभिधानं विशेषार्थं, 'पित्तप्रकोपणाद्यन्नभुज' इति पाठान्तरे आदिशब्दात् कफादिप्रकोपणमन्नं गृह्यते । एवंविधपानान्नमुपभुञ्जानस्य विदग्धं कुपितं, स्वहेतूपचितं पुरा यदिति वर्षासु जलौषधिगतविदाहादिभिः स्वहेतुभिरुपचितं संचयमापन्नम् । यदुक्तं— 'वर्षास्वम्लविपाकित्वादद्भिरोषधिभिस्तथा' (च. चि. ३) इति । विदाहाद्यम्लगुणोद्रिक्तं पित्तमम्लपित्तम् ।

विमर्श—प्राकृत और विदग्ध भेद से पित्त दो प्रकार का होता है । सुश्रुत ने प्राकृत या अविकृत पित्त का रस कटु और विकृत या विदग्ध पित्त का रस अम्ल माना है । जब विदग्ध पित्त की वृद्धि हो जाती है तो उसे अम्लपित्त कहते हैं । 'अम्लं-विदग्धं च तत् पित्तम् अम्लपित्तम् ।' इसे आजकल हाइपर एसिडिटी (Hyper acidity) कहते हैं । इसके निम्न कारण हैं—

(१) आमाशय और पच्यमानाशय के व्रण (Gastroduodenal ulcer)

(२) अत्यधिक धूम्रपान (Excessive smoking)

(३) किण्वीकरणजन्य अम्ल-प्राङ्गोदीय (Carbohydrate) का पाचन ठीक न होने से शर्करा का किण्वीकरण (Fermentation) हो जाता है । इससे अम्ल उत्पन्न होकर अम्लपित्त उत्पन्न करता है ।

अम्लपित्तस्य लक्षणान्याह—

अविपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः ।
हृत्कण्ठदाहारुचिभिश्चाम्लपित्तं वदेद्भिषक् ॥ २ ॥

भोजन का न पचना, विना परिश्रम के थकावट, मिचली, कड़वी या खट्टी डकार, शरीर में भारीपन, हृदय प्रदेश तथा गले में जलन और अरुचि इन लक्षणों को देखकर अम्लपित्त समझना चाहिये ॥ २ ॥

तस्य लिङ्गमाह—अविपाकेत्यादि । अविपाक इत्याहारापाकः, क्लमोऽनायासजः श्रमः । अम्लपित्ते पित्तं प्रधानं, वातकफावप्यत्रानुगौ गौरवोद्गारकम्पादिना ज्ञेयौ ॥ २ ॥

अम्लपित्तस्याधोगतिं प्राह—

तृड्दाहमूर्च्छाभ्रममोहकारि प्रयात्यधो वा विविधप्रकारम् ।
हृल्लासकोठानलसादहर्षस्वेदाङ्गपीतत्वकरं कदाचित् ॥ ३ ॥

प्यास, जलन-मूर्च्छा, भ्रम और मोह को करने वाला, हरे, पीले, काले या रक्तवर्ण आदि विविध प्रकार का वह अम्लपित्त कभी-कभी गुदमार्ग से भी निकलता है और मिचली, शरीर पर ददोरे पड़ना, अग्निमान्द्य, रोमहर्ष, स्वेद तथा अङ्गों का पीलापन ये लक्षण होते हैं ॥ ३ ॥

तस्य कदाचिदधऊर्ध्वगमनभेदाद्द्वि (द्वि) विधस्याधोगतिं तावदाह—तृड्दाहेत्यादि । मूर्च्छा सर्वथा ज्ञानशून्यत्वं, मोहो विपरीतज्ञानम् । प्रयात्यधो वेत्यत्र वाशब्दो भाव्यूर्ध्वगमनापेक्षया । विविधप्रकारमिति हरित्पीतकृष्णरक्तादिबहुवर्णत्वदुर्गन्धित्वयोगाज्ञानाविधम् । कदाचिदिति न सर्वकालम् ॥ ३ ॥

विमर्श—रक्तपित्त के समान अम्लपित्त ऊर्ध्वग और अधोग भेद से दो प्रकार का होता है । अधोगामी अम्लपित्त में पित्त की ही विशेषता रहती है । कदाचित्शब्द से यह स्पष्ट है कि अधोगामी अम्लपित्त बहुत कम होता है ।

ऊर्ध्वगमम्लपित्तं निरूपयति—

वान्तं हरित्पीतकनीलकृष्णमारक्तरक्ताभमतीव चाम्लम् ।
मांसोदकाभं त्वतिपिच्छिलाच्छं श्लेष्मानुजातं विविधं रसेन ॥ ४ ॥
भुक्ते विदग्धे त्वथवाऽप्यभुक्ते करोति तिक्ताम्लवमिं कदाचित् ।
उद्गारमेवंविधमेव कण्ठहृत्कुक्षिदाहं शिरसो रुजं च ॥ ५ ॥
करचरणदाहमौष्ण्यं महतीमरुचिं ज्वरं च कफपित्तम् ।
जनयति कण्डूमण्डलपिडकाशतनिचितगात्ररोगचयम् ॥ ६ ॥

कफ के अनुबन्ध वाले अम्लपित्त का वमन हरे, पीले, नीले, काले, हलके या गहरे लाल रङ्ग

का बहुत खट्टा, मांस के धोवन के सदृश, अत्यधिक चिपचिपा, स्वच्छ कफयुक्त और लवण, कटु तथा तिक्त भेद से रस में विविध प्रकार का होता है। भोजन का विकृत पाक होने पर या कभी भोजन न करने पर भी रोगी कड़वा और खट्टा वमन करता है। रोगी को इन्हीं रसों की डकारें आती हैं और गले, हृदय प्रदेश तथा उदर में जलन होती है। रोगी शिरोवेदना से पीड़ित रहता है। यह कफानुबन्धी अम्लपित्त हाथ और पैरों में जलन तथा उष्णता, भयङ्कर अरुचि तथा ज्वर को उत्पन्न करता है। रोगी का शरीर खुजली, मण्डल, असंख्य पिड़काएँ तथा अविपाक और उत्क्लेश आदि लक्षणों से व्याप्त रहता है॥ ४–६॥

ऊर्ध्वगतिमाह—वान्तमित्यादि। नीलं स्निग्धकृष्णं, कृष्णं मर्दनाञ्जनवद्भृशकृष्णं, आरक्तमीषल्लोहितं, रक्तमन्तर्लोहितम्। मांसोदकाभमिति मांसधावनतोयाभं कृष्णलोहितमित्यर्थः। विविधं रसेनेति रसेन लवणकटुतिक्ताख्येन नानारूपम्। करोति तिक्ताम्लवमिमिति तिक्तस्य अम्लस्य वा वमिं वान्तिं करोति। उद्गारमेवंविधमेवेति अत्र करोतीति संबध्यते, एवंविधमिति अम्लतिक्तम्। कण्ठहृत्कुक्षिदाहं शिरसो रुजं चेति अत्रापि करोतीति संबध्यते। करचरणेत्यादि कण्डूमण्डलपिडकाशतनिचितगात्ररोगचयमिति कण्ड्वादिनिचितगात्रं च रोगचयं चेति द्वन्द्वः, तेन कण्ड्वादिनिचितगात्रं रोगचयं च करोतीत्यर्थः, रोगचयोऽविपाकोत्क्लेशादिः॥

साध्यासाध्यतां निरूपयति—

रोगोऽयमम्लपित्ताख्यो यत्नात् संसाध्यते नवः।
चिरोत्थितो भवेद्याप्यः कृच्छ्रसाध्यः स कस्यचित्॥ ७॥

नवीन अम्लपित्त यत्न करने पर साध्य होता है। पुराना होने पर वह याप्य और किसी किसी में (नियमित और हित आहार विहार करने पर) कृच्छ्रसाध्य होता है॥ ७॥

साध्यत्वादिकमाह—रोग इत्यादि। कृच्छ्रसाध्यः स कस्यचिदिति हिताहाराचारशीलिनः कस्यचिच्चिरोत्थितोऽपि कृच्छ्रसाध्यः॥ ७॥

अम्लपित्ते संसर्गमाह—

सानिलं सानिलकफं सकफं तच्च लक्षयेत्।
दोषलिङ्गेन मतिमान् भिषङ्मोहकरं हि तत्॥ ८॥
कम्पप्रलापमूर्च्छाचिमिचिमिगात्रावसादशूलानि।
तमसो दर्शनविभ्रमविमोहहर्षाण्यनिलकोपात्॥ ९॥
कफनिष्ठीवनगौरवजडतारुचिशीतसादवमिलेपाः।
दहनबलसादकण्डूनिद्राश्चिह्नं कफानुगते॥ १०॥
उभयमिदमेव चिह्नं मारुतकफसंभवे भवत्यम्ले।
(तिक्ताम्लकटूद्गारहृत्कुक्षिकण्ठदाहकृत् ॥ ११ ॥)
भ्रमो मूर्च्छारुचिश्छर्दिरालस्यं च शिरोरुजा।
प्रसेको मुखमाधुर्यं श्लेष्मपित्तस्य लक्षणम्॥ १२॥

इति श्रीमाधवकरविरचिते माधवनिदानेऽम्लपित्तनिदानं समाप्तम्॥ ५१॥

वात और कफ के लक्षणों को देखकर अम्लपित्त को वाताधिक, वातकफाधिक तथा केवल कफाधिक भेद से तीन प्रकार का समझना चाहिये। इसका निदान करने में चिकित्सक धोखा खा जाते हैं। वाताधिक अम्लपित्त में कम्पन, प्रलाप, मूर्च्छा, शरीर में चुनचुनाहट, अङ्गों में शिथिलता, शूल, आँखों के आगे अँधेरा छाना, विपरीत ज्ञान, फटना तथा अकारण ही हर्ष या रोमहर्ष ये लक्षण होते हैं। कफाधिक अम्लपित्त में मुख से कफ गिरना, शरीर में भारीपन, निष्क्रियता, अरुचि, शीत, शिथिलता, वमन, मुख का कफ से लिप्त रहना, अग्नि की मन्दता, खुजली तथा निद्रा ये लक्षण होते हैं। वातकफाधिक अम्लपित्त में इन दोनों के मिले हुए लक्षण होते हैं। कड़वी, खट्टी और चटपटी डकारों का आना, हृदयप्रदेश, उदर तथा गले में जलन होना भ्रम, मूर्च्छा, अरुचि, वमन, आलस्य, सिर में पीड़ा, लालास्राव तथा मुख का मीठा रहना ये भी कफाधिक अम्लपित्त के लक्षण हैं॥ ८-१२॥

तत्रैव केवलानिलकफानिलकफमात्राणां संसर्गमाह-सानिलमित्यादि। भिषङ्मोहकरमिति तस्योर्ध्वाधःप्रवर्तमानत्वेन छर्दतीसाराभ्यां सकाशाद्भेदस्य दुर्ज्ञेयत्वाद्वैद्यमोहकरत्वम्। कफेत्यादि, सादवमिलेपा इत्यत्र सादोऽङ्गसादः, लेपः श्लेष्मलिप्तास्यता। दहनबलसादेति सादशब्दो दहनबलाभ्यां संबध्यते॥ ८-१२॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायामम्लपित्तनिदानं समाप्तम्॥ ५१॥

अथ विसर्पनिदानम्

विसर्पस्य निदानपूर्विकां संख्यां निरुक्तिञ्चाह—

लवणाम्लकटूष्णादिसंसेवाद्दोषकोपतः।
विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्॥ १॥
पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः॥ २॥
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः।
आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः॥ ३॥
यस्तु कर्दमको घोरः स पित्तकफसंभवः। (च. चि. ११)

लवण, अम्ल और कटुरस प्रधान तथा उष्ण, तीक्ष्ण पदार्थों के सतत सेवन से प्रकुपित हुए दोष सात प्रकार से विसर्प को उत्पन्न करते हैं। सारे शरीर में फैलने की प्रवृत्ति होने से इसे विसर्प कहते हैं। एक-एक दोषों से तीन, तीनों दोषों से एक और द्वन्द्व तीन अर्थात् वातिक, पैत्तिक, श्लैष्मिक, सान्निपातिक, वातपित्तज, वातकफज तथा पित्तकफज भेद से ये सात प्रकार के होते हैं। वातपित्तज को आग्नेय, कफवातज को ग्रन्थि तथा पित्तकफज भयङ्कर विसर्प को कर्दमक भी कहते हैं॥१-३॥

अम्लपित्तसंभवच्छर्देर्वेगविधारणाद्रक्तदुष्टौ सत्यां विसर्पोत्पत्तेर्हेतुसाम्यात्तदनन्तरं विसर्पनिदानम्। छर्दिवेगविघातस्य रक्तदूषकत्वे चरकवचनं यथा,—'छर्दिवेगप्रतीघातात् काले

'चानवसेचनात्। शरत्कालप्रभावाच्च शोणितं संप्रदुष्यति' (च. सू. २४) इति। तस्य निदानपूर्विकां संख्यां निरुक्तिं चाह—लवणाम्लेत्यादि। 'विसर्पो न ह्यसंसृष्टो रक्तपित्तेन लक्ष्यते' इति वचनात् लवणाम्लादिकं विशेषेण रक्तपित्तनिदानमुक्तम्। संसेवया सततसेवया दोषकोपः संसेवादोषकोपस्ततः। अत्र आदिग्रहणाच्चरकोक्तानां हरितशाकशिण्डाकीप्रभृतीनां ग्रहणम्। सप्तधेति उल्बणैकैकदोषजास्त्रयः, सन्निपातज एकः, त्रयो द्वन्द्वजाः, इति सप्तप्रकारस्त्वमुक्तम्। सर्वतः परिसर्पणादिति सर्वतः परिसर्पणात् परिसर्पः, विविधं सर्पणाद्विसर्पः। यदुक्तं चरके, 'विविधं सर्पति यतो विसर्पस्तेन स स्मृतः। परिसर्पोऽथवा नाम्ना सर्वतः परिसर्पणात्' (च. चि. २१) इति॥ १–३॥

विमर्श—विसर्प की निरुक्ति—'सर्वतो विसर्पणाद् विसर्पः' सर्वाङ्ग में फैलने की प्रवृत्ति वाले रोग को विसर्प कहते हैं।

विविधं सर्पति यतो विसर्पस्तेन स स्मृतः।
परिसर्पोऽथवा नाम्ना सर्वतः परिसर्पणात्॥ (चरकः)

त्वचा के अतिरिक्त यह श्लेष्मलकला, हृदयावरण, फुफ्फुसावरण, मस्तिष्कावरण, मस्तिष्क जैसे शरीर के आन्तरिक अङ्गों तथा रक्त में भी प्रविष्ट हो जाता है। इन अंगों में होने वाला विसर्प असाध्य होता है। विसर्प का दूसरा नाम परिसर्प भी है। सुश्रुत ने वातिक, पैत्तिक, श्लैष्मिक, सान्निपातिक तथा क्षतज भेद से पाँच प्रकार का ही विसर्प माना है। वस्तुतः यह सदैव त्रिदोषज होता है केवल उल्बणता के अनुसार वातिक आदि भेद वर्णित हैं।

विसर्पस्य हेतूनाह—

रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः॥ ४॥
विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः। (च. चि. ११)

रक्त, लसिका, त्वचा तथा मांस ये दूष्य और वात, पित्त तथा कफ ये तीन दोष मिलकर सात धातुएँ विसर्प की उत्पत्ति कराती हैं॥ ४॥

विमर्श—चार दूष्य तथा तीन दोष ये सात विसर्प के कारण हैं।

त्वङ्मांसशोणितगताः कुपितास्तु दोषाः सर्वाङ्गसारिणमिहास्थितमात्मलिङ्गम्।
कुर्वन्ति विस्तृतमनुन्नतमाशु शोफं तं सर्वतो विसरणाच्च विसर्पमाहुः॥ (सुश्रुतः)

यहाँ त्वचा से उसमें रहने वाली लसिका का भी ग्रहण हो जाता है। उक्त श्लोक के द्वारा विसर्प की निरुक्ति तथा विशिष्ट लक्षणों का निर्देश संक्षेप में कर दिया गया है।

विसर्प की विशेषतायें—

(१) त्वचा या श्लेष्मलकला से शोथ का प्रारम्भ।
(२) सर्वांग में फैलने की प्रवृत्ति (सर्वांगसारी)।
(३) उत्पत्तिस्थान में स्थायी रूप से रहना जिसे सुश्रुत ने अस्थिर कहा है।
(४) अनुन्नतशोफ—विद्रधि, ग्रन्थि और अर्बुद के सदृश उभार इसमें नहीं होता।

ये चार विसर्प के मुख्य निर्णायक लक्षण हैं। विसर्प को आजकल एरिसिपेलास (Erysipelas) कहते हैं।

विसर्प के कारण—इसके दो भेद हैं—

(१) सहायक कारण—चिरकालीनमेह, विषमाग्नि, मद्यसेवन, सीलनयुक्त स्थानों में निवास तथा दूषित वायु का सेवन। इनसे शरीर की स्वाभाविक रोगप्रतिरोधक्षमता कम हो जाती है।

१. 'वातसेवनात्' इति क.।

(२) प्रधान कारण—विसर्पजनक माला गोलाणु (Streptococcus erysipelatis) इसका प्रधान कारण है । इसका प्रवेश शरीर में त्वचा या श्लेष्मलकला के क्षत से होता है ।

साधारणतया विसर्प के दो भेद कर सकते हैं—

(१) दोषज (Idiopathic)—इसमें पूर्वोक्त सात प्रकार के विसर्पों का ग्रहण किया जाता है । इसमें क्षत का पता नहीं चलता ।

(२) क्षतज (Traumatic)—इसमें क्षत की स्पष्ट प्रतीति होती है । जीवाणु क्षत की अतिसूक्ष्म दरारों से भी प्रविष्ट हो सकते हैं । त्वचा में प्रविष्ट हो जाने पर वहाँ इनका पोषण होता है और लसवाहिनियों के द्वारा समीपस्थ धातुओं में फैलकर शोथ उत्पन्न करते हैं । इसी तरह आस-पास की धातुओं में इसका प्रसार होता है ।

वातिकादिविसर्पं लक्षयति—

तत्र वातात् स वीसर्पो वातज्वरसमव्यथः ॥ ५ ॥
शोथस्फुरणनिस्तोदभेदायासार्तिहर्षवान् ।
पित्ताद् द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥ ६ ॥
कफात् कण्डूयुतः स्निग्धः कफज्वरसमानरुक् ।
सन्निपातसमुत्थश्च सर्वलिङ्गसमन्वितः ॥ ७ ॥ (वा. नि. १४)

वातिक विसर्प में वातज्वर के समान वेदना, शोथ, फड़कन, सुई के चुभने जैसी पीडा, भेदन, थकावट तथा रोमहर्ष के लक्षण होते हैं । पित्तज विसर्प बहुत जल्दी बढ़ता है, पित्तज्वर के समान लक्षण और गहरे लालवर्ण से युक्त होता है । कफज विसर्प में खुजली, स्निग्धता तथा कफज्वर के समान पीडा होती है । सन्निपातज विसर्प सब दोषों के लक्षणों से युक्त होता है ॥ ५–७ ॥

सर्वेषामेव रक्तादिदूष्यचतुष्टयदोषत्रयजन्यत्वमाह—रक्तमित्यादि । विसर्पस्य समानसामग्रीकत्वेऽपि कुष्ठाद्भेदः कुष्ठाध्याये एव निरूपितः । दोषशब्देनैव वातादिग्रहणे सिद्धे मला इति यत् कृतं, तदत्यर्थदुष्ट्या शरीरमलिनीकरणत्वं दोषाणां प्रतिपादयितुम् । सन्निपातजेऽसाध्यत्वमपि 'सर्वात्मकः क्षतकृतश्च न सिद्धिमेति' (सु. नि. १०) इति वचनात् । तेन विकृतिविषमसमवेतत्वमस्य । चरके त्वन्तर्जबहिर्जभेदेन विसर्पः पठितः । यदाह— 'मर्मोपघातात् संमोहादयनानां विघट्टनात् । तृष्णातियोगाद्वेगानां विषमं च प्रवर्तनात् ॥ विद्याद्विसर्पमन्तर्जमाशु चाग्निबलक्षयात् । अतो विपर्ययाद्बाह्यमन्यं विद्यात् स्वलक्षणैः' (च. चि. २१) इति ॥ ४–७ ॥

विमर्श—चरक ने बाह्य और आभ्यन्तर भेद से विसर्प दो प्रकार का माना है और उसके लक्षण भी बताये हैं—

मर्मोपघातात् संमोहादयनानां विघट्टनात् । तृष्णातियोगाद्वेगानां विषमं च प्रवर्तनात् ॥
विद्याद्विसर्पमन्तर्जमाशु चाग्निबलक्षयात् । अतो विपर्ययाद्बाह्यमन्यं विद्यात् स्वलक्षणैः ॥

सुस्ती, शिरःशूल बुभुक्षानाश तथा ज्वर ये विसर्प के पूर्वरूप हैं । इसके बाद क्षतस्थान पर अनुन्नत, शोफ, लालिमा, दाह, पीडा तथा फैलने की प्रवृत्ति ये लक्षण होते हैं । पूयोत्पादन इसमें नहीं होता, फफोले पड़ते हैं जिनसे जलीय स्राव निकलता है ।

विसर्प और कुष्ठ की सामग्री समान होने पर भी दोनों में भेद का कारण कुष्ठ प्रकरण में कहा जा चुका है । दोष शब्द से वातादिक का ग्रहण हो जाता है, फिर मल शब्द का प्रयोग दोषों की

अत्यन्त दुष्टि या शरीर की मलिनता दिखलाने के लिए किया गया है। सन्निपातज और क्षतज विसर्प असाध्य होता है। 'सर्वात्मकः क्षतकृतश्च न सिद्धिमेति।' (सु. नि. १०) क्योंकि यह विकृति विषमसमवाय से होती है और प्रकृत सम समवाय से होने वाले तो साध्य होते ही हैं।

आग्नेयविसर्पं निरूपयति—

वातपित्ताज्ज्वरच्छर्दिमूर्च्छातीसारतृड्भ्रमैः ।
ग्रन्थिभेदाग्निसदनतमकारोचकैर्युतः ॥ ८ ॥
करोति सर्वमङ्गं च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च विसर्पति भवेत् स सः ॥ ९ ॥
शान्ताङ्गारासितो नीलो रक्तो वाऽऽशु च चीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वाद् द्रुतं च सः ॥ १० ॥
मर्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः ।
व्यथतेऽङ्गं हरेत्संज्ञां निद्रां च श्वासमीरयेत् ॥ ११ ॥
हिक्कां च स गतोऽवस्थामीदृशीं लभते न ना ।
क्वचिच्छर्मारतिग्रस्तो भूमिशय्यासनादिषु ॥ १२ ॥
चेष्टमानस्ततः क्लिष्टो मनोदेहप्रमोहवान् ।
दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥ १३ ॥

(वा. नि. १३)

ज्वर, वमन, मूर्च्छा, अतिसार, प्यास, भ्रम (चक्कर), ग्रन्थियों या संधियों में फटने जैसी पीड़ा अग्निमान्द्य, तमकश्वास तथा अरुचि से युक्त वातपित्तज विसर्प में सम्पूर्ण शरीर जलते हुए अंगारे से झुलसे के समान हो जाता है। जिस-जिस स्थान पर विसर्प हो जाता है वह बुझे हुए अंगारे के समान काला, नीला या लाल होकर शीघ्र ही अग्नि से जलने के समान फफोलों से व्याप्त हो जाता है। शीघ्रगामी होने से वह जल्द ही मर्मस्थान में प्रवेश कर जाता है जिससे वायु अत्यधिक प्रकुपित होकर अंगों को पीडित करता है और संज्ञा (होश) तथा निद्रा को नष्ट कर देता है, हिक्का और श्वास को उत्पन्न करता है। इस प्रकार की अवस्था को प्राप्त हुआ वह रोगी कहीं भी शान्ति प्राप्त नहीं करता। इस प्रकार बेचैनी से पीडित रोगी भूमि पर बार-बार लेटने व बैठने की चेष्टा करता हुआ बहुत दुखी होकर मूर्च्छित होकर मरणरूप निद्रा को भी प्राप्त हो जाता है। इसको अग्निविसर्प कहते हैं॥ ८-१३ ॥

आग्नेयविसर्पमाह-वातपित्तादित्यादि। दीप्ताङ्गारावकीर्णवदिति ज्वलदङ्गारेणैव व्याप्तमङ्गं मन्यते। शान्ताङ्गारासित इति निर्वाणाङ्गारवत् कृष्णवर्णः स देशो भवति। नीलो रक्तो वेति स देशः स्निग्धनीलो रक्तो वा भवति। अग्निदग्ध इवेति अग्निदग्धदेश इव। शीघ्रगत्वादिति शीघ्रकारित्वात्। मर्मानुसारी हृदयाद्यनुसारी। व्यथतेऽङ्गमित्यत्रान्तर्भावितो ण्यर्थः, तेन व्यथयतीत्यर्थः। निद्रां चेत्यत्र हरेदिति संबध्यते। शर्म सुखम्। दुष्प्रबोधोऽश्नुते निद्रामिति निद्रां मरणरूपां प्राप्नोति॥ ८-१३ ॥

विमर्श—आग्नेय विसर्प वात पित्तज होता है। इसे आजकल एरिसिपेलास वेसिकुलोजम (Erysipelas vesiculosum) कहते हैं। सुश्रुत ने इसका वर्णन नहीं किया है। डाक्टर घाणेकर जी के अनुसार इसे सुश्रुत के वातिक विसर्प में समाविष्ट किया जा सकता है।

ग्रन्थिविसर्पं प्राह—

कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा वृद्धरक्तस्य त्वक्सिरास्नायुमांसगम् ॥ १४ ॥
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां सरक्तां तीव्ररुज्ज्वराम् ॥ १५ ॥
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युताम् ॥ १६ ॥
इत्ययं ग्रन्थिवीसर्पः कफमारुतकोपजः । (वा. नि. १३)

(स्वकारण से प्रकुपित) कफ से अवरुद्ध हुआ वायु कफ को खूब फैलाकर अथवा जिस व्यक्ति का रक्त बढ़ा हुआ है उसके त्वचा, सिरा, स्नायु और मांस में रहने वाले रक्त को दूषित कर लम्बी, छोटी, गोल अथवा मोटी और कठोर ग्रन्थियों की माला को उत्पन्न करता है। इन ग्रन्थियों का रंग लाल होता है तथा साथ में पीडा और ज्वर भी रहता है। इन लक्षणों के अतिरिक्त श्वास, खांसी, अतिसार, मुख का सूखना, हिचकी, वमन तथा भ्रम ये लक्षण भी होते हैं। मूढता, विवर्णता, मूर्च्छा, अंगों का टूटना तथा अग्नि की मन्दता इन लक्षणों से युक्त ग्रन्थियों की माला को ग्रन्थि विसर्प कहते हैं। यह कफ और वायु के कोप से उत्पन्न होता है ॥ १४-१६ ॥

ग्रन्थिविसर्पमाह—कफेन रुद्ध इत्यादि। कफेनेति स्वहेतुकुपितेन, पवनः स्वहेतुकुपितः, तेन कफमारुतजत्वमस्योपपन्नं भवति। भित्त्वा तं बहुधा कफमिति कफं विस्तार्य। रक्तं वेति दूषयित्वेत्यनेन वक्ष्यमाणेन संबध्यते। दीर्घाणुवृत्तस्थूलखरात्मनामिति वृत्तं वर्तुलं, स्थूलमुच्छूनं, खरं कठिनं, एवंरूपाणां ग्रन्थीनां मालां करोति, अयं च ग्रन्थिविसर्पः सुश्रुतेऽपचीसंज्ञया पठ्यते ॥ १४-१६ ॥

विमर्श—इसमें शरीर पर अनेक गांठें निकल आती हैं अतः इसे ग्रन्थिविसर्प कहते हैं। इसमें छाले नहीं पड़ते अपितु ग्रन्थि के समान छोटी-छोटी फुन्सियाँ हो जाती हैं। इसे एरिसिपिलास पुसच्युलोजम (Erysipelas Pustulosum) कह सकते हैं। चक्रपाणिदत्त और विजयरक्षितजी का कहना है कि सुश्रुतोक्त अपची ही ग्रन्थि विसर्प है—'अयं च ग्रन्थिविसर्पः सुश्रुतेऽपचीसंज्ञया पठ्यते'। वस्तुतः इन दोनों में नाम के अतिरिक्त कोई समानता नहीं है।

कर्दमविसर्पं लक्षयति—

कफपित्ताज्ज्वरः स्तम्भो निद्रा तन्द्रा शिरोरुजा ॥ १७ ॥
अङ्गावसादविक्षेपौ प्रलेपारोचकभ्रमाः ।
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ॥ १८ ॥
आमोपवेशनं लेपः स्रोतसां स च सर्पति ।

प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक् ॥ १९ ॥
पिडकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः ।
स्निग्धोऽसितो मेचकाभो मलिनः शोथवान् गुरुः ॥ २० ॥
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्यते ।
पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुसिरागणः ॥ २१ ॥
शवगन्धी च वीसर्पः कर्दमाख्यमुशन्ति तम् । (वा. नि. १३)

कफपित्तजन्य विसर्प में ज्वर, अंगों की स्तब्धता, निद्रा, तन्द्रा, शिरःशूल, अंगों में शिथिलता तथा अंगों का इतस्ततः फेंकना, अंगों पर प्रलेप की प्रतीति, अरुचि, भ्रम, मूर्च्छा, अग्निनाश, अस्थियों में टूटने जैसी पीडा, प्यास, इन्द्रियों में भारीपन, आम मल का त्याग, स्रोतों में लेप (अवरोध) होता है। वह विसर्प प्रायः आमाशय में और एकदेश व्यापी होता है तथा पीडा अधिक नहीं होती। अत्यधिक पीले, लाल व धूसर वर्ण की पिडकाओं से यह व्याप्त रहता है। यह चिकना काला, अञ्जन के समान कृष्ण, मैला, सूजनयुक्त, भारी, अन्तःपाक वाला तथा अत्यधिक उष्ण होता है। क्लेदयुक्त होने से छूते ही फट जाता है और मांस के झरने से कीचड़ के समान हो जाता है और स्नायु तथा सिरायें स्पष्ट दिखाई पड़ती हैं। इसमें शव के समान दुर्गन्धि आती है। इस प्रकार के विसर्प को कर्दम विसर्प कहते हैं ॥ १७-२१ ॥

कर्दमविसर्पमाह—कफपित्तादित्यादि। स्तम्भ इति गात्रस्य स्तब्धता, आमोपवेशनमामस्य वर्चसस्त्यजनम्। स च सर्पति प्रायेणामाशयं गृह्णन्नेकदेशमिति कफपित्तयोरामाशयस्थत्वात् प्रायेणामाशये भवन्नेकदेशव्यापी भवतीत्यर्थः। पिडकैरिति पिडकाभिः, मलिन इति मलदिग्धः। गम्भीरपाक इत्यन्तःपाकः, प्राज्योष्मा प्रचुरोष्मा। स्पष्टस्नायुसिरागण इति पूतिमांसगलनेन स्नाय्वादीनां स्पष्टता। कर्दमाख्यमुशन्ति तमिति तं कर्दमसारूप्यात् कर्दमाख्यमिच्छन्ति ॥

विमर्श—यह कफपित्तज विसर्प है। इसमें त्वचा के साथ त्वचा के नीचे की धातुओं में भी गम्भीर पाक होता है जिससे उनके दूषित भाग गल कर गिरने लगते हैं। विकृत स्थान कीचड़ के समान हो जाता है अतः इसे कर्दम कहा जाता है। आजकल इसे सैल्युलो क्यूटेनियस एरिसिपिलास (Cellulo-cutaneous erysipelas or E. gangrinosum) कहते हैं।

क्षतविसर्पं तदुपद्रवं च निरूपयति—

बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ॥२२॥ (वा. नि. १३)
वीसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम् ।
स्फोटैः शोथज्वररुजादाहाढ्यं श्यावशोणितम् ॥ २३ ॥
ज्वरातिसारौ वमथुस्त्वङ्मांसदरणं क्लमः । (सु. नि. १०)
अरोचकाविपाकौ च विसर्पाणामुपद्रवाः ॥ २४ ॥

बाह्य हेतुज क्षत से प्रकुपित वायु रक्त सहित पित्त को प्रेरित करके कुलथी के समान छालों से व्याप्त, सूजन, ज्वर, पीडा तथा जलन से युक्त श्याव या रक्तवर्ण के विसर्प को उत्पन्न करता

हैं। इसमें ज्वर, अतिसार, वमन, त्वचा तथा मांस का फटना, क्लम, अरुचि तथा भोजन का ठीक-ठीक न पचना यह विसर्प के उपद्रव हैं ॥ २२-२४ ॥

क्षतविसर्पमाह—बाह्यहेतोरित्यादि। अयं च पित्तजे विसर्पेऽन्तर्भावनीयः, तेन न संख्याधिक्यम्। तथाच भोजः—'शस्त्रप्रहारैस्तैस्तैस्तु [1]व्याडदन्तनखैरपि। क्षते वाऽप्यथवा भग्ने बहुदोषस्य देहिनः। रक्तं पित्तं च कुपितं व्रणमाशु प्रपद्यते। कुरुतस्ते समेते तु व्रणशोथं सुदारुणम्। आचितं तनुविस्फोटैः कृष्णैः पीतकसन्निभैः। पित्तवीसर्पवल्लिङ्गं तस्य शेषं विनिर्दिशेत्' इति ॥ २२-२४ ॥

विमर्श—किसी शस्त्र के आघात से क्षत हो जाने पर, शस्त्रक्रिया करने पर, बालक का नाडी छेद करने तथा मसूरिका का टीका लगाने आदि कारणों से उत्पन्न क्षत होने पर क्षतज विसर्प हो सकता है। चरक ने क्षतज विसर्प का स्वतन्त्र वर्णन नहीं किया है। आधुनिक विद्वान् सब विसर्पों को क्षतज ही मानते हैं। प्राचीन ग्रन्थों में निज तथा आगन्तुज दोनों भेद माने जाते हैं; क्योंकि कभी-कभी क्षत का इतिहास न मिलने पर भी विसर्प पाया जाता है।

साध्यासाध्यतां प्राह—

सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्वात्मकः क्षतकृतश्च न सिद्धिमेति।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
कृच्छ्राश्च मर्मसु भवन्ति हि सर्व एव ॥ २५ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने विसर्पनिदानं समाप्तम् ॥ ५२ ॥

वातज, पित्तज और कफज विसर्प साध्य होते हैं। सन्निपातज और क्षतज असाध्य होते हैं। पित्तज विसर्प जिसमें रोगी का शरीर अंजन के समान काला हो जाता है वह असाध्य होता है। मर्मस्थानों में होने वाले सभी विसर्प कृच्छ्रसाध्य या असाध्य होते हैं ॥ २५ ॥

साध्यत्वादिकमाह—सिध्यन्तीत्यादि। पित्तात्मकोऽञ्जनवपुरिति अत्यन्तमुद्रिक्तपित्तोऽञ्जनसमवर्णतनुः, अग्निविसर्पाख्यो न साध्य इति व्याख्यानयन्ति। कृच्छ्राश्च मर्मस्विति असाध्यत्वेन कृच्छ्रत्वं बोद्धव्यम्। यदाह। भोजः—'वर्ज्यस्तु क्षतजस्तेषां सन्निपातात्तु यो भवेत्। भिषजा जानता त्याज्याः सर्व एव तु मर्मजाः' इति ॥ २५ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विसर्पनिदानं समाप्तम् ॥ ५२ ॥

अथ विस्फोटनिदानम्

विस्फोटस्य निदानपूर्विकां सम्प्राप्तिं प्राह—

कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च।
तथर्तुदोषेण विपर्ययेण कुप्यन्ति दोषाः पवनादयस्तु ॥ १ ॥
त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च।

---

१. 'व्याल' इति पाठान्तरम्।

घोरान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुरःसरान् ॥ २ ॥

चरपरे खट्टे, तीक्ष्ण, उष्ण, विदाही, रूखे तथा खारे पदार्थों के सेवन से, अजीर्ण, अध्यशन तथा धूप से, ऋतु के दोष (शीत उष्ण आदि के अतियोग) से या ऋतु के विपरीत स्वभाव से वात आदि दोष प्रकुपित हो जाते हैं और वे त्वचा में आश्रित होकर तथा रक्त, मांस और अस्थियों को दूषित करके ज्वरपूर्वक, विविध भयङ्कर विस्फोटों को उत्पन्न करते हैं ॥ १-२ ॥

प्रायेण दोषदूष्यचिकित्सासाम्याद्विस्फोटनिदानमाह—कट्वित्यादि। अजीर्णाध्यशनातपैश्चेति। अजीर्णाशनमपक्वद्रव्यस्याशनं, अध्यशनमजीर्णे भोजनं, अथवा अजीर्णं स्वरूपतो हेतुरध्यशनं च। ऋतुदोषेणेति शीतोष्णादीनामतियोगेन। विपर्ययेणेति ऋतुविपर्ययश्च ऋतुस्वभावस्यान्यथाभावः। एभिर्हेतुभिर्यथासंभवं प्रत्येकं दोषत्रयप्रकोपो बोद्धव्यः। ज्वरपुरःसरानित्यनेन ज्वरस्य पूर्वरूपतां दर्शयति ॥ १-२ ॥

विमर्श—विस्फोट से कुछ लोग चेचक (Small-pox) का ग्रहण करते हैं; क्योंकि उसमें भी विस्फोट होते हैं। किन्तु यह ठीक नहीं; क्योंकि चेचक के अतिरिक्त अन्यत्र भी विस्फोट पाये जाते हैं। इसके अतिरिक्त ये कभी किसी विशिष्ट अङ्ग में और कभी सर्वाङ्ग में भी होते हैं 'क्वचित् सर्वत्र वा देहे'। चेचक सर्वत्र ही होता है। विस्फोट में पूर्वरूप नहीं वर्णित हैं किन्तु चेचक में पूर्वरूप निश्चय मिलते हैं जो मसूरिका के पूर्वरूप से पूर्णतया मिलते हैं। सुश्रुत ने इसका वर्णन क्षुद्र रोगों में किया है। इसके लिये आजकल बुल्लस इरप्सन (Bullous eruption) शब्द का उपयोग होता है। ये कई कारणों से होते हैं। विभिन्न ऋतुओं में शीतोष्णादि सम्पर्क से दुर्बल त्वचा में पूयजनक जीवाणु के उपसर्ग होने पर शरीर के एक देश में या समस्त शरीर में फफोले पड़ जाते हैं। प्रायः इनमें गाढ़ी पूय पड़ जाती है और एक के बाद दूसरे उत्पन्न होते रहते हैं और कभी-कभी पतला स्राव मात्र निकलता है। इसका सर्वोत्कृष्ट उदाहरण स्तवक गोलाणूपसर्ग (Staphylo coccal infection or impetigo contagiosa) है।

विस्फोटस्य स्वरूपमभिधाय वातादिभेदेन तस्य लक्षणानि निरूपयति—

अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः।
क्वचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः ॥ ३ ॥
शिरोरुक्शूलभूयिष्ठं ज्वरस्तृट् पर्वभेदनम्। (सु. नि. १३)
सकृष्णवर्णता चेति वातविस्फोटलक्षणम् ॥ ४ ॥
ज्वरदाहरुजास्रावपाकतृष्णाभिरन्वितम्।
पीतलोहितवर्णं च पित्तविस्फोटलक्षणम् ॥ ५ ॥
छर्द्यरोचकजाड्यानि कण्डूकाठिन्यपाण्डुताः।
अवेदनश्चिरात् पाकी स विस्फोटः कफात्मकः ॥ ६ ॥
वातपित्तकृतो यस्तु कुरुते तीव्रवेदनाम्।
कण्डूस्तैमित्यगुरुभिर्जानीयात् कफवातिकम् ॥ ७ ॥

कण्डूर्दाहो ज्वरश्छर्दिरेतैस्तु कफपैत्तिकः ।

रक्तपित्त के प्रकोप से अग्नि से जले हुए के समान जो ज्वर सहित छाले शरीर के किसी एक भाग या सर्वांग में उत्पन्न होते हैं उन्हें विस्फोट कहते हैं ।

सिर में पीड़ा, शरीर में शूल की अधिकता, ज्वर, प्यास, सन्धियों में भेदनवत् पीड़ा, तथा स्फोटों का काला होना ये वातिक विस्फोट के लक्षण हैं। ज्वर, दाह, पीड़ा, स्राव, पकने की प्रकृति तथा प्यास से युक्त पीले लाल रङ्ग के विस्फोट पैत्तिक कहलाते हैं। कफज विस्फोट में वमन, अरुचि, जड़ता, खुजली, कठोरता तथा पाण्डुता ये लक्षण होते हैं तथा रोगी को प्रायः वेदना नहीं होती और विस्फोट देर में पकता है। वातपित्तजन्य विस्फोट में तीव्र वेदना होती है। खुजली, स्तिमितता (गीले चमड़े से आवृत होने के समान प्रतीति) तथा भारीपन इन लक्षणों से वातकफज स्फोट समझने चाहिये। खुजली, दाह, वमन तथा ज्वर को देखकर पित्त-कफज विस्फोट समझना चाहिये ॥ ३–७ ॥

विस्फोटस्वरूपमाह—अग्निदग्धनिभा इत्यादि। रक्तपित्तजा इति सर्वत्रैव विस्फोटे रक्तपित्तयोरव्यभिचारित्वं, यथा शूले वातस्य; वातानुवन्धोऽप्यत्र बोद्धव्यः। यदाह भोजः—'यदा रक्तं च पित्तं च वातेनानुगतं त्वचि। अग्निदग्धनिभान् स्फोटान् कुरुतः सर्वदेहगान्। सज्वरान् सपरीदाहान् विद्याद्विस्फोटकांस्तु तान्' इति ॥ ३–७ ॥

विमर्श—सभी विस्फोटों की उत्पत्ति में रक्त और पित्त अनिवार्य रूप से रहते हैं। उनके साथ वात का अनुवन्ध भी रहता है। आचार्य भोज ने कहा है—रक्त और पित्त वायु से मिलकर त्वचा पर आग के जलने से उत्पन्न फ़फोलों के समान सारे शरीर में ज्वर और दाह से युक्त स्फोटों को उत्पन्न कर देते हैं उन्हें विस्फोट कहते हैं।

सन्निपातिकविस्फोटलक्षणमाह—

मध्ये निम्नोन्नतोऽन्ते च कठिनोऽल्पप्रपाकवान् ॥ ८ ॥
दाहरागतृषामोहच्छर्दिमूर्च्छारुजाज्वराः ।
प्रलापो वेपथुस्तन्द्रा सोऽसाध्यः स्यात् त्रिदोषजः ॥ ९ ॥

त्रिदोषज विस्फोट मध्य में दवा हुआ, किनारों पर उठा हुआ, कठिन और कम पकने वाला होता है। इसमें जलन, लाली, प्यास, मूढ़ता, वमन, मूर्च्छा, पीड़ा, ज्वर, प्रलाप, कम्पन तथा तन्द्रा ये लक्षण होते हैं। इसे असाध्य समझना चाहिये ॥ ८–९ ॥

सान्निपातिकलक्षणमाह—मध्य इत्यादि। मध्ये निम्नोन्नतोऽन्ते चेति मध्ये निम्नोऽन्ते चोन्नत इत्यर्थः। निम्नोन्नत इति प्रयोगोऽसिद्धस्यानित्यत्वेन। एवं संपूर्णलक्षणो यस्त्रि-दोषजः सोऽसाध्यः ॥ ८–९ ॥

रक्तजविस्फोटलक्षणं निरूपयति—

रक्ता रक्तसमुत्थाना गुञ्जाविद्रुमसन्निभाः ।
वेदितव्यास्तु रक्तेन पैत्तिकेन च हेतुना ॥ १० ॥
न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि ।
एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ॥

सर्वदोषोत्थितो घोरस्त्वसाध्यो भूर्युपद्रवः ॥ ११ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने विस्फोटनिदानं समाप्तम् ॥ ५३ ॥

रक्तजन्य विस्फोट गुञ्जा या प्रवाल के समान रक्तवर्ण के होते हैं। वे पित्त प्रकोपक कारणों से दूषित रक्त से उत्पन्न होते हैं। वे सैकड़ों सिद्ध योगों से भी साध्य नहीं होते।

एकदोषज विस्फोट साध्य, द्विदोषज याप्य तथा अनेक उपद्रवों से युक्त अतिकष्टप्रद त्रिदोषज विस्फोट असाध्य होता है (कुछ लोग 'रक्तसमुत्थानाः' का अर्थ वमनादि के साथ रक्तस्राव होना करते हैं। यह प्रत्यक्ष संगत भी है) ॥ १०-११ ॥

रक्तजलक्षणमाह—रक्ता इत्यादि। रक्त समुत्थाना इति लक्ष्यपदं, वेदितव्यास्तु रक्तेनेति लक्षणपदं, यथा अश्मरीहेतु तत्पूर्वमिति; अयमर्थः—रक्तसमुत्थानाश्च विस्फोटा भवन्ति ते च कथं विज्ञेया इत्यत उक्तं वेदितव्यास्तु रक्तेनेति; अथवा रक्तसमुत्थाना इति उक्तं समुत्थापयन्तीति निरुच्य रक्तच्छर्दनमभिमतमाचार्यस्य, वेदितव्यास्तु रक्तेनेति पदस्य कारणद्योतकस्याव्यवस्थानात्। घोरोऽत्यन्तदुःखदः। भूर्युपद्रव इति अत्र विसर्पोक्त एवोपद्रवो ज्ञेयः ॥ १०-११ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विस्फोटनिदानं समाप्तम् ॥ ५३ ॥

अथ मसूरिकानिदानम्

मसूरिकाया निदानं पूर्वरूपञ्चाह—

कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः ।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥ १ ॥
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः ।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः ॥ २ ॥
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः ।
तासां पूर्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः ॥ ३ ॥
त्वचि शोथः सवैवर्ण्यो नेत्ररागश्च जायते ।

निदान—चरपटे, खट्टे, नमकीन और क्षार के सेवन से, विरुद्ध भोजन और अध्यशन करने से, दुष्ट अन्न, मटर, शाक, गन्दे जल व वायु से तथा शनैश्चर आदि क्रूर ग्रहों के प्रकोप से देह भर में प्रकुपित हुए दोष दूषित रक्त के साथ मिलकर जो मसूर की आकृति के समान पिडकाओं को सारे शरीर में उत्पन्न करते हैं उन्हें मसूरिका कहते हैं।

पूर्वरूप—ज्वर, खुजली, अंगों का टूटना, काम में मन न लगना, चक्कर आना, त्वचा में सूजन व विवर्णता तथा नेत्रों का लाल होना ये मसूरिका के पूर्वरूप हैं ॥ १-३ ॥

विस्फोटप्रभेदत्वात् प्रायेण तुल्यनिदानत्वाच्च मसूरिकानिदानम्। तस्य निदानपूर्विकां संप्राप्तिमाह—कट्वम्लेत्यादि। विरुद्धाध्यशनाशनैरिति विरुद्धैरन्नैरध्यशनैश्च, 'विरुद्धाध्यशनेन तु' इति पाठो वा। दुष्टनिष्पावशाकाद्यैरिति दुष्टं व्यापन्नमन्नं निष्पावः शिम्बिबीजं, आद्य-

शब्दान्मध्वालुकादिग्रहणम् । प्रदुष्टपवनोदकैरिति विषकुसुमादिसंस्पर्शात् प्रदुष्टः पवनस्तथोदकं च तैः । क्रूरग्रहेक्षणाच्चेति शनैश्चरादयो देशक्षोभकराः क्रूरग्रहास्तेषामीक्षणात् । दुष्टरक्तेन सङ्गता इत्यनेन रक्तस्य कट्वम्लादिभिर्हेतुभिर्विशेषेण कोपं दर्शयति । अत एवोक्तं तन्त्रान्तरे-'पित्तं शोणितसंसृष्टं यदा दूषयति त्वचम् । तदा करोति पिडकाः सर्वगात्रेषु देहिनाम् ॥ मसूरमुद्गमाषाणां तुल्याः कोलोपमा अपि । मसूरिकास्तु ता ज्ञेयाः पित्तरक्ताधिका बुधैः' इति ॥ १-३ ॥

विमर्श—आयुर्वेदशास्त्र से ज्योतिष भी सम्बन्धित है अतः क्रूरग्रह की दृष्टि का भी विचार किया गया है । जब शनि देश या रोगी के चौथे, आठवें या बारहवें घर में जाता है तब यह रोग होते देखा गया है । ऐसा कुछ ज्योतिषविशारदों का मत है[1] ।

दुष्ट रक्त से तात्पर्य कटु अम्ल एवं लवणादिक पदार्थों से प्रकुपित रक्त से है । इसीलिए अन्य तन्त्रकारों ने भी कहा है कि—रक्त से सम्बन्धित हुआ पित्त जब त्वचा को दूषित कर देता है तो सम्पूर्ण शरीर पर पिडकाएँ निकल आती हैं । ये पिडकाएँ आकृति में मसूर, मूंग, उड़द या बदरी फल के समान होती हैं इन्हीं को मसूरिका कहते हैं । इनमें पित्त और रक्त की अधिकता होती है । (मूलपाठ मधुकोष में देखें ।)

अंग्रेजी में इसे बालों का गिरना (Falling of hairs) या अलोपेशिया (Alopecia) कहते हैं। वाग्भट के अनुसार इन्द्रलुप्त में बाल एकदम गिर जाते हैं और खालित्य में धीरे-धीरे 'खलतेरपि जन्मैवं शातनं तत्र तु क्रमात्'। रुह्या के लिये सुश्रुत रुज्या कहते हैं। आचार्य कार्तिक ने इन्द्रलुप्त-खालित्य और रुह्या तीनों में भेद बतलाया है—इन्द्रलुप्तं श्मश्रुणि भवति, खालित्यं शिरस्येव, रुह्या च सर्वदेहे' इन्द्रलुप्त दाढ़ी में, खालित्य सिर में और रुह्या सर्वदेह में होता है। रुह्या को अलोपेसिया यूनिवर्सलिस (Alopecia universalis) और इन्द्रलुप्त को (Alopecia areata) तथा खालित्य को (Simple Alopecia) कहते हैं।

दारुणलक्षणमाह—

दारुणा कण्डुरा रूक्षा केशभूमिः प्रपाट्यते।
कफमारुतकोपेन विद्याद्दारुणकं तु तम्॥ ३०॥ (सु. नि. १३)

कफ और वायु के प्रकोप से जब बालों का स्थान कठिन, खुजलीयुक्त तथा रूखा होकर दरारं युक्त हो जाता है तो उसे दारुणक कहते हैं॥ ३०॥

दारुणलक्षणमाह—दारुणेत्यादि। दारुणेति कठिना। कफमारुतकोपादिति यद्यप्युक्तं तथापि पित्तरक्तानुबन्धोऽप्यत्र द्रष्टव्यः। तथाहि विदेहः-'तदत्र पटलाभासं सरुजस्कं शिरस्त्वचि। परुषं जायते जन्तोस्तस्य रूपं विशेषतः॥ तोदैः समन्वितं वातात् सकण्डूगौरवं कफात्। सपिपासं सदाहार्तिरागं पित्तास्रजं तथा' इति। अत्र वचने सदाहरागं च पित्तात्, सार्तिं तु रक्तात्, अर्तिर्हि रक्तजाऽपि भवति। यदुक्तम् ,-'रक्तं हि व्यम्लतां याति तच्चेन्नास्ति न चास्ति रुक्' इति। दारुणं रूक्खीति लोके॥ ३०॥

विमर्श—यह रोग सिर में होता है और इसमें पित्त और रक्त का अनुबन्ध भी रहता है। अतएव विदेह ने कहा हैं—

यदत्र पटलाभासं सरुजस्कं शिरस्त्वचि। परुषं जायते जन्तोस्तस्य रूपं विशेषतः॥
तोदैः समन्वितं वातात् सकण्डूगौरवं कफात्। सपिपासं सदाहार्तिरागं पित्तास्रजं तथा॥

वाग्भट ने इसका वर्णन शिरोरोगों में किया है । लोक-भाषा में इसे 'रूसी' (Dandruff) भी कहते हैं ।

अरूंषिकालक्षणमाह—

अरूंषि बहुवक्त्राणि बहुक्लेदीनि मूर्ध्नि तु ।
कफासृक्क्रिमिकोपेन नृणां विद्यादरूंषिकाम् ॥३१॥ (सु. नि. १३)

कफ, रक्त और कृमियों के प्रकोप से मनुष्यों के सिर में अनेक मुखवाले, स्रावयुक्त अत्यधिक गीले रहने वाले व्रण बन जाते हैं उन्हें अरूंषिका कहते हैं ॥ ३१ ॥

अरूंपिकामाह—अरूंषीत्यादिना । अरूंपीति व्रणाः ॥ ३१ ॥

विमर्श—लोकभाषा में इसे 'चाईचुँआ' कहते हैं । अंग्रेजी में इस अवस्था को सिवोरिया पिटिरियासिस कैपिटिस (Seborrhoea or Pityriasis capitis) कहते हैं ।

पलितरोगमाह—

क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः ।
पित्तं च केशान् पचति पलितं तेन जायते ॥३२॥ (सु. नि. १३)

क्रोध, शोक और श्रम से उत्पन्न शरीर की गरमी और पित्त सिर में पहुँच कर बालों को पका देते हैं जिससे पलित रोग (बालों का पकना) उत्पन्न होता है ॥ ३२ ॥

पलितमाह—क्रोधेत्यादि । शरीरोष्मेति देहाग्निः । पित्तं चेति पित्तमपि शिरोगतं पलित-हेतुः । ननु, पित्तमेवाग्निः, तत्र तत्र पित्तस्य पाचकत्वेनाभिधानात्; यदुक्तवान् सुश्रुतः—'न पाकः पित्तादृते' (सु. सू. १७) इति, तथा—'पित्ते तस्मिन् पाचकोऽग्निरिति संज्ञा' (सु. सू. २१) इति, तथा स एव—'न खलु पित्तव्यतिरेकेणान्योऽग्निरुपलभ्यते, आग्नेये तु पित्ते दहनपचनदारणादिष्वभिवर्तमानेऽग्निवदुपचारः क्रियते अन्तरग्निरिति, क्षीणे ह्यग्नि-गुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगादागमाच्च पश्यामो न खलु पित्तव्यति-रेकेणान्योऽग्निः' (सु. सू. २१) इति चरकाचार्योऽप्याह—'दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम् । प्रभाप्रसादौ मेधा च पित्तकर्माविकारजम्' (च. सू. १८) इति; पाकस्यान्य-थानुपपत्त्या चाग्नेरङ्गीकारः; किंच मन्देऽग्नौ पित्तकरमरिचादिद्रव्योपयोगादग्नेर्वृद्धिः, पित्त-प्रतिकूलशीतमधुरादिद्रव्योपयोगाच्चोपशम उपलभ्यते; यदि हि पित्ताद्भिन्नोऽग्निः स्यात्तदा पित्तस्य वृद्धिह्रासानुविधानमस्यानुपपन्नं स्यात्, न हि तुहिनकरमण्डले हिमभाज्यहिमोप-लम्भः, अतुहिनमण्डले अहिमभाजि भगवति भास्करेऽभिमतो हिमोपलम्भः यद्यतो भिन्नं तत्ततो भेदेनोपलभ्यते, तथा सागरादजगरः, न चैवं पित्तादग्निः, तत्कुतः पित्तादग्नेः पृथगु-पादानमिति ? अत्र प्रत्यभिधीयते—न तावदन्तरग्निः पित्तादभिन्नः भेदसाधकप्रमाणस्य भूयः सद्भावात्; तथाह्यभेदे 'समदोपः समाग्निश्च' (सु. सू. १५) इत्यत्र, 'समप्रकोपौ दोषाणां सर्वेषामग्निसंश्रयौ' इत्यत्र च दोषपदलब्धत्वादग्नेः पृथगुपादानसङ्गतः तीक्ष्णः पित्तेन चेति स्वात्मनि क्रियाविरोधादसङ्गतं; यत्पुनः 'न खलु पित्तव्यतिरेकेणान्योऽग्निः' इत्याद्युक्तिस्तद्भेदमेव साधयति, उपचाराभिधानात्, न ह्यभेदे उपचारः संभवति । यदप्यग्नेः पित्तवृद्धिह्रासानुविधानमभिहितं तदप्रयोजकं, भेदेऽपि समानत्वेन तदुपपत्तेः । यथा कफवृद्धिह्रासकरसौम्याग्नेयद्रव्याभ्यां शुक्रस्य वृद्धिह्रासौ दृष्टौ, न च कफशुक्रयोरैक्यं; किंच घृतं पित्तशमनमग्नेश्च दीपनं पित्तस्य सञ्चयादौ नाग्नेर्वृद्धिः, पेयादिकं चाग्निकरं न

पित्तकृत्; ततश्च पित्ताद्विलक्षणोऽग्निः। च द्रवतेजःसमुदायात्मकस्य पित्तस्य तेजो भागो न बहिरनलवद्दग्धसमाङ्गाराकारः; समुदायतश्च समुदायी अन्य एव करचरणादिभ्य इव शरीरं; अत्यन्तभेदेन चाग्रहणं तस्य नित्यसंश्लेषणशालित्वात्। पित्तस्य तेजोंऽश एव पाच (व) कः, तदाह भोजः—'दृढमुष्णोचितं ह्येतत् पित्तोष्मा पचतीति यत्। मूर्च्छितो रसवीर्याभ्यां समानव्यानसंहितः'—इत्यारभ्य, 'तस्मात् तेजोमयं पित्तं पित्तोष्मा यः स पक्तिमान्। स कायाग्निः स कायोष्मा स पक्ता स च जीवनः'—इति। पित्तैकदेशत्वात्तेजसि पित्तोपचार-माश्रित्य सुश्रुतेनोक्तम्—'न पाकः पित्तादृते'—इति, तथा—'न खलु पित्तव्यतिरेकेणान्योऽग्निः'—इति। एवमन्यदप्यग्नेरभेदसाधकं वचनं समाधेयम्। 'ननु, यदि तीक्ष्णः पित्तेनेत्युक्तम्, तत् कथं पित्तेनैवाग्नेः प्रशमनमभिधीयते। यदुक्तं चरके—'कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्बणम्। आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम्' (च. चि. १५) इति उच्यते, यदा कटुकेन रूक्षोष्णेन पित्तं वृद्धं भवति, तदा तेजोभागरूपायाः पित्तस्यावस्थाया उल्बणत्वा-त्तीक्ष्णः पित्तेनेति सङ्गतं; यदाऽम्ललवणेन स्निग्धोष्णेन कफानुगमनभाजा वृद्धं पित्तं तदा पित्तस्य द्रवावस्थाया उद्रिक्तत्वान्निर्वापणमग्नेरुक्तमिति। जतुकर्णेऽप्युक्तं—'कुपितेन वायुना दीपस्येवाग्नेर्निर्वापणं, पित्तेनोष्णजलवत् कफेनाम्बुवत्' इति। ततश्च युक्तमग्नेः पृथगुपादा-नमिति। अग्निश्च पित्तगतस्तेन क्रोधकृतो भवत्येव, क्रोधेन पित्तकोपात्; शोक-श्रमाभ्यां तु जनितवातेन शरीरोष्मणोऽपि विक्षेपणाच्छिरोगतत्वं तेनानिलोऽपि पित्तं च साक्षादुपात्तं, चकारेण श्लेष्माऽपि केशशुक्लताकरो गृह्यते। एतेन दोषत्रयसहितशरीरोष्मा पलितहेतुरिति वाक्यार्थश्चरकोक्तार्थेन सह संवादी भवति यदाह—'तेजोऽनिलाद्यैः सह केश-भूमिं दग्ध्वा तु कुर्यात् खलितिं नरस्य। किंचित्तु दग्ध्वा पलितानि कुर्याद्धरिप्रभत्वं च शिरोरुहाणाम्' (च. चु. २) इति। एतच्चाकालजपलितव्यापकं लक्षणम्। कालजे तु क्रोधा-दिग्रहणं कारणान्तरोपलक्षणं, तेन वयःपरिणामकृतश्चोष्मा दोषत्रययुक्तः कालजपलितहेतुः। अन्यथा कालजपलितस्य संग्रहो न स्यात्। किंवा कालजं स्वाभाविकत्वादेव नोच्यते। अन्ये तु पित्तगतश्चेच्छरीरोष्मा तत् किमुभयोरुपादानेत्यभिधाय शरीरोष्मा पित्तं चेति कर्तृद्वयमाचक्षते; तेन नात्रैकस्मिन् विषये समुच्चयः, किं तर्हि विषयभेदात्। कर्तृद्वयं—तत्र शरीरोष्मा वैकृतं पलितं करोति, पित्तं च प्राकृतं पित्तप्रकृतेः पलितं करोति। यदुक्तं—'पित्तप्रकृतिरकालजवलीपलितयुक्तश्च भवति' इति। एवं स्वाभाविकजरापलितमपि पित्ते-नैवास्य हेतोः क्लृप्तत्वात्। न चोष्मकृतत्वेन पलितस्यादोषजत्वप्रसङ्गः, ऊष्मणः पित्तधर्म-त्वेन पित्तेऽन्तर्भावात्॥ ३२॥

विमर्श—पलित रोग के देहोष्मा (अग्नि) और पित्त दोनों ही कारण बताए गए हैं। यहाँ सन्देह होता है कि पित्त और अग्नि दोनों ही एक हैं क्योंकि 'बिना पित्त के पाक नहीं होता' 'पित्त को ही पाचकाग्नि कहते हैं।' आदि वचनों के अतिरिक्त सुश्रुत ने सुस्पष्ट शब्दों में कहा है 'न खलुपित्तव्यतिरेकेणान्योऽग्निरुपलभ्यते' इत्यादि (सु. सू. २१)। तथा मन्दाग्नि में पित्त-वर्धक द्रव्यों के प्रयोग से अग्निदीप्ति और पित्तशामक मधुरादि द्रव्यों के प्रयोग से अग्नि की मन्दता होती है। अतः पित्त के अनुसार ह्रास और वृद्धि होने से प्रमाणित है कि अग्नि और पित्त भिन्न-भिन्न नहीं हैं। फिर दोनों का यहाँ पृथक्-पृथक् उल्लेख क्यों किया गया है?

इसका उत्तर यह है कि दोनों में भेद है अर्थात् अग्नि और पित्त दोनों एक ही नहीं हैं। दोनों में भेद होने के भी अनेक प्रमाण हैं। जैसे—'समदोषः समाग्निश्च' आदि वचनों में दोष से अतिरिक्त अग्नि का भी उल्लेख है जो कि दोनों में अभेद होने पर असंगत है। उसी प्रकार पित्त से अग्नि का तीक्ष्ण होना भी स्वात्मनि क्रियाविरोध दोष के कारण असङ्गत है। 'न खलु'

पित्तव्यतिरेकेणान्योऽग्निः' आदि वचन औपचारिक ही हैं अर्थात् सादृश्यपरक हैं और सादृश्य भिन्न-भिन्न पदार्थों में ही किया जाता है अभिन्न में नहीं। पित्तवर्धक या शामक द्रव्यों के प्रयोग से अग्नि की वृद्धि या ह्रास भी पुष्ट प्रमाण नहीं है क्योंकि इसके अनेक अपवाद मिलते हैं। यथा घृत पित्तशामक होते हुए भी अग्निवर्धक होता है; पेयादि द्रव्य अग्निवर्धक होते हुए भी पित्तवर्धक नहीं होते एवं शरीर में पित्तसञ्चय होने पर अग्नि की वृद्धि नहीं होती अतः अग्नि और पित्त दोनों भिन्न हैं एक नहीं। जैसे—कफवर्धक द्रव्यों से शुक्र की वृद्धि और कफनाशक द्रव्यों से शुक्र-ह्रास होता है किन्तु कफ और शुक्र दोनों भिन्न ही हैं एक नहीं। उसी प्रकार पित्त और अग्नि एक ही नहीं हैं। पित्त द्रव (जल) और तेजोमय होता है उसका तेजोंश ही अग्नि है और सूक्ष्म रूप में रहती है अतः वह पित्त का एक अवयव मात्र है और वह सदैव सूक्ष्म ही रहती है। अतएव सुश्रुत ने ही कहा है कि—**'जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते।** (सु. सू. १५) दोनों में अभेद-साधक वचनों का तात्पर्य 'अरुन्धतीदर्शन'न्यायेन शिष्यों की प्रवृत्ति के लिए ही है तथा नित्य सम्बन्ध के कारण और पित्त के दहन पाचनादि गुण उसमें निहित अग्नि के कारण ही होने से पित्त को अग्नि या अग्नि को पित्त भी कह दिया जाता है। इसी का समर्थन भोज आदि के वचनों से भी होता है। **'तस्मात् तेजोमयं पित्तं पित्तोष्मा यः स पक्तिमान्। स कायाग्निः स कायोष्मा स च पक्ता स जीवनः'।**

पित्त से अग्नि का तीक्ष्ण होना बताया गया है (और पित्त में अग्नि होने से वह ठीक भी प्रतीत होता है) किन्तु वृद्ध पित्त को भी अग्निमांद्यका (तीक्ष्णाग्नि को भी अग्निमांद्य का एक भेद मानते हैं) कारण चरक ने बताया है यह कैसे सम्भव है? उसका उत्तर यह है कि जब कटुरस और रूक्षोष्ण द्रव्यों से पित्त की वृद्धि होती है तो उसमें तेजोभाग की अधिकता होने से अग्नि की वृद्धि ही होती है किन्तु जब स्निग्धोष्ण द्रव्यों से पित्त की वृद्धि होती है तो उसमें द्रव (जलीय) भाग की अधिकता रहती है और वह उसी प्रकार अग्नि को मन्द कर देता है जैसे गर्म पानी आग को बुझा देता है।

बालों के सफेद होने को पलित कहते हैं। इसमें पित्त की प्रधानता रहती है। क्रोध से पित्त और शोक तथा श्रम से वायु प्रकुपित होती है। इस प्रकार इसमें वायु का प्रकोप भी कारण है। केशों की सफेदी के लिये कफ भी कारण है अत एव चरक कहते हैं—

तेजोऽनिलाद्यैः सह केशभूमिं दग्ध्वा तु कुर्यात् खलितिं नरस्य।
किंचित्तु दग्ध्वा पलितानि कुर्याद्धरिप्रभत्वं च शिरोरुहाणाम्॥

यह अकालज पलित का लक्षण है। इसका कारण क्रोध, शोक और भय है। इसे आजकल प्रिमेच्योर ग्रे हेयर (Premature grey hair or canities) कहते हैं। वृद्धावस्था में होनेवाले कालज पलित का कारण आयु के परिणाम से उत्पन्न शरीर की ऊष्मा होती है। पूर्वोक्त कारणों से प्रेरित होकर उत्पन्न वायु के द्वारा रञ्जक द्रव्यों का आवृत हो जाना ही सम्भवतः पालित्य का कारण होता है। This is a senile change which may occur prematurely. But occassionally sudden whitening of the hairs occurs after fright, intense emotion or in consequence of neuralgia. It is probably due to the development of air bubbles, which conceal the Pigments (F. Taylor.)

युवानपिडकां प्राह—

शाल्मलीकण्टकप्रख्याः कफमारुतरक्तजाः।

१. कोपजाः इति क.।

युवानपिडका यूनां विज्ञेया मुखदूषिकाः ॥ ३३ ॥ (सु. नि. १३)

सेमल के काँटों के समान कफ, वायु और रक्त से जवानों में (चेहरे पर) होनेवाली पिडकायें युवानपिडका या मुखदूषिका कहलाती हैं ॥ ३३ ॥

युवानपिडकालक्षणमाह—शाल्मलीत्यादि। युवानपिडका लोके 'वरण्डका' उच्यते यूनामाननपिडका युवानपिडका, पृषोदरादित्वान्नकारलोपः; एषा च यूनामेव, मुख एव, स्वभावात् ॥ ३३ ॥

विमर्श— 'यूनामाननपिडका' यह विग्रह मधुकोषकार ने लिखा है और न का लोप होने से युव (न्) + आन (न) + पिडका युवानपिडका सिद्ध होता है।

आम बोलचाल में इसे 'मुहासा' कहते हैं। त्वचागत मेदःपिण्डों का मुख बन्द हो जाने से इनकी उत्पत्ति होती है। मुख की त्वचा में इनकी अधिकता रहती है अतः वहाँ ये अधिक होती हैं। इनकी उत्पत्ति से मुख बहुत भद्दा हो जाता है अतः इन्हें 'मुखदूषिका' भी कहते हैं। जवानी में होने से 'युवानपिडका' कहा जाता है। यहाँ मुख की पिडकाओं का ही वर्णन है। अंग्रेजी में इसे एक्नी वल्गेरिस (Acne vulgaris) कहते हैं। एक्नी नामक जीवाणु (Acne Bacillus) के उपसर्ग से इनमें पाक होता है।

पद्मिनीकण्टकं निरूपयति—

कण्टकैराचितं वृत्तं मण्डलं पाण्डुकण्डुरम्। (सु. नि. १३)
पद्मिनीकण्टकप्रख्यैस्तदाख्यं कफवातजम् ॥ ३४ ॥

कमलिनी के काँटों के सदृश काँटों से व्याप्त, गोल, पाण्डुवर्ण के और खुजली युक्त वातकफजन्य मण्डल को पद्मिनीकण्टक कहते हैं ॥ ३४ ॥

पद्मिनीकण्टकमाह—कण्टकैरित्यादि। तदाख्यमिति पद्मिनीकण्टकाख्यम् ॥ ३४ ॥

विमर्श—यह त्वचा पर होने वाला अर्बुद है इसमें उपत्वचा के अंकुरों की वृद्धि होती है। अतः इसे त्वचा का पैपिलोमा (Papilloma of the skin) कहते हैं।

जतुमणिं प्राह—

सममुत्सन्नमरुजं मण्डलं कफरक्तजम्।
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्तु सः ॥३५॥ (सु. नि. १३)

सपाट या उन्नत, पीडारहित कफरक्तज मण्डल को जतुमणि कहते हैं। कुछ आचार्यों का मत है कि यह जन्मजात (शुभाशुभसूचक) लक्षण है ॥ ३५ ॥

जतुमणिमाह—सममित्यादि। समं मसृणम्। उत्सन्नमुद्गतम्। अयं 'जटुल'[1] इति लोके प्रसिद्धः। कफरक्तजमिति प्राधान्येनोक्तम्, तेन चरकोक्तं त्रिदोषजत्वमप्यस्योपपन्नं भवति। यदुक्तं तेन–'कृष्णः स्निग्धो जतुमणिर्ज्ञेयो वातोत्तरैस्त्रिभिः। अरुजं त्वपरै रुक्तं लक्ष्मेत्याहुर्भिषग्वराः'–इति। सहजं लक्ष्म चैकेषामिति एकेषामाचार्याणां मतेन सहजं लक्ष्म लक्षणं स्त्रीपुंसयोरङ्गभेदेन शुभाशुभफलप्रदं भवति। सहजं शरीरेण सह जातं जन्मकालप्रवृत्तमित्यर्थः ॥ ३५ ॥

विमर्श—कफ और रक्त इसमें प्रधानतः कारण होते हैं। वैसे तो चरक ने इसे दोषत्रयजनित माना है। लोक-भाषा में इसे 'जटुल' या 'लच्छन' कहते हैं। अंग्रेजी में (Congenital mole)

---

१. बहुल इति ख.।

कहते हैं। इसकी उत्पत्ति किसी एक शरीर-देश में संचित अस्वाभाविक रंग द्रव्यों के कारण होती है।

मषकलक्षणमाह—

अवेदनं स्थिरं चैव यस्मिन् गात्रे प्रदृश्यते।
माषवत्कृष्णमुत्सन्नमनिलान्मषकं तु तत् ॥ ३६ ॥ (सु.नि.१३)

शरीर पर जो पीडारहित, स्थिर उड़द के समान काला और उन्नत चिह्न दिखाई देता है उसे मषक कहते हैं। यह वातज होता है ॥ ३६ ॥

मषकलिङ्गमाह—अवेदनमित्यादि। स्थिरं कठिनमिति गयदासः, अचलमिति युक्तम् भोजे मृद्विति पाठात्। मषकमादिशेदिति माषशब्दात् 'इवे प्रतिकृतौ' इति कन्, नैरुक्त्येन च विधिना ह्रस्वत्वम्। अत्र चकारेण कफमेदसी समुच्चीयेते। तथा च भोजः-'वातेरिते त्वचि यदा दूष्येते कफमेदसी। श्लक्ष्णं मृदु सवर्णं च कुरुतो मषकं वदेत्' इति ॥ ३६ ॥

विमर्श—भोज ने मषक को वात-प्रेरित कफ और मेदोदुष्टिजनित माना है। अंग्रेजी में इसे उत्सन्न मोल (Elevated mole) कहते हैं। इसमें रंजक द्रव्यों के साथ कुछ सौत्रिक तन्तु भी संचित होते हैं।

तिलकालकलक्षणं निरूपयति—

कृष्णानि तिलमात्राणि नीरुजानि समानि च।
वातपित्तकफोच्छोषात्तान् विद्यात्तिलकालकान् ॥३७॥ (सु. नि. १३)

वात और पित्त के द्वारा कफ के सूख जाने से (त्वचा में) काले रंग के तिल के बराबर पीडारहित सम दिखाई देने वाले चिह्न तिलकालक कहलाते हैं ॥ ३७ ॥

तिलकालकलक्षणमाह—कृष्णानीत्यादि। 'वातपित्तकफोच्छोषात्' इति पाठे वातपित्ताभ्यां हेतुभ्यां कफस्योच्छोषः शोषणं तस्मात्। अन्ये चरकं दृष्ट्वा 'वातपित्तासृगुच्छोषात्' इति पठन्ति। तथा च चरकः-'यस्य पित्तं प्रकुपितं शोणितं प्राप्य शुष्यति। तिलका विप्लवा व्यङ्गा नीलिका चास्य जायते' (च. सू. १८) इति; अस्मिन् वचने वातोऽप्यवगन्तव्यः, तेनापि शोषस्य क्रियमाणत्वात्। अन्येऽपि तन्त्रान्तरं दृष्ट्वा 'वातपित्तकफोत्सेकात्' इति पठन्ति। उत्सेकादित्युद्रेकात्। तथाहि तन्त्रान्तरं-'मारुतः पित्तमादाय कफरक्तसमाश्रितः। चिनोति तिलमात्राणि त्वचि ते तिलकालकाः' इति; किंत्वस्मिन्नपि तन्त्रे कफरक्तसमाश्रित इत्यनेन कफरक्तयोराश्रितत्वात्तेन पित्तसहितेनोच्छोषादेव तिलकालके कार्ष्ण्यस्य संभवोऽवगम्यते, ततश्च 'वातपित्तकफोच्छोषात्'[1] इति पाठो युज्यते। 'वातपित्तरसोद्रेकात्' इति पाठान्तरम् ॥ ३७ ॥

विमर्श—वात और पित्त के द्वारा कफ के सूख जाने से ये धब्बे बनते हैं। चरक इसमें रक्त में पित्त का सूखना मानते हैं 'यस्य पित्तं प्रकुपितं शोणितं प्राप्य शुष्यति। तिलका विप्लवा व्यङ्गा नीलिका चास्य जायते ॥ सुश्रुत वात, पित्त और कफ के प्रकोप से इसकी उत्पत्ति मानते हैं। तन्त्रान्तर में भी इस प्रकार के वचन मिलते हैं—

मारुतः पित्तमादाय कफरक्तसमाश्रितः। चिनोति तिलमात्राणि त्वचि ते तिलकालकाः ॥

यह त्वचा का रोग है। इसमें त्वचा में मेलानिन (Melanin) नामक एक पदार्थ जम जाता है। जमी हुई वस्तु को मोल (Mole) कहते हैं। इसके उन्नत (Elevated) और अनुन्नत

१. 'वातपित्तलवोच्छेदात्' इति क.।

(Non-elevated) दो भेद हैं। सम या अनुन्नत को तिल या तिलकालक (Non-elevated mole) और उन्नत को मसा या मषक (Elevated mole) कहते हैं। जब इनमें से कोई जन्मजात होता है तो उसे जतुमणि कहते हैं।

न्यच्छलक्षणमाह—

महद्वा यदि वा चाल्पं श्यावं वा यदि वाऽसितम्।
नीरुजं मण्डलं गात्रे न्यच्छमित्यभिधीयते ॥ ३८ ॥ (सु. नि. १३)

शरीर में बड़े या छोटे, श्याव या कृष्ण वर्ण के पीडारहित मण्डल को न्यच्छ कहते हैं ॥३८॥

न्यच्छलिङ्गमाह—महद्वेत्यादि। असितं कृष्णम्। 'नीरुजं मण्डलम्' इत्यस्य स्थाने 'सहजं मण्डलम्' इति केचित् पठन्ति, तेन जन्मकालप्रवृत्तं न्यच्छमिच्छन्ति, अत एव न्यच्छस्य पर्याये लाञ्छनमिति तैः पठ्यते। यथा—'न्यच्छं लाञ्छनमुच्यते' इति। लाञ्छनं लक्षणम्। अत्र भोजवचनात् पित्तरक्तान्वितो वायुः कारणम्। यदाह—'रक्तपित्तान्वितो वायुस्त्वक्प्रदेशाश्रितो यदा। जनयेन्मण्डलं कृष्णं श्यावं वा न्यच्छमादिशेत्' इति। अत्र श्यावत्वपक्षे मुखेतरदेश एव संभवेन बहुलत्वेन व्यङ्गाद्भेदोऽवगन्तव्यः ॥ ३८ ॥

विमर्श—इसे लोकभाषा में झाँई कहते हैं। वाग्भट इसे लाञ्छन भी कहते हैं। सुश्रुत ने इसे सहज माना है। पित्त, रक्त और वायु इसकी उत्पत्ति में कारण हैं यह आचार्य भोज के वचन से स्पष्ट है—

रक्तपित्तान्वितो वायुस्त्वक्प्रदेशाश्रितो यदा। जनयेन्मण्डलं कृष्णं श्यावं वा न्यच्छमादिशेत्।

श्लोक ४० का विमर्श भी देखें।

व्यङ्गं निरूपयति—

क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः।
मुखमागत्य सहसा मण्डलं विसृजत्यतः ॥ ३९ ॥
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत्। (सु. नि. १३)

क्रोध तथा परिश्रम से प्रकुपित हुआ वायु पित्त के साथ मुख पर आकर एकाएक वहाँ पीड़ारहित, छोटा और श्यामवर्ण का मण्डल बना देता है—उसे व्यङ्ग कहते हैं ॥ ३९ ॥

व्यङ्गलिङ्गमाह—क्रोधायासेत्यादि। श्यावमिति शुक्लानुविद्धकृष्णवर्णम्। अस्य 'छयाचक' इति 'मेछेता' इति च लोके ख्यातिः ॥ ३९ ॥

नीलिकालक्षणमाह—

कृष्णमेवंगुणं गात्रे मुखे वा नीलिकां विदुः ॥४०॥ (सु. नि. १३)

उपर्युक्त (व्यङ्ग के) लक्षणों से युक्त मुख अथवा शरीर के अन्य भाग में होने वाले काले वर्ण के धब्बों को नीलिका कहते हैं। ॥ ४० ॥

नीलिकालक्षणमाह—कृष्णमेवंगुणमिति। एवंगुणमिति नीरुजतनुकमण्डलधर्मं; व्यङ्गोक्तदोषोऽत्रापि बोद्धव्यः, संमूर्च्छनविशेषात्तु नीलित्वकारी। कृष्णन्यच्छादतिकृष्णत्वेन भिन्ना नीलिका, व्यङ्गनीलिकयोस्तु व्यक्त एव भेदः-श्यावो व्यङ्गः, कृष्णा नीलिका; भोजे तु नीलिका गात्र एवोक्ता। यदुक्तं-'मारुतः क्रोधहर्षाभ्यामूर्ध्वगो मुखमाश्रितः। पित्तेन सह संयुक्तः करोति वदनत्वचि ॥ नीरुजं तनुकं श्यावं व्यङ्गं तमिति निर्दिशेत्। कृष्णमेवंगुणं गात्रे नीलिकां तां विनिर्दिशेत्'—इति ॥ ४० ॥

विमर्श—व्यङ्ग ही मुखातिरिक्त भाग में होने पर नीलिका कहलाता है । व्यङ्ग श्याव वर्ण का और नीलिका कृष्ण वर्ण की होती है । व्यङ्ग, न्यच्छ और नीलिका ये तीनों एक ही रोग के वर्ण और स्थानभेद से विभिन्न नाम हैं । इनके अतिरिक्त त्वचा में वर्णगत परिवर्तन निरन्तर धूप और रूक्ष वायु के सम्पर्क के कारण हुए अत्यधिक रक्तसञ्चार और तद्गत शोपवर्तुलि के निश्चय द्वारा प्रभावित रञ्जक द्रव्यों की अधिकता से होता है । इसके अतिरिक्त अधिवृक्कविकार (Addison's disease), लसीकार्बुद एवं कर्कटकार्बुद आदि जनित कृशता (Cachexia), जीर्ण विषमज्वर, अवटुका-ग्रन्थिविकार, सामाभसंधिवात (Rheumatoid arthritis), यकृद्दाल्युदर (Cirrhoris of the liver) आदि रोगों में, कुछ क्षय एवं मधुमेह के रोगियों में एवं मल्लयोगों के सेवन से विषात्मक प्रभाव होता है और उससे त्वग्गत रञ्जक द्रव्यों में परिवर्तन लेकर कारणानुरूप अस्थायी या स्थायी वर्णगत परिवर्तन होते हैं । कुछ विचारक इन विषों का प्रभाव सौरमण्डल नाडीचक्र (Solar plexus) द्वारा होता है ऐसा मानते हैं । कभी-कभी त्वचा में धमनी या सिरा की केशिकाओं के गुच्छ भी बन जाते हैं । इनके लिए कोई निश्चित नाम नहीं दिया जा सकता पर Melanodermia, Melasma and Chloasma आदि का समावेश इसी वर्ग में हो सकता है ।

परिवर्तिकां वर्णयति—

मर्दनात् पीडनाद्वाऽति तथैवाप्यभिघाततः ।
मेढ्रचर्म यदा वायुर्भजते सर्वतश्चरन् ॥ ४१ ॥
तदा वातोपसृष्टत्वात्तच्चर्म परिवर्तते ।
मणेरधस्तात् कोशश्च ग्रन्थिरूपेण लम्बते ॥ ४२ ॥
सरुजां वातसंभूतां तां विद्यात् परिवर्तिकाम् ।
सकण्डूः कठिना चापि सैव श्लेष्मसमुत्थिता ॥४३॥

मसलने व अत्यधिक दबाने से तथा चोट लगने से जब सारे शरीर में घूमने वाला (व्यान) वायु विकृत होकर शिश्न के चर्म में पहुँचता है तो वायु से दूषित होने के कारण शिश्नाग्र चर्म पलट जाता है और शिश्नमणि के पीछे चर्मकोश गांठ का रूप धारण करके लटकता है । पीडा-युक्त परिवर्तिका को वातिक और खुजली तथा कठिनता से युक्त होने पर इसे कफज परिवर्तिका कहते हैं ॥ ४१-४३ ॥

मेढ्रगताभिघातजे रोगत्रये परिवर्तिकामाह—मर्दनादित्यादि । पीडनाद्वाऽतीत्यतिशब्दो मर्दनपीडनाभ्यां सह संबध्यते । अतियोगादेव ते वातं कोपयतः । सर्वतश्चरन्निति व्यानः, [2]'सर्वतश्चरः' इति पाठे स एवार्थः । परिवर्तन इति सर्वतो विवर्तते । कोष इति चर्मकोषः । परिवर्तिकेति वृतधातोः 'रोगाख्यायां ण्वुल् बहुलम्' इति ण्वुल् (वृत-अक-आप्) । एवमवपाटिकायां च बोद्धव्यम् । अस्या वातजायामपि पित्तानुबन्धाद्दाहपाकौ भवतः, कफसंबन्धस्तु सकण्डूः कठिना चापीत्यादिनाभिहितः । भोजेऽप्युक्तं-'मणेरधो मेढ्रचर्म व्यानस्तु परिवर्तयेत् । सशूलतोददाहाद्यैर्विज्ञेया परिवर्तिका । श्लैष्मिकी कठिना स्निग्धा कण्डूमत्यल्पवेदना' इति ॥ ४१-४३ ॥

---

१. सवेदनं सदाहं च पाकं च व्रजति क्वचित् । परिवर्तिकेति तां विद्यात् सरुजां वातसंभवाम् ॥ इति ख. ।
२. 'सर्वतश्चरः' इति मुख्योऽस्य पाठः ।

विमर्श—परिवर्तिका को आजकल पैराफाइमोसिस (Paraphymosis) कहते हैं। इसके निम्न कारण हैं—

(१) शिश्नचर्म—(Prepuce) के द्वार का अत्यधिक सङ्कीर्ण होना। शिश्नचर्म जब शिश्न मणि से संसक्त रहता है उस अवस्था में बलपूर्वक हाथ के दबाव से उसे पीछे हटाने से चर्म शिश्न-मणि के पीछे चला जाता है और वहाँ शोथयुक्त होकर गांठ का रूप धारण कर लेता है। बच्चों और छोटी अवस्था के पुरुषों में यह पाया जाता है।

(२) मैथुन—निरुद्धप्रकाश की अवस्था में या सूचीमुखी योनि में वेग से मैथुन करने पर भी चर्म शिश्नमणि के पीछे हट कर पूर्ववत् शोथयुक्त और गठीला हो जाता है।

(३) पूयमेह या फिरंगज व्रण—पूयमेह की तीव्र अवस्था में या फिरंगज व्रण में भी यह अवस्था उत्पन्न हो सकती है। इनसे शिश्नमणि और चर्म में शोथ हो जाता है और चर्म शिश्नमणि के पीछे टूर्निकेट (रबर-नलिका जो रक्तावरोधन के निमित्त बन्धनार्थ प्रयुक्त होती है) का कार्य करती है। शिश्नमणि के पीछे दो घेरे दिखाई देते हैं। उनमें नीचे का घेरा लाल होता है जो श्लेष्मलकला से बनता है ऊपर का घेरा पीला होता है और वह चर्म से बनता है। यदि समय पर उपयुक्त चिकित्सा न की जाय तो चर्म संसक्त हो जाता है, व्रण बन जाते हैं और कभी-कभी शिश्न में सड़न भी पैदा हो जाती है—

अवपाटिकां निरूपयति—

अल्पीयःखां यदा हर्षाद्बलाद्गच्छेत् स्त्रियं नरः।
हस्ताभिघातादपि वा चर्मण्युद्वर्तिते बलात् ॥ ४४ ॥
यस्यावपाट्यते चर्म तां विद्यादवपाटिकाम् । (सु. नि. १३)

जब पुरुष छोटे छिद्रवाली स्त्री (छोटे मुख वाली योनि) के साथ जोश में आकर बलपूर्वक मैथुन करता है अथवा हाथ से बलपूर्वक मसल देता है तो उसके जोर से ऊपर चढ़ जाने से शिश्न चर्म फट जाता है तब उसे अवपाटिका कहते हैं ॥ ४४ ॥

अवपाटिकामाह—अल्पीयःखामित्यादि। अल्पीयःखामित्यल्पतरं खं योनिमुखं यस्याः सा तथा, कन्या ह्यनार्तवा अल्पीयःखा भवति। अत्र हेत्वन्तरं हस्ताभिघातादपि वेति। उद्वर्तित इति ऊर्ध्वं वर्तिते। यस्यावपाट्यत् इति स्वयमेव विदीर्यते। एषा च पृथग् दोषत्रयेणानुबध्यते। तथा च भोजः—'मर्दनादभिघाताद्वा कन्यायोनिप्रपीडनात्। लक्ष्यते यदि मेढ्रस्य रूक्षा दर्भैरिव क्षतम् ॥ ज्ञेयाऽवपाटिका सा तु पृथग्दोषैः समन्विता। वातात् सा परुषा रूक्षा शूलनिस्तोदकारिणी ॥ पित्तात् सदाहा रक्ताद्वा दाहतृष्णासमन्विता। श्लैष्मिकी कठिना स्निग्धा कण्डूमत्यल्पवेदना' इति ॥ ४४ ॥

विमर्श—अवपाटिका भी परिवर्तिका का ही रूप है। इसमें शिश्न चर्म का विदारण हो जाता है और उसमें नहीं होता। चिकित्सा भी दोनों की समान ही बताई गई है। माधव और सुश्रुत ने इसमें किसी दोष की विशेषता का निर्देश नहीं किया किन्तु आचार्य भोज ने इसका वर्णन भी किया है—

'मर्दनादभिघाताद्वा' आदि। सम्पूर्ण पाठ मधुकोष में देखें।

निरुद्धप्रकशमाह—

वातोपसृष्टे मेढ्रे वै चर्म संश्रयते मणिम् ॥ ४५ ॥
मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च।

निरुद्धप्रकशे तस्मिन् मन्दधारमवेदनम् ॥ ४६ ॥
मूत्रं प्रवर्तते जन्तोर्मणिर्विव्रियते न च ।
निरुद्धप्रकशं विद्यात् सरुजं वातसंभवम् ॥ ४७ ॥ (सु. नि. १३)

वायु से दूषित शिश्न का चर्म शिश्नमणि को आवृत कर लेता है। इस प्रकार चर्म से आवृत मणि मूत्रमार्ग को बन्द कर देता है। इसमें रोगी का मूत्र पीडारहित किन्तु मन्द धार से निकलता है और शिश्नमणि सदा आवृत रहती है। इस वातजन्य और पीडादायक व्याधि को 'निरुद्धप्रकश' कहते हैं ॥ ४५-४७ ॥

निरुद्धप्रकशमाह—वातोपसृष्ट इत्यादि। संश्रयत इति समग्रं श्रयते, अत्रैव नीयत इत्यर्थः। अवपाटिका स्वरूढा चर्मसंकोचान्निरुद्धप्रकशो भवतीति ब्रुवते, सन्निरुद्धगुदवत् स्वतन्त्रोऽपि भवतीति शक्यते वक्तुं; निरुद्धप्रकाश इत्यस्मिन्नर्थे निरुद्धप्रकशः, नैरुक्तेन च रूपसिद्धिः। मूत्रस्रोतः संकुचितचर्मपीडनेन मणेः स्वल्पद्वारत्वान्मूत्रस्रोतो रुणद्धि। अवेदनमित्यस्य स्थाने सवेदनमिति केचित्। अत्र भोजाभिप्रायेण व्याचक्षते-एकदा निरुद्धे स्रोतसि सवेदनमन्यदा तु प्रकाशे मन्दधारं प्रवर्तते, मणिश्च नावदीर्यते मूत्रेणेति। तथा च भोजः- 'मेढ्रान्ते चर्मणि यदा मारुतः कुपितो भृशम्। द्वारं रुणद्धि स शनैः प्रकाशश्च मुहुर्भवेत् ॥ मूत्रं मूत्रयते कृच्छ्रात् प्रकाशस्तु यदा भवेत्। वातोपसृष्टमेढ्रस्तु मणिर्न च विदीर्यते। निरुद्धं च प्रकाशं च व्याधिं विद्यात् सुदारुणम्' इति। सुश्रुते तु निरुद्धप्रकाशत्वात् निरुद्धप्रकशः। मणिर्विव्रियते न चेति मणिर्विवृतो न भवति ॥ ४५-४७ ॥

विमर्श—पीडन, मर्दन और अभिघात इसके भी कारण हैं। शिश्नचर्म का मुख अति सूक्ष्म होता है अतः शिश्नमणि बाहर नहीं निकल सकती।

निरुक्त—निरुद्धप्रकाशत्वात् निरुद्धप्रकशः, (श्रीकण्ठदत्त)। चूँकि शिश्नमणि का प्रकाश में आना रुक जाता है अतः इसे निरुद्धप्रकश कहते हैं। अथवा चर्म के अतिसंकुचित होने से शिश्नमणि पर बाहर का प्रकाश आना अवरुद्ध हो जाता है। वाग्भट इसे निरुद्धमणि कहते हैं; क्योंकि इसमें शिश्नमणि चर्म से अवरुद्ध हो जाती है। सुश्रुत ने दुरूढा अवपाटिका को निरुद्धप्रकश कहा है किन्तु यह रोग स्वन्तत्र या सहज और जातोत्तर दुरूढा अवपाटिका आदि से भी हो सकता है।

मूल पाठ की प्रथम पंक्ति में 'वातोपसृष्टे' कह कर अन्तिम पंक्ति में पुनः 'वातसम्भवम्' कहना पुनरुक्ति दोषयुक्त तथा तृतीय पंक्ति में 'अवेदनम्' और अन्तिम पंक्ति में 'सरुजम्' यह दोनों परस्पर विरुद्ध प्रतीत होते हैं किन्तु ऐसी बात नहीं है। मेढ्रचर्म में संकोच (जो इस रोग का प्रधान कारण और लक्षण भी है) वातकृत ही होता है इसलिए पृथक् पंक्ति में 'वातोपसृष्टे' कहा गया। सामान्यतया इस रोग में पीड़ा नहीं होती अतः 'अवेदनम्' भी कहा गया। किन्तु भोजमतानुसार अवपाटिका की भाँति निरुद्धप्रकश में भी वायु के साथ अन्य दोषों का भी सम्बन्ध हो सकता है इसका निर्देश करने के लिए तथा आगे चलकर क्षोभ एवं मर्दन आदि के कारण अधिक वात-प्रकोप होने पर पीड़ा की अधिकता हो सकती है अतः अन्तिम पंक्ति में 'सरुजं वातसंभवम्' कहा है। अन्य दोषों का सम्बन्ध होने पर दोषानुसार दाह, कण्डू आदि भी हो सकते हैं। यह सभी बातें अगली पंक्तियों में स्पष्ट हो जाती हैं।

निरुद्धप्रकश को आजकल फायमोसिस (Phimosis) कहते हैं। यह दो प्रकार का होता है—

(१) सहज (Congenital) (२) जन्मोत्तरकालज (Acquired)

(१) सहज—यह गर्भदोष से होता है। यह बालकों में पाया जाता है। छिद्र यदि बहुत छोटा न हो तो इसके परिणाम बाल्यावस्था में दिखाई नहीं देते। युवावस्था में जब शिश्नोत्थापन होने लगता है तो उससे इसमें क्षोभ होता है और रोगी हस्तमैथुन का अभ्यासी बन जाता है। इसके अतिरिक्त मैथुन करने में भी कठिनाई होती है। कभी-कभी बलपूर्वक मैथुन करने से अवपाटिका या परिवर्तिका रोग हो जाते हैं। यदि छिद्र अतिसूक्ष्म हुआ तो मूत्रत्याग में भी कष्ट होता है। क्षोभ के कारण बच्चा शिश्नाग्र को पकड़ कर आगे की ओर खींचता है। इससे अश्मरी के लक्षण प्रतीत होते हैं। त्वचा के नीचे की टायसन (Tyson) नामक ग्रन्थियों से जो स्राव निकलता है उसे स्मिग्मा (Smegma) कहते हैं। यह जम कर कभी-कभी अश्मरी के समान कड़ा पड़ जाता है। इसकी रगड़ से घातक मांसार्बुद होने की सम्भावना रहती है।

जातोत्तर—मैथुनादि कारणों के अतिरिक्त पामा, कच्छू, विचर्चिका आदि में खुजलाने से, अश्मरी में शिश्नाग्रचर्म को मलने से, पूयमेह और फिरंग के उपसर्ग से, मूत्रमार्ग के संकोच, अष्ठीलावृद्धि एवं शिश्नचर्म की अस्वच्छता आदि के कारण उत्पन्न खुजलाहट से भी शिश्नाग्र त्वचा में व्रण बन जाते हैं और उनका रोहण होने पर जो व्रणवस्तु बनती है उसके संकोच से निरुद्धप्रकश उत्पन्न हो जाता है। इसमें भी सहज निरुद्धप्रकश के समान ही लक्षण, वेदना और उपद्रव हो सकते हैं।

सन्निरुद्धगुदमाह—

वेगसंधारणाद्वायुर्विहतो गुदसंश्रितः।
निरुणद्धि महास्रोतः सूक्ष्मद्वारं करोति च ॥ ४८ ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदारुणम् ॥४९॥ (सु. नि. १३)

मल एवं अपानवायु का वेग धारण करने से प्रकुपित हुआ वायु गुदा में पहुँचकर महास्रोत (आन्त्र) के मार्ग को अवरुद्ध कर द्वार को सूक्ष्म कर देता है। मार्ग के संकीर्ण हो जाने से मल कठिनता से निकलता है। इस भयंकर व्याधि को सन्निरुद्धगुद कहते हैं ॥ ४८-४९ ॥

मूत्रमार्गरोधकनिरुद्धप्रकशानन्तरं पुरीषमार्गरोधकं सन्निरुद्धगुदमाह-वेगसंधारणादित्यादि। तस्येति गुदस्य। 'महत्स्रोत' इति पाठे तु महत्स्रोतो गुदविवरं, निरुद्धप्रकशवदत्रापि चर्मसंकोचात् सन्निरुद्धगुदम् ॥ ४८-४९ ॥

विमर्श—इसे मलाशयसंकोच (Stricture of the rectum) कहते हैं। प्रवाहिका, अतिसार, अर्श, भगन्दर तथा मलाशय के फिरङ्ग और राजयक्ष्मा से गुदा में व्रण, व्रणवस्तु (Scar) तथा संकोच (Stricture) बन जाने से यह अवस्था उत्पन्न होती है। इसमें निम्न लक्षण होते हैं—

(१) विबन्ध यह प्रारम्भिक लक्षण है।
(२) फिर कभी विबन्ध और कभी अतिसार।
(३) मल-त्याग में कष्ट।
(४) मल कड़ा, चपटा और फीते के समान पतला होता है।

(५) कुछ दिन बाद मल के साथ आम और रक्त भी गिरता है।

(६) अग्निमान्द्य और आध्मान।

कभी-कभी गर्भदोष से जन्म से ही गुदमार्ग बन्द रहता है जिसे अंग्रेजी में (Imperforated anus) कहते हैं। इसका भी समावेश संनिरुद्धगुद में ही किया जा सकता है।

अहितपूतनलक्षणमाह—

शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्।
स्विन्ने वाऽस्नाप्यमाने वा कण्डू रक्तकफोद्भवा॥ ५०॥

कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम्॥५१॥ (सु. नि. १३)

मल और मूत्र से लिप्त बालक की गुदा के प्रक्षालन न करने पर अथवा पसीना आने पर भी न धोने पर गुदा में रक्तकफजन्य खुजली पैदा हो जाती है। खुजलाने से शीघ्र ही वहाँ फुन्सियाँ और स्राव उत्पन्न हो जाता है। इन फुन्सियों के अनेक व्रणों से युक्त इस गुदा को अहिपूतन कहते हैं॥

अहिपूतनमाह—शकृन्मूत्रेत्यादि। अपान इति गुदे, स्विन्ने स्वेदयति, अस्नाप्यमाने अक्रियमाणक्षालने; स्वेदमलक्लेदादेव कण्डूर्भवतीत्यर्थः। एकीभूतमिति अपानं व्रणैः सहैकीभूतम्। अहिपूतनं च बालानामेव भवति, भोजे पुनरिदं दुष्टस्तन्यपानादपि भवतीति पठितम्। यदुक्तं-'दुष्टस्तन्यस्य पानेन मलस्याक्षालनेन च। कण्डूदाहरुजावद्भिः पिडकैश्च समाचिताः॥ संभवन्ति यथादोषं दारुणा ह्यहिपूतना' इति॥ ५०-५१॥

विमर्श—यह रोग बालकों में ही पाया जाता है। दूषित दुग्ध का पान तथा मलद्वार की अस्वच्छता को इसका प्रधान कारण माना है। इसमें खुजली के साथ दाह और पीड़ा भी होती है। इस दुग्ध के पीने से बच्चे को खट्टे और जलन करने वाले दस्त होते हैं। आधुनिक विद्वान् इसे नैपकीन रैश (Napkin Rash) या सोर बटक (Sore buttocks) कहते हैं।

वृषणकच्छूं निरूपयति—

स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः।
यदा प्रक्लिद्यते स्वेदात् कण्डूं जनयते तदा॥ ५२॥

कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम्॥ ५३॥ (सु. नि. १३)

स्नान और उबटन न करने वाले व्यक्ति का अण्डकोष पर स्थित मल स्वेद के सम्पर्क से गीला होकर खुजली उत्पन्न करता है। इसके बाद खुजाने से जल्दी ही फुन्सियाँ होकर स्राव निकलने लगता है। इस कफ और रक्त के प्रकोप से उत्पन्न व्याधि को वृषणकच्छू कहते हैं॥ ५२-५३॥

अहिपूतनसमानहेतुलिङ्गतया गुदाश्रयं गुदभ्रंशमुक्तक्रमानन्तरं वृषणकच्छूमाह—स्नानोत्सादनहीनस्येत्यादि। एषा च निदानविशेषात् प्रायो वृषणभावित्वाद्विशिष्टचिकित्सोपयोगित्वाच्च कुष्ठोक्तकच्छूतो भेदेन पठ्यते॥ ५२-५३॥

विमर्श—कुष्ठ प्रकरण में भी कच्छू का वर्णन किया गया है। निदान तथा चिकित्सा में भेद होने से इसका पृथक् वर्णन किया गया है। इसके अतिरिक्त इसका स्थान केवल वृषण ही है। इसे अण्डकोष का एक्जिमा (Eczema of the scrotum) कहते हैं।

गुदभ्रंशं लक्षयति—

प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः।
रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥ ५४ ॥ (सु. नि. १३)

रूक्ष एवं दुर्बल शरीर वाले रोगी की गुदा प्रवाहण (कांखने) तथा अतिसार से बाहर निकल आती है, उसे गुदभ्रंश कहते हैं ॥ ५४ ॥

गुदभ्रंशलिङ्गमाह—प्रवाहणेत्यादि। प्रवाहणं प्रकर्षेण कुन्थनम्। 'वाह प्रयत्ने' इत्यस्य रूपम्। प्रवाहणेनातिवेगोदीरणेन वातकोपः, अतीसारेण तु धातुक्षयात्; यदि वा प्रवाहणेनातीसारेण चाधोगतमारुतत्वेन गुदनिर्गमो रूक्षादिदेहस्य ॥ ५४ ॥

विमर्श—यह अधिकतर बच्चों में होता है। कभी-कभी युवा व्यक्तियों में भी पाया जाता है। इसे प्रोलैप्स आफ दि रेक्टम (Prolapse of the rectum) कहते हैं। इसके दो भेद हैं—

(१) अपूर्ण भ्रंश (Incomplete or Partial prolapse)—इसमें गुदा की केवल श्लेष्मल कला का ही भ्रंश होता है। यह प्रकार युवकों में अधिक पाया जाता है।

(२) पूर्ण भ्रंश (Complete prolapse)—इसमें श्लेष्मल कला के साथ गुदा की सम्पूर्ण भित्ति का भी भ्रंश हो जाता है। यह प्रकार बच्चों में अधिक होता है।

कारण—

(१) जिन रोगों में प्रवाहण और अतिसरण अधिक होता है वे सब इस गुदभ्रंश के कारण हैं—यथा-प्रवाहिका, अतिसार, कृमि विकार, अर्श, विबन्ध, अश्मरी, अष्ठीलावृद्धि (Enlarged prostate), मूत्रमार्ग का संकोच तथा गुदसंकोचनी पेशी की दुर्बलता।

(२) रूक्षता व शारीरिक दुर्बलता करने वाले रोग—यथा अतिसार, प्रवाहिका, कुक्कुर खांसी, रोमान्तिका। इनसे शरीर दुर्बल तथा मेदरहित हो जाता है। अन्ततोगत्वा गुदा भी रूक्ष और दुर्बल हो जाती है। मलत्याग के समय वह स्थिर नहीं रह पाती और बाहर निकल आती है।

वराहदंष्ट्रलक्षणमाह—

सदाहो रक्तपर्यन्तस्त्वक्पाकी तीव्रवेदनः। (सु. नि. १३)
कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः ॥ ५५ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने क्षुद्ररोगनिदानं समाप्तम् ॥ ५५ ॥

दाहयुक्त, चारों ओर से लाल, त्वचा का पाक कराने वाला, तीव्रवेदना, खुजली और ज्वर इन लक्षणों से युक्त रोग शूकरदंष्ट्रक (वराहदाढ़) कहलाता है ॥ ५५ ॥

वराहदंष्ट्रलिङ्गमाह—सदाह इत्यादि। अयं 'वराहदाढ' इति लोके प्रसिद्धः ॥ ५५ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां क्षुद्ररोगनिदानं समाप्तम् ॥ ५५ ॥

अथ मुखरोगनिदानम्

मुखरोगाणां सामान्यमुत्पादकहेतुमाह—

आनूपपिशितक्षीरदधिमत्स्यातिसेवनात् ।
मुखमध्ये गदान् कुर्युः क्रुद्धा दोषाः कफोत्तराः ॥ १ ॥

आनूपमांस, दूध, दही तथा मछलियों के अत्यधिक सेवन से कुपित हुए कफप्रधान दोष मुख में रोगों को उत्पन्न करते हैं ॥ १ ॥

रोगगणत्वसामान्यान्मुखरोगनिदानमुच्यते–आनूपेत्यादि । मुखरोगाश्च पञ्चषष्टिर्भवन्ति । यदाह भोजः–'दन्तेष्वष्टावोष्ठयोश्च मूलेषु दश पञ्च च । नव तालुनि जिह्वायां पञ्च सप्तदशामयाः । कण्ठे त्रयः सर्वसरा एकषष्टिश्चतुःपरा' इति ॥ १ ॥

विमर्श—सुश्रुत तथा भोज ने ६५ मुख रोगों का वर्णन किया है 'मुखरोगाः पञ्चषष्टिः सप्तस्वायतनेषु तत्रायतनानि ओष्ठौ, दन्तमूलानि, दन्ताः, जिह्वा, तालु, कण्ठः सर्वाणि चेति' । मुख के ओष्ठ आदि सात भागों में ये रोग होते हैं । उनमें से ओष्ठों में ८, मसूढ़ों में १५, दाँतों में ८, जिह्वा में ५, तालु में ९, गले में १७ और सम्पूर्ण मुख में ३ रोग होते हैं ।

वाग्भट के अनुसार पूर्वोक्त अधिष्ठानों के अतिरिक्त गण्ड आठवां अधिष्ठान है और मुख रोगों की संख्या ७५ है । इनमें से ओष्ठों में ११, कपोल में १, मसूढ़ों में १३, दांतों में १०, जिह्वा में ६, तालु में ८, कण्ठ में १८ और सारे मुख में ८ रोग होते हैं—एकादशैको दश च त्रयोदश तथा च षट् । अष्टावष्टादशाष्टौ च क्रमात्' । (अ० सं०)

मुखरोग

रोग	सुश्रुत	वाग्भट	भोज
१ ओष्ठरोग	८	१२ (१ गण्डगत)	८
२ दन्तरोग	८	१०	८
३ दन्तमूलरोग	१५	१३	१५
४ जिह्वारोग	५	६	५
५ तालुरोग	९	८	९
६ कण्ठरोग	१७	१८	१७
७ सर्वसररोग	३	८	३
	६५	७५	६५

वाग्भट ने खण्डौष्ठ, जलार्बुद, गण्डालजी एवं अर्बुद इन चार अतिरिक्त ओष्ठविकारों का उल्लेख किया है जिनका वर्णन आगे किया जायगा ।

पूर्वोक्त श्लोक में मुखरोगों के जो कारण बताए गए हैं वे प्रायः सभी कफवर्धक हैं अतः कफप्रधान दोष ही मुखरोग के उत्पादक भी बताए गए हैं किन्तु ये सभी कारण प्रधानतया कफवर्धक होते हुए भी रस-वीर्य-विपाक-प्रभाव आदि के द्वारा दूसरों (पित्त और वायु) को भी प्रकुपित कर सकते हैं (एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्) और रोग की अभिव्यक्ति के समय जिन दोषों के लक्षणों की प्रधानता होती है उन्हीं के अनुसार उनका वातिक आदि नामकरण होता है ।

तत्राष्टावोष्ठगतानाह—

वातिकौष्ठलक्षणमाह—

कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ।
दाल्येते परिपाटयेते ओष्ठौ मारुतकोपतः ॥ २ ॥

वायु के प्रकोप से होठ खुरदरे, कड़े, जकड़े हुए एवं वातिक वेदनायुक्त होते हैं और होठों की त्वचा फट जाती है ॥ २ ॥

वातिकलक्षणमाह—कर्कशावित्यादि। दाल्येते इति विदार्यंते। परिपाटयेते इति किंचिदवदीर्णत्वचौ भवत इत्यर्थः ॥ २ ॥

विमर्श—इसे क्रैक्डलिप्स (Cracked lips) कहते हैं। यहाँ व्याकरण की दृष्टि से सुश्रुतोक्त 'परिपाटयेते ह्योष्ठौ' यही पाठ ठीक है। 'हि' के विना पाठ व्याकरण की दृष्टि से अशुद्ध है।

पित्तजमोष्ठलक्षणमवतारयति—

चीयेते पिडकाभिश्च सरुजाभिः समन्ततः।
सदाहपाकपिडकौ पीताभासौ च पित्ततः ॥ ३ ॥ (सु. नि. १६)

पित्तज ओष्ठप्रकोप में होठ चारों ओर से पीडायुक्त पिडकाओं से व्याप्त हो जाते हैं। पिडकाओं में जलन और पाक होता है और होठ पीले होते हैं ॥ ३ ॥

पैत्तिकलक्षणमाह—चीयेते इत्यादि। सरुजाभिरिति पित्तकृतरुजान्विताभिः यद्येवं सदाहपाकपिडकाविति किमर्थमुच्यते? पूर्वेणैव गतार्थत्वात्। नैवं, पक्षान्तरप्रतीत्यर्थं पुनरुच्यते; अयमर्थः—कदाचित् पित्तरुजान्वितबहुपिडकाचितावोष्ठौ कदाचिद्दाहपाकान्वितपिडकाचितौ वा भवतः; अन्यस्त्वाह—अनतिभिन्नार्थत्वादव्यक्तशब्दार्थत्वाच्च दाहपाकातिशयदर्शनार्थं पिडकानुवादः ॥ ३ ॥

कफजमोष्ठप्रकोपमाह—

सवर्णाभिश्च चीयेते पिडकाभिरवेदनौ।
भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू ॥ ४ ॥ (सु. नि. १६)

कफज ओष्ठप्रकोप में ओष्ठ त्वचा के वर्ण की पिडकाओं से व्याप्त रहते हैं। उनमें किसी प्रकार की पीड़ा नहीं होती और वे चिपचिपे, ठण्डे और भारी होते हैं ॥ ४ ॥

कफजमाह—सवर्णाभिरित्यादि। सवर्णाभिरिति ओष्ठसमानवर्णाभिः। अवेदनौ ईषद्वेदनौ ॥ ४ ॥

सान्निपातिकमोष्ठप्रकोपं निरूपयति—

सकृत्कृष्णौ सकृत्पीतौ सकृच्छ्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिडकाचितौ ॥ ५ ॥ (सु. नि. १६)

सन्निपातज ओष्ठप्रकोप में ओष्ठ कभी काले, कभी पीले और कभी सफेद होते हैं तथा अनेक प्रकार की पिडकाओं से व्याप्त रहते हैं ॥ ५ ॥

सान्निपातिकलक्षणमाह—सकृदित्यादि। सकृदिति कदाचिद्विकृतिवशादेवं भवति अनेकपिडकाचिताविति वातादिवेदनान्वितबहुपिडकौ, अनेकवर्णपिडकाचिता वित्यन्ये।

अनेकाश्च वर्णा वातादीनां कृष्णपीतश्वेताः, अत्र पक्षे सकृत्कृष्णावित्यादिपिडकातोऽन्यत्र कल्पनीयम् ॥ ५ ॥

विमर्श—पित्तज, कफज और सन्निपातज ओष्ठप्रकोप को हर्पिस लेबियालिस (Herpes Labialis) के अवस्थाभेद कह सकते हैं । यह रोग अधिकतर फुफ्फुसपाक (Lober pneumonia), विषमज्वर (Malaria) तथा मस्तिष्कसुषुम्नाज्वर (Cerebro-spinal fever) में पाया जाता है ।

रक्तजमोष्ठप्रकोपं प्राह—

खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ ॥ ६ ॥ (सु. नि. १६)

रक्त से दुष्ट होठ खर्जूर के फल के समान वर्ण वाली पिडकाओं से व्याप्त, रक्त का स्राव करने वाले और रक्त के रंग के होते हैं ॥ ६ ॥

रक्तजमाह—खर्जूरेत्यादि । खर्जूरफलवर्णाभिरित्यनेन वर्णमात्रेणैव साधर्म्यं प्रतिपाद्यते, यदि तु सर्वात्मना साधर्म्यमभीष्टं स्यात्, तदा 'खर्जूरफलतुल्याभिः' इत्येवोच्येत । रक्तोपसृष्टाविति रक्तदूषितौ ॥ ६ ॥

विमर्श—इसे होठ के इपिथीलियोमा (Epitheleoma) का प्रकार कह सकते हैं । वाग्भटोक्त अर्बुद रोग का समावेश लक्षणसादृश्य से प्रायः इसी में हो सकता है । 'खर्जूरसदृशं चात्र क्षीणे रक्तेऽर्बुदं भवेत्' ।

मांसजमाह—

गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुद्गतौ ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात् ॥७॥ (सु. नि. १६)

मांस से दूषित होठ भारी, मोटे तथा मांसपिण्ड के समान उभरे हुए होते हैं । रोगी के मुख के दोनों ओर कृमि पड़ जाते हैं ॥ ७ ॥

मांसजमाह—गुरू स्थूलावित्यादि । जन्तवश्चात्र मूर्च्छन्तीति क्रिमयोऽप्यत्र उच्छ्रिता भवन्ति । उभयतो मुखादिति मुखविवरमपेक्ष्योभयभागयोः, सृक्कणीप्रदेशयोरिति यावत् । मुखादिति । ल्यब्लोपे पञ्चमी । 'उभयतोमुखा' इति पाठान्तरे उभयसृक्कणीभागो मुखमाश्रयो येषां ते तथा । द्विमुखा इत्यन्ये ॥ ७ ॥

विमर्श—यह भी इपिथोलियोमा का ही प्रकार है । मूल श्लोक में 'उभयतो मुखात्' का अर्थ कुछ लोग मुखछिद्र के दोनों कोण तथा कुछ लोग 'उभयतोमुखाः' यह पाठकर उभय (दोनों) ओष्ठ भाग हैं मुख (आश्रय) जिनके अर्थात् दोनों ओठों में ऐसा अर्थ करते हैं । कुछ लोग उभयतो मुख का अर्थ दोनों ओर मुख (छिद्र) वाले (द्विमुख) मानते हैं ।

आजकल मुख के पार्श्व में प्रायः गण्ड भाग में एक विकार मिलता है जिसमें बाहर और भीतर दोनों ओर मुख होने से गण्ड में एक छिद्र बन जाता है और इसमें सड़न और तीव्र दुर्गन्धि होती है कृमि-संसर्ग भी हो जा सकता है और इसे (Cancrum oris) कहते हैं । यह कालज्वर (Kala azar) के उपद्रव रूप में बहुधा मिलता है । सम्भवतः इसी का वर्णन मूल श्लोक में अभीष्ट है ।

मेदोजमोष्ठलक्षणमाह—

सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू ।
अच्छं स्फटिकसंकाशमास्रावं स्रवतो भृशम् ॥ ८ ॥
तयोर्व्रणो न संरोहेन्मृदुत्वं च न गच्छति । (सु. नि. १६)

मेदजन्य ओष्ठ प्रकोप में होठ घृतमण्ड (घृत का ऊपरी स्वच्छ भाग) के वर्ण के समान, खुजली युक्त और भारी होते हैं। उनसे स्फटिक के समान स्वच्छ स्राव बहुत अधिक निकलता है। इस प्रकार के होठों के व्रण का रोपण नहीं होता और न तो वे मृदु ही होते हैं ॥ ८ ॥

मेदोजमाह—सर्पिर्मण्डप्रतीकाशावित्यादि । सर्पिर्मण्डप्रतीकाशाविति सर्पिर्मण्डो घृतस्योपरितनः स्वच्छभागः, तत्प्रतीकाशौ तत्सदृशौ । तयोरिति तादृशयोः ॥ ८ ॥

विमर्श—यह अवस्था आधुनिक मैक्रोचीलिया (Macrocheilia) से मिलती है जो कि अवटुका ग्रन्थि विकृति के कारण उत्पन्न मिश्रित दोष (Myxoedema) वामनता (Cretinism) और शाखा-बृहती (Acromegaly) में पायी जाती है।

अभिघातजमोष्ठं निरूपयति—

क्षतजाभौ विदीर्येते पाट्येते चाभिघाततः ॥ ९ ॥
ग्रथितौ च तथा स्यातामोष्ठौ कण्डूसमन्वितौ । (सु. नि. १६)

चोट लग जाने से होठ क्षत के समान विदीर्ण या रक्तवर्ण, फटे और छिले हुए गांठदार तथा खुजलीयुक्त होते हैं ॥ ९ ॥

अभिघातजमाह—क्षतजाभावित्यादिना । अत्र कफरक्तयोरप्यनुबन्धो बोद्धव्यः । यदुक्तं भोजे, 'क्षतावभिहतौ वापि रक्तावोष्ठौ सवेदनौ । भवतः सपरिस्रावौ कफरक्तप्रदूषितौ'—इति । वायुरप्यत्राभिघाताल्लभ्यते, अयं चाभिघातजशोथाद्यथोक्तलक्षणकारणभेदेन तथा वातिकौष्ठप्रकोपादपि कफरक्तरूपहेतुभेदयोगाद्भिद्यते ॥ ९ ॥

विमर्श—इसमें कफ और रक्त का अनुबन्ध रहता है यह आचार्य भोज के कथन से स्पष्ट है—क्षतावभिहतौ वापि रक्तावोष्ठौ सवेदनौ । भवतः सपरिस्रावौ कफरक्तप्रदूषितौ । अर्थात् क्षत और अभिघात जनित ओष्ठ रक्तवर्ण के पीडा एवं स्राव युक्त और कफ तथा रक्त से दूषित होते हैं।

वाग्भट ने जिन चार ओष्ठ रोगों का अतिरिक्त वर्णन किया है वे निम्नलिखित हैं—

(१) खण्डोष्ठ तत्र खण्डौष्ठ इत्युक्तो वातेनौष्ठौ द्विधा कृतः । अर्थात् वातप्रकोप से ओष्ठ के (सहज) दो भाग हो जाते हैं उसको खण्डोष्ठ कहते हैं। आजकल इसे शशोष्ठ (Hare lip) कहते हैं। यह सहज विकार है। गर्भ की आरम्भिक अवस्था में ओष्ठ के दक्षिण और वाम भाग अलग-अलग रहते हैं जो बाद में आपस में मिल जाते हैं। कभी-कभी इनके न मिलने से जन्मोत्तर दोनों के बीच में अन्तर रह जाता है। इनको मिलाने के लिए शस्त्र कर्म करना पड़ता है। कुछ विद्वान् इसे सहज वातविकृति जनित होने से सुश्रुतोक्त वातिकोष्ठ के भीतर समाविष्ट मानते हैं पर निदान एवं चिकित्सावैशिष्ट्य से इसे पृथक् मानना ही उचित है।

(२) अर्बुद—यह वस्तुतः रक्तज ओष्ठ रोग का ही अवस्था भेद है—रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ । खर्जूरसदृशं चात्र क्षीणे रक्तेऽर्बुदं भवेत् ॥

(३) जलार्बुद—जलबुद्बुदवद्वातकफादोष्ठे जलार्बुदम् (अ. हृ. उ. तं. २१) यह आधुनिक ओष्ठगत श्लेष्मग्रन्थि (Mucous cyst) है। उपेक्षित और गम्भीर मूल होने पर अर्बुद रूप में परि-

णत होने की आशंका से सम्भवतः सुश्रुत ने इसका अन्तर्भाव रक्तज मांसज भेद में ही कर लिया होगा। किन्तु यह साध्य और अन्य अर्बुद प्रायः असाध्य हैं अतः इसे भिन्न ही मानना उचित है।

(४) गण्डालजी—स्थिरः शोफो गण्डे दाहज्वरान्वितः। (अ. हृ. उ. तं. २१) यहाँ अलजी शब्द से ही स्पष्ट है कि इसमें चिरकारिता और पुनः पुनः उत्पत्ति की प्रवृत्ति होती है। अन्ततोगत्वा यह उभयतोमुखी हो सकती है। सम्भवतः इन्हीं कारणों से सुश्रुत ने इनका समावेश मांसज भेद में कर लिया होगा।

दन्तमूलगतान् पञ्चदश रोगान् व्याकरोति—

शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्तते।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदुनि च॥ १०॥
दन्तमांसानि शीर्यन्ते पचन्ति च परस्परम्।
शीतादो नाम स व्याधिः कफशोणितसंभवः॥ ११॥ (सु. नि. १६)

जिस रोगी के मसूड़ों से अकारण रक्त निकलता है और जिसके मसूड़े दुर्गन्धित, काले, गीले और मृदु होकर गिरने लगते हैं तथा एक दूसरे को पका देते हैं, इस कफरक्तज व्याधि को शीताद कहते हैं॥ १०-११॥

शीतादमाह—शोणितमित्यादि। दन्तवेष्टेभ्य इति दन्तबन्धनमांसेभ्यः। अकस्मादिति अभिघातादिनिमित्तं विना। 'शीर्यन्त' इत्यस्य स्थाने, 'पच्यन्त' इति गदाधरः, व्याचष्टे च—'स्वयं' इति शेषः। पचन्ति च परस्परमित्यन्योन्यं पचन्ति, पाकोष्मदूषितशोणितसंचरणेन'॥

विमर्श—इसमें मसूड़ों से विना किसी अभिघात या क्षत के ही खून जाया करता है। आज कल इस अवस्था को स्पंजी गम्स (Spongy gums) कहते हैं। मुख की अस्वच्छता, अशुद्ध पारद सेवन एवं जीवतिक्ति 'ग' (Vitamin C) की कमी से उत्पन्न स्कर्वी नामक रोग इसके मुख्य कारण हैं।

दन्तपुप्पुटकं वर्णयति—

दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान्।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः॥ १२॥ (सु. नि. १६)

जिस व्यक्ति के दो या तीन दाँतों के मूल में बड़ी सूजन हो जाती है उस कफरक्तजन्य व्याधि को दन्तपुप्पुटक समझना चाहिये॥ १२॥

दन्तपुप्पुटकमाह—दन्तयोरित्यादि। अयं च दन्तयोस्त्रिष्वित्यभिधानात् द्वित्रिदन्तनियतः, कफरक्तजत्वेऽपि शौषिराद्भिन्नोऽयं, रुजालालास्रावाभावात्॥ १२॥

विमर्श—कफरक्तज होते हुए भी यह शौषिर रोग से भिन्न है; क्योंकि इसमें पीड़ा और लाला स्राव का अभाव होता है। यह दो या तीन दाँतों के मसूड़ों तक ही सीमित रहता है। अष्टांगसंग्रहकार ने दन्तविद्रधि नाम का भी एक मसूड़ों का रोग बताया है। वह त्रिदोषज और इससे अधिक गहराई में स्थित होता है। कभी-कभी हनु अस्थि तक पहुँच कर उसका भी विनाश (Necrosis of the jaw) कर देता है। किन्तु दन्तपुप्पुटक उत्तान धातुओं में होने वाला एक सीमित रोग है। मसूड़े का भेदन करके फूटता है। इसे गम ब्वायल (Gum boil) कह सकते हैं।

दन्तवेष्टं निरूपयति—

स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च।

दन्तवेष्टः स विज्ञेयो दुष्टशोणितसंभवः ॥ १३ ॥ (सु. नि. १६)

मसूड़ों से पूयमिश्रित रक्त निकलता है और दाँत हिलने लगते हैं (और पाक भी होता है)। दूषित रक्त से उत्पन्न इस रोग को दन्तवेष्ट कहते हैं ॥ १३ ॥

दन्तवेष्टमाह—स्रवन्तीत्यादि। स्रवन्ति पूयरुधिरमित्यत्र 'दन्तमूलानि' इति शेषः। चला दन्ता भवन्ति चेति चकारेण पचन्ति चेति द्रष्टव्यम् ॥ १३ ॥

विमर्श—लक्षणों के अनुसार इसे आजकल 'पायोरिया एलवियोलेरिस' (Pyorrhoea alveolaris) कहते हैं। यह एक मसूढ़ों का रोग है। इसमें दाँत और मसूढ़ों के बीच में पूय एकत्रित हो जाता है। भोजनोत्तर मुख स्वच्छ न करने से खाद्य के सूक्ष्म कण दन्तमूल में एकत्रित होकर सड़ने लगते हैं और पुनः मालागोलाणु (Streptococcus viridans) के उपसर्ग से वहाँ शोथ उत्पन्न हो जाता है। जीवाणुजन्य विष-धातुओं का नाश करके गड्ढे बना देता है जिससे दाँत और मसूड़े के बीच में पूय का पर्याप्त सञ्चय हो जाता है। अन्ततोगत्वा दन्तखात (Teeth-sockets) पूर्णतया नष्ट हो जाती है। जिससे दाँत हिलने लगते हैं **(चला दन्ता भवन्ति)**। पूय भोजन के साथ आन्त्र में चला जाता है। वहाँ खाद्य रस के साथ इसके जीवाणु और विष का भी शोषण हो जाता है। वे रक्तप्रवाह के द्वारा शरीर में फैल कर स्थानीय और सार्वदैहिक भेद से इसके दो प्रकार के लक्षण उत्पन्न करते हैं।

(१) **स्थानीय लक्षण** (Local symptoms)—मसूढ़ों के किनारों में सूजन, लाली, दुर्गन्धित श्वास तथा मुख में दूषित स्वाद ये लक्षण होते हैं। रात्रि में पूय अधिक एकत्रित हो जाने से ये लक्षण अधिक होते हैं। ऊपरी जबड़े की सूजन नासा छिद्रों तक फैल सकती है। निगला हुआ पूय आमाशय, आन्त्र तथा आन्त्रपुच्छ में भी शोथ उत्पन्न कर सकता है। श्वास के साथ यदि फुफ्फुस में पहुँच जाय तो निमोनिया उत्पन्न कर सकता है।

(२) **सार्वदैहिक लक्षण**—यथा—बुभुक्षानाश, रक्तक्षय या पाण्डुता त्वचा के रोग (यथा—Eczema)

शौषिररोगं व्याचष्टे—

श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः।
लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥१४॥ (सु. नि. १६)

मसूढ़ों में पीड़ा और लालास्राव कराने वाली कफरक्तजन्य सूजन को शौषिर कहते हैं ॥१४॥

शौषिरलिङ्गमाह—श्वयथुरित्यादि। नामत इति प्रसिद्धितः ॥ १४ ॥

विमर्श—यह भी एक प्रकार की मसूढ़े का शोथ (Gingivitis) है। अधिक व्यापक तथा पीड़ा और लालास्राव युक्त होने से इसे दन्तपुप्पुटक से भिन्न समझना चाहिए।

महाशौषिरं लक्षयति—

दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्यते।
यस्मिन् स सर्वजो व्याधिर्महाशौषिरसंज्ञितः ॥१५॥ (सु. नि. १६)

जिस (पूर्वोक्त शौषिर) रोग में दाँत अपने स्थान से हिलने लगते हैं, तालु (एवं होठ) भी फट जाता है उस त्रिदोषज व्याधि को महाशौषिर कहते हैं ॥ १६ ॥

महाशौषिरलिङ्गमाह—दन्ता इत्यादि। तालु चाप्यवदीर्यत इत्यत्र चकारेण दन्ता ओष्ठौ चाप्यवदीर्यन्ते इति बोद्धव्यम्। सप्तरात्राच्चायं मारकः। यदाह भोजः—'सदाहो दन्तमूलेषु

शोथः पित्तकफानिलात्। जातः कफं चपयति चीणे तस्मिंस्तु शोणितम्॥ विवृद्धमनिशं दन्तान् ताल्वोष्ठमपि दारयेत्। महाशौषिर इत्येतत् सप्तरात्राद्विहन्त्यसून्' इति। यस्मिन् शौषिरे एवमपि भवति स महाशौषिर इति गदाधरः॥ १५॥

विमर्श—यह रोग प्रायः असाध्य होता है और भोज ने इसका अधिक स्पष्ट वर्णन निम्न प्रकार से किया है:—'पित्त, कफ और वायु के कारण दन्तमूलों (मसूड़े) में दाहयुक्त शोथ उत्पन्न होता है। उत्पन्न होने पर कफ क्षीण हो जाता है और रक्त बढ़कर निरन्तर दाँतों, तालु एवं ओष्ठों को विदीर्ण कर देता है। यह महाशौषिर नामक रोग है और सात रात्रि में ही जीवन का नाश कर देता है।' वस्तुतः यह पूर्वोक्त शौषिर रोग का ही एक प्रवृद्ध और व्यापक स्वरूप अथवा उपद्रवयुक्त अवस्था है और आधुनिक सकोथ-मुखपाक (Gangrinous Stomatitis) से अधिक साम्य रखता है।

परिदरं प्राह—

दन्तमांसानि शीर्यन्ते यस्मिन् ष्ठीवति चाप्यसृक्।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः॥१६॥ (सु. नि. १६)

जिस रोग में मसूड़े गल जाते हैं और रोगी रक्तष्ठीवन करता है उस पित्त, रक्त और कफ से होने वाली व्याधि को परिदर कहते हैं॥ १६॥

परिदरमाह—दन्तमांसानीत्यादि। दन्तमांसस्य परिदारणात् परिदरसंज्ञा॥ १६॥

विमर्श—यह भी शौषिर का ही एक जीर्ण प्रकार प्रतीत होता है।

उपकुशलक्षणमाह—

वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च।
यस्मिन् सोपकुशो नाम पित्तरक्तकृतो गदः॥१७॥ (सु. नि. १६)

जिस रोग में मसूढ़ों में जलन और पाक होता है और उन दोनों (कारणों) से दाँत हिल जाते हैं उस पित्त और रक्तजन्य व्याधि को उपकुश कहते हैं॥ १७॥

उपकुशलक्षणमाह—वेष्टेष्वित्यादि। ताभ्यामिति दाहपाकाभ्याम्। सोपकुश इति निर्देशोऽसिद्धत्वानित्यत्वादसाधुः, तेन स उपकुश इत्यर्थः॥ १७॥

विमर्श—सुश्रुत इसमें दाँतों से रक्तस्राव भी मानते हैं। रक्त का स्राव हो जाने पर मसूड़े सूज जाते हैं और मुख दुर्गन्धयुक्त हो जाता है।

वैदर्भं निरूपयति—

घृष्टेषु दन्तमांसेषु संरम्भो जायते महान्।
चला भवन्ति दन्ताश्च स वैदर्भोऽभिघातजः॥१८॥ (सु. नि. १६)

मसूढ़ों में रगड़ लग जाने पर जो सूजन उत्पन्न हो जाती है और दाँत हिल जाते हैं उस अभिघातजन्य व्याधि को वैदर्भ कहते हैं॥ १८॥

वैदर्भलिङ्गमाह—घृष्टेष्वित्यादि। संरम्भ इति शोथः, वेदनापाकौ वा॥ १८॥

विमर्श—शौषिर से लेकर वैदर्भपर्यन्त सब रोग जिंजिवाइटिस (Gingivitis) के विविध प्रकार प्रतीत होते हैं।

खलिवर्धनं लक्षयति—

मारुतेनाधिको दन्तो जायते तीव्रवेदनः।

खलिवर्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥१९॥ (सु. नि. १६)

वायु के प्रकोप से तीव्र पीडा के साथ एक अधिक दाँत निकल आता है जिसे खलिवर्धन कहते हैं। इसके उत्पन्न हो जाने पर पीडा शान्त हो जाती है ॥ १९ ॥

खलिवर्धनलिङ्गमाह—मारुतेनेत्यादि। जाते रुक् च प्रशाम्यतीति उत्थितेऽधिके दन्त-प्रभावाद्वेदनाया अभावः ॥ १९ ॥

विमर्श—इसे अधिदन्त (Extra tooth) कहते हैं। कुछ विद्वान् इसे अक्ल-दाढ़ (Wisdom tooth) समझते हैं, किन्तु वह उचित प्रतीत नहीं होता; क्योंकि चिकित्सा में इसे उखाड़ने का निर्देश किया है—'उद्धृत्याधिकदन्तं तु ततोऽग्निमवचारयेत्'। अक्ल-दाढ़ को उखाड़ा नहीं जाता है। वस्तुतः यह दन्तरोग प्रतीत होता है। इस प्रकार इसे यदि दन्तार्बुद (Odontoma) कहा जाय तो ठीक है। वाग्भट ने इसे दन्तरोग ही माना है।

करालरोगं वर्णयति—

शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः।
करालान् विकटान् दन्तान् करालो न स सिध्यति ॥ २० ॥

दाँतों में आश्रित हुआ प्रकुपित वायु धीरे-धीरे दाँतों को विषम और भयंकर बना देता है उसे कराल कहते हैं और यह असाध्य होता है ॥ २० ॥

कराललक्षणमाह—शनैरित्यादि। करालान् विषमान्। करालस्तु सुश्रुतेऽनुक्तोऽधिकः संग्रहकारेण पठितः, तेन सुश्रुतोक्तपञ्चदशसंख्याहानिः ॥ २० ॥

विमर्श—इस रोग में पूर्वोक्त दन्तमूलगत रोगों के कारण जब दन्तवेष्ट शिथिल हो जाता है तब दाँत ढीले होकर ऊपर नीचे या टेढ़े-मेढ़े होकर भयानक आकृति ग्रहण कर लेते हैं। वाग्भट ने इसे दन्तरोगों में माना है 'करालस्तु करालानां दशनानां समुद्गमः' (वा. उ. तं. २१)। सुश्रुत में इसका वर्णन ही नहीं है। माधव ने इसका संग्रह कर दन्तमूलगत रोगों की संख्या सोलह कर दी है।

अधिमांसकमाह—

हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः। (सु. नि. १६)

जबड़े के पीछे के दाँत के मसूढ़ों में तीव्र पीडायुक्त लालास्राव कराने वाली कफजन्य बहुत बड़ी सूजन हो जाती है उसे अधिमांसक कहते हैं ॥

अधिमांसकमाह—हानव्य इत्यादि। अधिमांसक इति संज्ञायां कन्। हानव्य इति हनुकुहरे। पश्चिम इत्यवसानजे, अन्तजे इति यावत् ॥

विमर्श—इस रोग में प्रायः नीचे के जबड़े के पिछले दाँत के पास मांस का उभार हो जाता है। इससे भोजन के चबाने में कठिनाई होती है। कभी-कभी उसके कुचल जाने से हनुसन्धि और कान में पीडा होती है। इसे आजकल की दृष्टि से (Impacted Wisdom tooth) कह सकते हैं।

दन्तनाडीराह—

दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ॥ २१ ॥ (सु. नि. १६)

दाँतों की जड़ में पूर्वोक्त (वातज, पित्तज, सन्निपातज और शल्यज भेद से) पाँच प्रकार की नाडी होती हैं ॥ २१ ॥

पञ्च दन्तनाडीराह—दन्तेत्यादि। नाड्यः पञ्च ज्ञेया यथेरिता इति नाडीनिदाने यथोक्ता वातपित्तकफसन्निपातागन्तुनिमित्तास्तथा दन्तमांसगता अपि नाड्यः। एताश्च नाडीव्रण-समानलक्षणा अपि शालाक्यसिद्धान्तेन संख्यापूरणाय चिकित्साभेदाच्च पुनरुक्ताः॥ २१॥

विमर्श—कभी-कभी साध्य दन्तमूलगत रोगों की उपेक्षा करने से दन्तवेष्ट और दाँतों के बीच संचित पूय के कारण नाडीव्रण (Sinus) बन जाते हैं। नाडी के पूर्वोक्त पाँच भेदों के कारण और लक्षणानुसार यहाँ भी पाँच प्रकार हो सकते हैं। वाग्भट ने सुस्पष्ट शब्दों में कहा है—

दन्तमांसाश्रितान् रोगान्यःसाध्यानप्युपेक्षते। अन्तस्तस्यास्रवन्दोषःसूक्ष्मांसञ्जनयेद्गतिम्॥
पूयं मुहुः सा स्रवति त्वङ्मांसास्थिप्रभेदिनी। ताः पुनः पञ्च विज्ञेया लक्षणैः स्वैर्यथोदितैः॥
(अ. हृ. उ. तं. २१)

जिस व्यक्ति की पलक चारों ओर से त्वचा के वर्ण की और स्थिर पिडकाओं से व्याप्त मोटी हो जाय उसे 'बहुलवर्त्म' या बहलवर्त्म कहते हैं ॥ ८३ ॥

बहुलवर्त्मलक्षणमाह—वर्त्मोपचीयत इत्यादि। सवर्णाभिस्त्वक्समानवर्णाभिः। एतत् सन्निपातादेव ॥ ८३ ॥

विमर्श—यह त्रिदोषज विकार है। इसे बहु पिडका युक्त उत्सङ्गिनी (Muiltiple chalazion) कह सकते हैं।

वर्त्मबन्धकं लक्षयति—

कण्डूमताऽल्पतोदेन वर्त्मशोथेन यो नरः।
न स संछादयेदक्षि यत्रासौ वर्त्मबन्धकः॥ ८४ ॥ (सु. उ. ३)

खुजली और अल्प तोद (पीड़ा) से युक्त वर्त्मशोथ से पीडित व्यक्ति जिस अवस्था में आँख को आच्छादित न कर सके उसे 'वर्त्मबन्धक' कहते हैं ॥ ८४ ॥

वर्त्मबन्धकलक्षणमाह—कण्डूमतेत्यादि। [२]वर्त्मशोथेनोपलक्षितो नरः स चक्षुर्न संछादयेत् सम्यक् छादयितुं न शक्नुयादित्यर्थः। एष सन्निपातजः॥ ८४ ॥

विमर्श—यह सन्निपातज व्याधि है किन्तु प्रवृद्ध कफ के कारण खुजली और मध्यवृद्ध वायु के कारण अल्प तोद होने से इसमें क्रमशः कफ और वायु वृद्धतम एवं वृद्धतर और पित्त का अनुबन्ध मात्र प्रतीत होता है। इस प्रकार के लक्षण वर्त्मीय उदर्द (Augio neurotic oedema) आदि जनित अपाकी शोथ (Non-Inflammatory oedema) में मिलते हैं।

क्लिष्टवर्त्मलक्षणमाह—

मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च।
अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्मेति तद्विदुः॥ ८५ ॥ (सु. उ. ३)

जिस रोग में सभी वर्त्म मृदु, कम पीडा वाले और ताम्रवर्ण के हो जाते हैं तथा अकस्मात् लाल हो जाते हैं उसे क्लिष्टवर्त्म कहते हैं ॥ ८५ ॥

क्लिष्टवर्त्मलक्षणमाह—मृद्वल्पवेदनमित्यादि। रक्तजत्वेऽप्यस्याल्पवेदनत्वमधिककफदूषितत्वाद्रक्तस्य। वर्त्मेति विदेहदर्शनाद्वर्त्मद्वयं ग्राह्यम्, अत एव समं युगपदेवेत्यर्थः। अकस्मादित्यहेतोरनियमेनैवेत्यर्थः। ताम्रमित्यनेनोपात्तेऽपि लौहित्ये रक्तमित्युपादानं हेत्वनियमप्रयुक्तं कादाचित्कं लौहित्यमिति द्योतयति। अत्रैव विदेहः—'श्लेष्मदुष्टेन रक्तेन क्लिष्टं मांसमिवोभयम्। बन्धुजीवनिभं वर्त्म क्लिष्टत्वं वेदनातियोगादवगन्तव्यम्' ॥ ८५ ॥

विमर्श—यह श्लेष्मरक्तज व्याधि है। इसमें दोनों वर्त्म आक्रान्त होते हैं—

श्लेष्मदुष्टेन रक्तेन क्लिष्टं मांसमिवोभयम्।
बन्धुजीवनिभं वर्त्म क्लिष्टवर्त्म तदुच्यते॥

यह वर्त्मशोफ (Oedema of lid) का सांस्थानिक (Systemic) प्रकार प्रतीत होता है। यह वृक्क या हृदय रोगों में उत्पन्न हो सकता है।

---

१. 'न समं छादयेदक्षि भवेद्बन्धः स वर्त्मनः' इति ख.। २. 'न संछादयेदिति सशोथत्वाद्यथावन्नयनं न पिदधाति' इति क.।

वर्त्मकर्दमलक्षणं व्याचष्टे—

क्लिष्टं पुनः पित्तयुतं शोणितं विदहेद्यदा ।
ततः क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः ॥ ८६ ॥ (सु. उ. ३)

(पूर्वोक्त) क्लिष्टवर्त्म में ही जब पित्त युक्त होकर रक्त विदाह उत्पन्न करता है तो वर्त्म क्लिन्न (गीला) हो जाता है । इस अवस्था को 'वर्त्मकर्दम' कहते हैं ॥ ८६ ॥

वर्त्मकर्दमलक्षणमाह—क्लिष्टं पुनरित्यादि । क्लिष्टमिति प्रागुक्तस्य कर्तृत्वेनायमर्थः—क्लिष्टं क्लिष्टवर्त्मैव यदा पित्तलाभ्यासादधिकपित्तं सच्छोणितं विदहेद्विरुद्धदाहेन संयोजयेत्तदा क्लिष्ट(न्न)त्वमापादयति, (संक्लेदत्वमापन्नं वर्त्मकर्दम उच्यत इति योज्यम्[1] ।) 'ततः कृष्णत्वमापन्नम्' इत्यन्ये पठन्ति । तत्र कृष्णत्वं शोणितविदाहेनैव । एवं च सति कृष्णत्वेन कर्दमसंज्ञासमावेशोऽपि घटत[2] इति । कार्तिकस्त्वन्यथा व्याचष्टे—शोणितमिति कर्तृपदं तेन शोणितं पित्तयुक्तं कर्तृभूतं यदा पूर्वोक्तं क्लिष्टमेव विदहेदित्यादि सर्वमपरं समानं पूर्वेण । अस्य[3] तु सुश्रुते यत् सान्निपातिकत्वमुक्तं तत् कफपित्तरक्तारब्धत्वात्, वातकरणत्वस्याश्रुतेः॥

विमर्श—यह भी वर्त्मशोथ (Oedema of lid) का ही सपाकी (Inflammatory) प्रकार प्रतीत होता है । आरम्भ से इसके लक्षण पूर्वोक्त क्लिष्टवर्त्म के समान ही होते हैं किन्तु प्रबलपित्त और रक्त से पाक होने पर इसमें क्लिन्नता (गीलापन) आ जाती है । यह अवस्था नेत्र, नेत्रगुहा अथवा नेत्रसमीपस्थ अंगों के सपूय शोथ के उपद्रव स्वरूप उत्पन्न होती है ।

श्याववर्त्मलिङ्गमाह—

यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम् ।
तदाहुः श्याववर्त्मेति वर्त्मरोगविशारदाः ॥ ८७ ॥ (सु. उ. ३)

जिस अवस्था में वर्त्म बाहर और अन्दर से श्याववर्ण का सूजा हुआ वेदनायुक्त हो जाता है उसे वर्त्मरोग के ज्ञाता 'श्याववर्त्म' कहते हैं ॥ ८७ ॥

श्याववर्त्मलक्षणमाह—यद्वर्त्म बाह्यत इत्यादि । बहिरन्तश्च श्यावत्वं वातकृतम् । अत्रैव शूनं च जायत इत्यस्यान्ते 'सवेदनं सकण्डु च ह्यल्पक्लेदि त्रिदोषजम्'—इत्यपि केचित् पठन्ति तदप्युपपन्नं; कफात् कण्डूः, अल्पक्लेदि पित्तात्, सवेदनं वातात् । तत्रैव विदेहः—'दुष्टः श्लेष्मा मरुत् पित्तं वर्त्मनोऽश्रीयते यदा । अग्निदग्धनिभं श्यावं श्याववर्त्मेति तद्विदुः ॥' इति । अत्र वाताधिकत्वं बोद्धव्यम् ॥ ८७ ॥

विमर्श—यह भी त्रिदोषज रोग है जैसा कि विदेह के कथन से स्पष्ट है—दुष्टः श्लेष्मा मरुत् पित्तं वर्त्मनोऽश्रीयते यदा । अग्निदग्धनिभं श्यावं श्याववर्त्मेति तद्विदुः ॥ अर्थात् जब दुष्ट कफ, पित्त और वायु पलकों में संचित होते हैं तब पलकें आगे से जली हुई के समान श्याव (काली) हो जाती है उसे 'श्याववर्त्म' कहते हैं । कुछ लोग इस श्लोक के बीच में (दूसरे-तीसरे चरणों के बीच में) 'सवेदनं सकण्डु च ह्यल्पक्लेदि त्रिदोषजम्' इतना और अधिक पाठ करते हैं जिसका

---

१. 'पूर्वोक्तलक्षणमेव वर्त्म शोणितं कर्तृ विदहेद्दूषयति । पित्तयुतमिति कफदुष्टमपि रक्तं पित्तकृद्द्रव्याभ्यासात् पित्तमधिकं जातं, ततः क्लिन्नत्वमापन्नमिति आर्द्रतामापन्नं वर्त्मकर्दम इत्युच्यते' क. ।

२. 'तदा क्लिन्नत्वेनापि कर्दमानुकारो बोद्धव्यः' क. ।

३. 'न तु कृष्णत्वमात्रेणायं पित्ताधिकसन्निपातजः' क. ।

अर्थ है, 'वेदना और खुजली युक्त और थोड़ा क्लेदयुक्त एवं त्रिदोषज होता है। इन लक्षणों को देखते हुए यह भी वर्त्मशोथ (Oedema of lid) का ही अभिघातज (Traumatic or Ecchymosis) और विशेषतः कीट-दंश (Sting of insects) जनित प्रकार प्रतीत होता है।

प्रक्लिन्नवर्त्मलक्षणमाह—

अरुजं बाह्यतः शूनं वर्त्म यस्य नरस्य हि।
प्रक्लिन्नवर्त्म तद्विद्यात् क्लिन्नमत्यर्थमन्ततः॥ ८८॥ (सु. उ. ३)

इसमें वर्त्म बाहर से शोथयुक्त एवं पीडारहित होता है किन्तु अन्दर इसमें क्लेद तथा स्राव होता है अतः इसे 'प्रक्लिन्नवर्त्म' कहते हैं॥ ८८॥

प्रक्लिन्नवर्त्मलक्षणमाह—अरुजमित्यादि। अरुजमल्परुजम्। बाह्यतः शूनमिति बहिः शोथयुक्तम्। क्लिन्नमत्यर्थमन्तत इति अन्तत उपान्ते क्लेदवत्। गदाधरस्तु क्लिन्नमन्तरिति विवृणोति। एतच्च चक्षुष्येण पिल्लाख्यया पठितम्। तथा हि—'भृशं प्रक्लिद्यते वर्त्म कण्डूमन्मन्दवेदनम्। विद्यात् प्रक्लिन्नवर्त्मेति तत् पिल्लं सन्निपातजम्॥' इति। यद्येवं कथं विदेहेऽक्लिन्नवर्त्म पिल्लाख्यया निर्दिश्यते। यथा-'प्रक्षालितेऽथवा मृष्टे आनह्येत पुनः पुनः। अपरिक्लिन्नवर्त्मेति तत्पिल्लमिति निर्दिशेत्॥' इति, किंच सुश्रुते प्रक्लिन्नवर्त्म श्लेष्मसंग्रहे पठितं; पिल्लं च सन्निपातजगणे; तत्कथं प्रक्लिन्नवर्त्म पिल्लमिति संगतम्? उच्यते—अक्लिन्नवर्त्मैव पिल्लं, तस्य सन्निपातजत्वात्, न तु प्रक्लिन्नवर्त्म, तस्य कफात्मकत्वात्; यदि तु प्रक्लिन्नवर्त्मैव कफोल्बणसन्निपातजं पिल्लत्वेनाभ्युपगम्यते, एतत् ख्यापनाय च तस्य कफजसर्वगणयोर्निवेशः कृत इति स्वीक्रियते, तदा सन्निपातजगणे पित्तेनाक्लिन्नवर्त्म न परिगृहीतं स्यात्; ततस्तदपरिग्रहे षट्सप्ततित्वोपसंहारो नेत्ररोगाणां न घटते, पञ्चसप्ततैरभिधानात्, पिल्लस्य प्रक्लिन्नवर्त्म स्वरूपत्वेनापृथक्त्वात्। ननु, एवं तर्हि कथं 'विद्यात् प्रक्लिन्नवर्त्मेति तत् पिल्लं सन्निपातजम्' इति समर्थयितव्यम्? उच्यते, ([1] अस्यायमर्थः प्रत्येतव्यः—यदा तदेव प्रक्लिन्नवर्त्म श्लेष्मात्मकमेव सद्वातपित्ताभ्यां विशेषकाभ्यामुपनिरुध्यते तदा सन्निपातजं सदपरिक्लिन्नवर्त्मार्थान्तरमासादयत् पिल्लमित्यभिधीयते, तथा चोभयोरप्यविरोधः, उभाभ्यामेवापरिक्लिन्नवर्त्मन एव पिल्लाख्यत्ववर्णनादिति। अयं च वाग्भटे कफोत्क्लिन्नाख्यतया निरुद्धः,) किंच यदि प्रक्लिन्नवर्त्म पिल्लं तत्पृथक्त्वेन चाक्लिन्नवर्त्म अभविष्यत्, तदास्यौपद्रविके सुश्रुतो दोषात्मकत्वेन साध्यादिभेदेन चाभिधानमकरिष्यत्, न च कृतं, तस्मादक्लिन्नवर्त्मनोऽवस्थान्तरमिति॥ ८८॥

विमर्श—आचार्य चक्षुष्य ने 'प्रक्लिन्नवर्त्म' को किन्तु विदेह ने वक्ष्यमाण 'अक्लिन्नवर्त्म' को 'पिल्ल' कहा है। दोनों ही में अविरोध स्थापित करने के लिए श्रीकण्ठदत्त ने बहुत विवेचन के साथ प्रयत्न किया है और अन्त में विदेह-वचन को ही प्राधान्य दिया है। वस्तुतः दोनों ही आचार्यों का मत ठीक है। प्रत्येक आचार्य अपने-अपने तन्त्र में स्वतन्त्र होता है। प्रत्यक्षदृष्ट्या दोनों ही एक ही रोग के प्रकार हैं। प्रस्तुत श्लोक में आए 'अन्ततः' शब्द का अर्थ किनारों पर कहने में 'जिस मनुष्य की पलकें बाहर से पीडारहित शोथयुक्त होती हैं किन्तु किनारों पर ही अधिक

---

१. अस्यायमर्थः प्रत्येतव्यः—तत्प्रक्लिन्नवर्त्मनोऽवस्थान्तरमक्लिन्नवर्त्म अवस्थावशाद्यदा विशेषवातपित्तसंश्लेषादल्पक्लेदं भवति तदा सन्निपातजं सत्पिल्लाख्यं भवति; तनूक्तस्वरूपं तादृशस्य तैर्लिङ्गैः कफजत्वात्, एतेन प्रक्लिन्नवर्त्मनोऽवस्थान्तरमक्लिन्नवर्त्म तत्पिल्लतया निर्दिश्यते अन्यथा चक्षुष्येण विरोधो दुर्वारः। इति क.

क्लेद होता है उसे 'प्रक्लिन्नवर्त्म' कहते हैं' यह अर्थ होता है। इस प्रकार यह आधुनिक विद्वानों द्वारा वर्णित वर्त्मान्त या वर्त्मधाराशोथ (Blepheritis) नामक रोग का निर्देश करता है। उसके दो भेद होते हैं—(१) सव्रण या क्लिन्न (Ulcerative) (२) अव्रण या शुष्क (Squamous) इस प्रकार सुश्रुतोक्त प्रक्लिन्नवर्त्म या चक्षुष्य का पिल्ल तथा आधुनिक सव्रण वर्त्मान्तशोथ और सुश्रुतोक्त अक्लिन्नवर्त्म या विदेहोक्त पिल्ल एवं आधुनिक अव्रण वर्त्मान्तशोथ एक ही प्रतीत होते हैं।

अक्लिन्नवर्त्मलक्षणं प्राह—

यस्य धौतान्यधौतानि संबध्यन्ते पुनः पुनः।
वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म तत् ॥ ८९ ॥ (सु. उ. ३)

जिसके वर्त्म बार-बार धोने पर या बिना धोये ही आपस में चिपक जाते हैं और वर्त्मों का पाक नहीं होता उसे 'अक्लिन्नवर्त्म' कहते हैं ॥ ८९ ॥

अपरिक्लिन्नवर्त्मनो लक्षणमाह—यस्य धौतानीत्यादि। एतद्वाग्भटे पिल्लाख्यम्। संबध्यन्ते अन्योन्यं लग्नानि भवन्तीत्यर्थः। तदिदं संबद्धत्वं किं पूयसंपर्कादेव, तथा च प्रक्लिन्नत्वमेव स्यात्तदर्थमाह—अपरिपक्वानीति। एतदेव पिल्लाख्यम्। अन्यत्र क्वचिच्च पिल्लाख्यमन्यथा पठितं—'पित्तश्लेष्मप्रकोपेण वर्त्मान्तः परिपाट्यते। ताम्रं निर्लोम तच्चापि विशिष्टं पिल्ललक्षणम् ॥' इति। एतदनादृतं, टीकाकृद्भिरव्याख्यातत्वात्। वाग्भटेन कुकूणकादीनामष्टादशानां पिल्लाख्या कृता। वर्त्मानीति बहुवचनं नेत्रद्वये वर्त्मचतुष्टयत्वेन संगच्छते तेन, नेत्रद्वयगत एवायं व्याधिरिति कार्तिकः ॥ ८९ ॥

विमर्श—आचार्य विदेह इसे 'पिल्ल' कहते हैं—

पित्तश्लेष्मप्रकोपेण वर्त्मान्तः परिपाट्यते।
ताम्रं निर्लोम यच्चापि विशिष्टं पिल्ललक्षणम् ॥

वर्त्मबन्धक से अक्लिन्नवर्त्म पर्यन्त के रोगों का समावेश वर्त्मशोथ की विभिन्न अवस्थाओं में हो जाता है। आधुनिक ग्रन्थों में इसके दो भेद मिलते हैं। १ वर्त्मशोथ (Oedema of lid) २ वर्त्मान्तशोथ (Blepheritis) इन दोनों के भी क्रमशः ४ और २ भेद होते हैं। वर्त्मबन्धक आदि सुश्रुतोक्त ४ रोग वर्त्मशोथ के और प्रक्लिन्न एवं अक्लिन्न वर्त्म आधुनिक वर्त्मान्त शोथ के सव्रण और अव्रण प्रकारों से सामञ्जस्य रखते हैं। (श्लोक ८४ से ८८ तक का विमर्श भी देखिये।) विदेह ने 'पिल्ल' रोग में वर्त्म का निर्लोम होना विशिष्ट लक्षण बतलाया है। इसी लक्षण वाले पक्ष्मशात नामक रोग का संग्रह किसी ग्रन्थ से माधव ने किया है। वाग्भट ने भी उसका वर्णन किया है पर सुश्रुत ने नहीं क्योंकि वस्तुतः उसका समावेश इसी रोग में हो जाता है।

इस श्लोक में 'वर्त्मानि' यह बहुवचन प्रयोग दोनों आँखों में दो-दो वर्त्म (पलकें) होने से चारों का निर्देश के लिये हैं। इससे यह रोग चारों पलकों में होता है इसका भी निर्देश होता है।

वातहतवर्त्मलक्षणं व्याचष्टे—

विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य न मील्यते।
एतद्वातहतं वर्त्म जानीयादक्षिचिन्तकः ॥ ९० ॥ (सु. उ. ३)

(वर्त्म और शुक्लगत) सन्धि के विश्लिष्ट हो जाने पर चेष्टारहित होकर जब पलक बन्द नहीं होती तो उसे नेत्ररोगविशेषज्ञ 'वातहतवर्त्म' कहते हैं ॥ ९० ॥

वातहतवर्त्मलक्षणमाह—विमुक्तसन्धीत्यादि। विमुक्तो विश्लिष्टो वर्त्मशुक्लगतः सन्धिर्यस्मात् तत्तथा, स्थानच्युतसन्धि। निश्चेष्टं निमेषोन्मेषरहितम्। सन्धिविश्लेषादेव तदाश्रयाणां निमेषोन्मेषकारिणीनां सिराणामपि विश्लेषेण निमेषोन्मेषरहितत्वमित्यभिप्रायः। अत एवोक्तं न मील्यते न संकुचतीत्यर्थः। 'निमील्यत' इति पाठान्तरं, तत्र निमीलितमेव तिष्ठतीत्यर्थः। इदं युक्तं, दृष्टत्वात्। एतन्न साध्यं, सुश्रुतेऽसाध्यप्रकरणे पठितत्वादिति ॥९०॥

विमर्श—इस अवस्था को अक्षिपुट-निमीलनाभाव (Lagophthalmos) कह सकते हैं। इस अवस्था में पलक अक्षिपुट को पूर्णतया आवृत नहीं कर पाते। आँख के निरन्तर खुले रहने से नेत्रश्लेष्मावरण और कृष्णमण्डल के आघात का भय रहता है। इस प्रकार की अवस्था सातवीं शीर्षण्य नाडी (VII Cranial nerve) के घात (Paralysis) से नेत्रनिमीलिनी पेशी (Orbicularis muscle) के क्रियाहीन होने से उत्पन्न होती है। इसके अतिरिक्त नेत्रवर्त्म के बाह्यावर्तन (Ectropion) में भी यह अवस्था हो सकती है। कुछ स्थानों पर 'न मील्यते' के स्थान पर 'निमील्यते' पाठ मिलता है उसके आधार पर कुछ विद्वान् इसे आधुनिक वर्त्मपात (Ptosis) रोग से तुलना करते हैं किन्तु उसका सादृश्य वक्ष्यमाण 'निमेष' रोग से ही करना उचित प्रतीत होता है। (निमेष श्लोक ९२ का विमर्श देखें)

अर्बुदं लक्षयति—

वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम्।
आचक्षीतार्बुदमिति सरक्तमविलम्बितम् ॥ ९१ ॥ (सु. उ. ३)

पलक के भीतरी भाग में उत्पन्न होने वाले विषम, अल्प पीडा युक्त, लालवर्ण के और शीघ्र बढ़ने वाले ग्रन्थिरूप रोग को 'वर्त्मार्बुद' कहते हैं ॥ ९१ ॥

अर्बुदलक्षणमाह—वर्त्मान्तरस्थमित्यादि। वर्त्मनोऽभ्यन्तरस्थं, बाह्येऽप्युन्नतत्वदर्शनात्[1]विषमम् ग्रन्थिभूतं ग्रन्थिरूपेण स्थितम्। अवेदनमिति ईषदर्थे नञ्, तेन ग्रन्थिरिवाल्पवेदनमित्यर्थः, वेदना च वातानुबन्धेनैव। सरक्तमिति किंचिद्रक्तं, पित्तानुबन्धात्। अविलम्बितं शीघ्रजन्मेत्यर्थः। केचिदत्र क्रियाविशेषणं ब्रुवते, तेनायमर्थः—विलम्बितं शीघ्रमाचक्षीतार्बुदमिति; किं त्वेतन्न सङ्गतम्, अस्य व्याख्यानस्य निष्प्रयोजनत्वात्। अन्ये तु 'अवलम्बितम्' इति पठन्ति। एतत् सन्निपातजम् (अपाकि च, तच्च [2]कफेन) ॥ ९१ ॥

विमर्श—पलकों पर भी अन्य स्थानों की ही भाँति अनेक सौम्य या घातक अर्बुद हो सकते हैं। विषमता और शीघ्र बढ़ना वह दोनों ही घातक प्रकार का ही निर्देश करते हैं किन्तु इसे सान्निपातिक होते हुए भी साध्य माना गया है। अतः यह विषय और भी विचार की अपेक्षा रखता है। कुछ लोग 'अविलम्बितम्' के स्थान पर 'अवलम्बि च' या 'अवलम्बितम्' अर्थात् 'लटकने वाला' यह पाठ स्वीकार करते हैं।

निमेषलक्षणमाह—

निमेषिणीः सिरा वायुः प्रविष्टः सन्धिसंश्रयाः।
प्रचालयति वर्त्मानि निमेषं नाम तद्विदुः ॥ ९२ ॥ (सु. उ. ३)

जब (वर्त्मशुक्लगत) सन्धि में रहने वाली सिराओं में वायु प्रविष्ट होकर पलकों को अत्यधिक चलायमान कर देती है तो उस रोग को 'निमेष' कहते हैं ॥ ९२ ॥

---

१. 'विषमं वर्तुलम्' क.। २. अयं पाठः क. पुस्तके नोपलभ्यते। ३. 'वर्त्म' इति क.।

निमेषलक्षणमाह—निमेषिणीरित्यादि। निमेषिणीः निमेषकारिकाः सिराः। सन्धिसंश्रया इति वर्त्मशुक्लगता इत्यर्थः। अयमसाध्यो वातजः। चक्षुष्येण चोन्मेषणीः सिरा इत्युक्तं, तदाह—'उन्मेषणीः सिरा वायुः प्रविश्य चावतिष्ठते। अत्यर्थं चालयेद्वर्त्म निमेषः स न सिध्यति ॥' इति ॥ ९२ ॥

विमर्श—यह वातज और असाध्य रोग कहा गया है। वाग्भट के वर्णनानुसार कुछ विद्वान् 'प्रचाकुयति' का 'चञ्चल होना' या 'आंख फड़कना' अर्थ मानते हैं। उनके मत से तीसरी या सातवीं शीर्षण्य नाड़ियों के विकार स्वरूप रोग की उत्पत्ति होती है। इसे आधुनिक विद्वान् (Blepherospasm) कहते हैं। किन्तु 'वातहतवर्त्म' के द्वारा आंखों के ढकने में पलकों का असमर्थ होना बतलाया गया है। प्रसङ्गतः उसके खोलने में असमर्थ होने का वर्णन भी युक्तिसंगत प्रतीत होता है। आचार्य चक्षुष्य ने तो स्पष्ट ही उन्मेषणी (नेत्रोन्मीलनी) सिराओं में वायु का स्थिर होकर वर्त्म का चालन करना बतलाया है। अतः 'प्रचालयति' का अर्थ 'स्थानभ्रष्ट कर देता है' स्वीकार करना भी उचित है। नेत्रोन्मीलनी पेशी के अपूर्ण विकास या वध (paralysis) के कारण ही ऊपरी पलक नीचे की ओर लटकी रहती है जिससे रोगी की आंखें ढपी रहती हैं। जब रोगी को सामने देखना होता है तो वह गर्दन को पीछे की ओर झुका लेता है और ललाट देश की पेशियों को ऊपर पलक खींचने में सहायता लेता हैं जिससे ललाट देश में झुर्रियां पड़ जाती हैं। यह रोग भी वातज और शस्त्रकर्म के बिना असाध्य ही होता है। आधुनिक विद्वान् इसे 'टोसिस' (Ptosis) कहते हैं। ध्यान रहे आंखों का फड़कना न तो स्थायी होता है और न असाध्य ही। फिर भी यदि 'चालयन् वर्त्मनी वायुर्निमेषोन्मेषणं मुहुः। करोत्यरुङ्निमेषोऽसौ' इस वाग्भट-वचनानुसार इसे वर्त्म का आक्षेप ही माना जाये तो पूर्वोक्त 'वातहतवर्त्म' के लक्षण में सुश्रुतानुसार 'न मील्यते' और वाग्भटानुसार 'निमील्यते' इन दोनों पाठों को स्वीकार कर 'वातहतवर्त्म' के दो प्रकार स्वीकार करने पड़ेंगे। (१) निमीलनाक्षम (Lagophthalmos) (२) उन्मीलनाक्षम (Ptosis)।

शोणितार्शोलक्षणं प्राह—

यः स्थितो [१]वर्त्ममध्ये तु लोहितो मृदुरङ्कुरः।
तद्रक्तजं शोणितार्शश्छिन्नं छिन्नं प्रवर्धते ॥ ९३ ॥ (सु. उ. ३)

पलक में जो लालवर्ण का कोमल अंकुर उत्पन्न होता है उस रक्तज विकार को शोणितार्श कहते हैं। काटने पर इनकी बार-बार वृद्धि हो जाती है ॥ ९३ ॥

शोणितार्शोलक्षणमाह—यः स्थित इत्यादि। अङ्कुराकारो मांसोच्छ्रयोऽङ्कुरः। एतदसाध्यं, तथा च विदेहः—'वायुः शोणितमादाय सिराणां प्रमुखे स्थितः। जनयत्यङ्कुरं ताम्रं वर्त्मनि च्छिन्नरोहणम् ॥ तच्छोणितार्शोऽसाध्यं स्याद्रक्तस्राव्यथ नीरुजम्' इति ॥ ९३ ॥

विमर्श—बार-बार होने के कारण इस विकार को असाध्य माना है। इनका आकार मस्सों (Warts) जैसा होता है। इनमें जलन और खुजली होती है। पूर्वोक्त 'अर्शोवर्त्म' और 'शुष्कार्श' पक्ष्ममूल के पास होते हैं और यह शोणितार्श वर्त्म में कहीं भी हो सकता है। यही इनका परस्पर भेदक लक्षण है। अथवा इसे रक्तज अर्श (Neavus) मान सकते हैं। वाग्भट ने तो इसकी

---

१. 'वर्त्मस्थो योऽभिवर्धेत' क.। २. तद्रक्तजं शोणितार्शस्तद्वै छिन्नं छिन्नं प्रवर्धते।

उत्पत्ति वर्त्म के भीतर मानी है तथा उन्हीं के समान विदेह ने भी इसमें रक्तस्रावहीन भी बतलाया है।

लगणाख्यं व्याधिं प्राह—

अपाकी कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः।
लगणो नाम स व्याधिर्लिङ्गतः परिकीर्तितः ॥९४॥ (सु. उ. ३)

पलक में होनेवाली पाकरहित, कठिन, स्थूल और पीडारहित ग्रन्थि को लगण कहते हैं॥

लगणलक्षणमाह—अपाकीत्यादि। अपाकित्वादिकं श्लेष्मारब्धत्वादेव। तथा च सात्यकिः—'वर्त्मोपरिष्टाद्यो ग्रन्थिः कठिनो न विपच्यते। नीरुजो लगणो नाम रोगः श्लेष्मसमुद्भवः॥' इति ॥ ९४ ॥

विमर्श—यह श्लेष्मज व्याधि है; क्योंकि इसमें पाक नहीं होता।

इसे पलक के बाहर का सौम्य या साध्य अर्बुद कह सकते हैं। कुछ लोग इसे जलपिण्डग्रन्थि (Meibomian cyst) मानते हैं (विशेष वर्णन उत्सङ्गिनी के विमर्श में देखें) किन्तु यह इतनी बड़ी नहीं होती तथा इसमें कभी-कभी पाक भी हो जाता है और लगण में पाक कदापि नहीं होता।

बिसवर्त्मलक्षणमाह—

त्रयो दोषा बहिःशोथं कुर्युश्छिद्राणि वर्त्मनोः।
प्रस्रवन्त्यन्तरुदकं बिसवद्बिसवर्त्म तत् ॥९५॥ (सु. उ. ३)

तीनों दोष पलकों में बाह्यशोथयुक्त छिद्र उत्पन्न कर देते हैं। कमलनाल के समान इनसे आन्तरिक जल का स्राव होता रहता है। इसी लिये इस रोग को बिसवर्त्म कहते हैं॥ ९५॥

बिसवर्त्मलक्षणमाह—त्रयो दोषा इत्यादि। बहिःशोथमिति बहिरुच्छूनत्वं यथा भवति तथा वर्त्मनोश्छिद्राणि दोषास्त्रयः कुर्युरित्यर्थः। तानि छिद्राणि अन्तर्मुखान्येव, यदाह—प्रस्रवन्त्यन्तरुदकमिति। छिद्राणीति बहुवचननिर्देशाद्बहुमुखानि, अत्रापि दोषाः कुर्युरिति संबन्धः। अत एव बिसवन्मृणालवत्, तच्चानेकच्छिद्रयुक्तं भवति तद्वत्। अत्रैव चन्द्रिकाकारः सुश्रुते पठति-'शूनं यद्वर्त्म बहुभिः श्लक्ष्णैश्छिद्रैः समन्वितम्। वर्त्मान्तरे बिसमिव बिसवर्त्मेति तत् स्मृतम्॥' इति। सात्यकिरप्याह—'बिसस्योपचितस्येव बहुमांससिरामुखम्'। बिसवर्त्मेति जानीयाद् दुश्चिकित्स्यं त्रिदोषजम्' इति ॥ ९५ ॥

विमर्श—अर्वाचीन पीतसर्षपिका (Kanthalasma) नामक रोग के समान इसके लक्षण होते हैं। यह रोग वृद्धा स्त्रियों में अधिक होता है।

कुञ्चनस्य लक्षणमाह—

वाताद्या वर्त्मसंकोचं जनयन्ति मला यदा।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः॥ ९६ ॥ (सु. उ. ३)

वात आदि दोष जब पलक का संकोच कर देते हैं तो रोगी देखने में असमर्थ हो जाता है। इस अवस्था को कुञ्चन कहते हैं॥ ९६॥

---

१. 'सकण्डुः पिच्छिलः कोलसंस्थानो लगणस्तु सः' क.।

कुब्जनलक्षणमाह—वाताद्या इत्यादि । मला इत्यस्याभिधानं दुष्टत्वप्रतिपादनार्थं, यतो 'मलिनीकरणान्मला' इत्युच्यन्ते । कुब्जनं च कस्यापि तन्त्रस्य माधवकरेण लिखितं न सौश्रुतं, तेन सुश्रुतोक्तषट्सप्ततिसंख्या न हीयते, एवं वक्ष्यमाणेऽपि पक्ष्मशाते बोद्धव्यम् ॥ ९६ ॥

विमर्श—कुछ विद्वान् आधुनिकदृष्टया इसे वर्त्म का अपचय (Atrophy of lid) मानते है किन्तु उसमें देखने में असमर्थता का कोई कारण नहीं प्रतीत होता। अतः इसे आधुनिक वर्त्म-जाड्य (Ankylohlepheron) मानना उचित प्रतीत होता है। इसमें दोनों पलकें आपस में संसक्त हो जाती हैं जिससे नेत्रच्छिद्र बहुत संकुचित हो जाता है। पलकों के पूरा न खुलने से देखने में भी बाधा या असमर्थता होती है। यह संसक्ति आंशिक (Partial) या पूर्ण (Complete) एवं सहज और जातोत्तर भी हो सकती है। बहुधा साथ में वर्त्म-कृष्ण संसक्ति (Symblepheron) भी रहती है।

सुश्रुत ने इसका वर्णन नहीं किया है अतः सुश्रुत ने जो ७६ नेत्ररोगों की प्रतिज्ञा की है उसमें कोई दोष नहीं आता।

पक्ष्मकोपं लक्षयति—

प्रचालितानि वातेन पक्ष्माण्यक्षि विशन्ति हि ।
घृष्यन्त्यक्षि मुहुस्तानि संरम्भं जनयन्ति च ॥ ९७ ॥
असिते सितभागे च मूलकोपात् पतन्त्यपि ।
पक्ष्मकोपः स विज्ञेयो व्याधिः परमदारुणः ॥९८॥ (सु.उ.२)

वायु के द्वारा विरुद्ध दिशा में मोड़े गये पक्ष्म (Eye lashes) आँख में प्रविष्ट हो जाते हैं और बार-बार नेत्रगोलक पर रगड़ खाते हैं जिससे श्वेत और कृष्ण दोनों भागों में शोथ उत्पन्न हो जाता है; पक्ष्म अपने मूलकोप से गिरने भी लगते हैं; इस भयंकर व्याधि को 'पक्ष्मकोप' कहते हैं ॥

पक्ष्मकोपलक्षणमाह—प्रचालितानीत्यादि । प्रचालितानि प्रकर्षेण चालितानि, प्रतीपीकृतानीत्यर्थः । पक्ष्माणि वर्त्मरोमाणि वातचालितानि सन्ति नेत्रं प्रविशन्ति अन्तर्मुखानि वर्त्मन इत्यर्थः । तान्यसिते कृष्णमण्डले, सितभागे शुक्लमण्डले वा अक्षि घृष्यन्ति घर्षयन्तीत्यर्थः । अत एव संरम्भं शोथं जनयन्ति । मूलकोपात् [1]पक्ष्मकोपात्, पतन्त्यपीति 'पक्ष्माणि' इति शेषः, अपिशब्दाच्च पतन्ति च । त्रिदोषजश्चायं, प्रचालने वातमात्रकारणत्वमुक्तं; तथा च चन्द्रिकाकारः पाठान्तरं पठति—'पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च । निर्वर्त्तयन्ति पक्ष्माणि तैर्घृष्टं चाक्षि दूष्यते ॥ उद्धृतैरुद्धृतैः शान्तिः पक्ष्मभिश्चोपजायते ।' इति । अतः पक्ष्माशयो वर्त्म । विदेहोऽप्याह—'यस्य वातसंबन्धेन दोषाः प्रकुपितास्त्रयः' इत्यादिनेति । कल्याणविनिश्चये उपपक्ष्म पठ्यते—'पक्ष्मोपरोधो वातेन कोठोऽन्तर्मुखरोगवान् । रोमैरन्तर्मुखैरन्यैरुपपक्ष्म मलैस्त्रिभिः ॥' इति । उपपक्ष्मणि यादृशी पूर्वसिद्धा तादृश्यपराऽन्तर्मुखी पक्ष्मपङ्क्तिरिति भेदः, अस्य पक्ष्मोपरोधविशेषत्वात् समानचिकित्स्यत्वाच्च पृथगिहानभिधानम् ॥ ९७–९८ ॥

विमर्श—कभी पक्ष्म (बरौनी) के कुछ बाल अस्वाभाविक रूप में भीतर की ओर को मुड़ जाते हैं और शुक्ल एवं कृष्ण मण्डल पर रगड़ने से क्षोभ और शोथ आदि उत्पन्न करते हैं। साधारण बोल-चाल में इस रोग को 'परवाल' कहा जाता है। कभी-कभी पक्ष्म-धारा के स्वाभाविक बालों के अतिरिक्त अन्दर की ओर बालों की एक दूसरी पङ्क्ति भी पलकों में उत्पन्न हो जाती है।

---

१. 'मूलस्थानात्' क. ।

इसका कारण पक्ष्माशय या बरौनी के मूल में दोषों का अवस्थान है। प्राकृत पक्ष्मों की दिशा बाहर की ओर होती है किन्तु इस द्वितीय धारा की दिशा अन्दर नेत्र की ओर होती है, जिससे परवाल निरन्तर श्वेत और कृष्णभाग पर रगड़ कर उनमें शोथ उत्पन्न कर देते हैं। इसके निम्न लक्षण होते हैं—

(१) सतत अश्रुस्राव (Lacrymation) (२) नेत्रकला में क्षोभ तथा पीडा (३) प्रकाशसंत्रास (Photophobia) (४) अव्रण शुक्र (Opacity) तथा सव्रण शुक्र (Ulceration of cornea)

आधुनिक ग्रन्थों में स्वाभाविक बालों के भीतर की ओर मुड़ने को 'ट्रिकियेसिस' (Triciasis) और दूसरी पक्ष्मपङ्क्ति को डिस्ट्रिकियेसिस (Districhiasis) कहते हैं; इसके अतिरिक्त वर्त्म के अन्तर्विवर्तन (Entropion) में भी यह दशा पायी जाती है। नेत्रकला के चिरकालीन शोथ तथा रोहों के उपद्रवस्वरूप पलक की तरुणास्थि मोटी हो जाती है। अन्त में वह अन्दर को मुड़कर यह अवस्था उत्पन्न करती है। कभी-कभी नेत्र की निमीलनी पेशी (Orbicularis muscle) में खिंचाव होने से भी यह दशा उत्पन्न हो सकती है। इसके लक्षण भी पूर्ववत् ही होते हैं।

गदाधरसम्मत पाठान्तर में पक्ष्मकोप का वर्णन निम्नलिखित रूप में भी मिलता है—

दोषाः पक्ष्माशयगतास्तीक्ष्णाग्राणि खराणि च। तिर्वर्तयन्ति पक्ष्माणि तैर्घृष्टं चाक्षि दूयते॥
उद्धृतैरुद्धृतैः शान्तिः पक्ष्मभिश्चोपजायते। वातातपानलद्वेषी पक्ष्मकोपः स उच्यते॥

अष्टांगहृदय और कल्याणविनिश्चय आदि ग्रन्थों में पूर्वोक्त तीनों ही प्रकारों का सुस्पष्ट वर्णन मिलता है, यथा—

पक्ष्मोपरोधे संकोचो वर्त्मनोर्जायते तथा। खरतान्तर्मुखत्वं च रोम्णामन्यानि वा पुनः॥
कण्टकैरिव तीक्ष्णाग्रैर्घृष्टं तैरक्षि शूयते। उच्यते चानिलादिद्विड्ल्पाहःशान्तिरुद्धृतैः॥
(अ. हृ. उ. तं. ८)

अर्थात् जब वर्त्मों का संकोच इस प्रकार हो जाता है कि रोम (पक्ष्म) खर और अन्तर्मुख हो जाते हैं अथवा स्वाभाविक रोमों में ही खरता और अन्तर्मुखता आ जाती है या अन्य रोमपंक्ति का उद्गम हो जाता है तो नेत्रों में घर्षणादि करते हैं।

कल्याणविनिश्चय में दूसरी पंक्ति के उद्गम को 'उपपक्ष्म' संज्ञा दी गयी है। व्यावहारिक सुविधा एवं आधुनिक वर्णन से तुलना की दृष्टि से पूर्वोक्त तीनों संज्ञाओं को विशिष्ट अर्थ में रूढ मानना उचित होगा। यथा :—

(१) वर्त्मसंकोच या पक्ष्मावरोध=Entropion. (२) पक्ष्मवर्तन या पक्ष्मकोप=Trichiasis
(३) उपपक्ष्म=Districhiasis.

पक्ष्मशातं प्राह—

वर्त्मपक्ष्माशयगतं पित्तं रोमाणि शातयेत्।
कण्डूं दाहं च कुरुते पक्ष्मशातं तमादिशेत्॥ ९९॥

वर्त्मपक्ष्म के आशय में रहने वाला पित्त पलक के बालों को गिरा कर नेत्र में खुजली और जलन उत्पन्न कर देता है। इस अवस्था को 'पक्ष्मशात' कहते हैं॥ ९९॥

सर्वनेत्ररोगाणां संग्रहं वर्णयति—

(नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः।
शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः॥ १॥

सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु।
बाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ॥ २॥) (सु. उ. ३)

(सन्धि में ९, वर्त्म में २१, शुक्ल भाग में ११, कृष्ण भाग में ४, सर्वगत १७, दृष्टिगत १२ और बाह्यज २ भयंकर रोग होते हैं॥ १-२॥)

इति श्रीमाधवकरविरचिते माधवनिदाने नेत्ररोगनिदानं समाप्तम्॥ ५९॥

पक्ष्मशातलक्षणमाह—वर्त्मेत्यादि। पक्ष्माशयोऽत्र पक्ष्ममूलं शातयेदुन्मूलयेदित्यर्थः। अयं[1] च कफपैत्तिकः, कण्डूदाहवत्वात्। तत्र कृच्छ्रोन्मीलनं वाग्भटः पठति—'रोगान् कुर्याच्चलस्तत्र प्राप्य वर्त्माश्रयाः सिराः। सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनम्॥ पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमश्रु च। विमर्दनात् स्याच्च शमः कृच्छ्रोन्मीलं वदन्ति तम्' (वा. उ. ८) एकविंशतिर्व्याधयः समाप्ताः॥ ९९॥ इतिवर्त्मगताः।

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां नेत्ररोगनिदानं समाप्तम्॥ ५९॥

विमर्श—कुछ विद्वान् पक्ष्मशात को पक्ष्ममूल में स्थित सूक्ष्मकीटजनित मानते हैं और कुछ वर्त्मपक्ष्म-सन्धि-(वर्त्मान्त या वर्त्मधरा)-शोथ (Blepheritis) मानते हैं। सुश्रुत ने इस रोग का पृथक् वर्णन नहीं किया है। यह कफपित्तज व्याधि है; क्योंकि इसमें खुजली और दाह दोनों होते हैं। वाग्भट ने कृच्छ्रोन्मीलन नामक एक रोग का वर्णन अधिक किया है:—

वायु वर्त्माश्रित सिराओं में पहुँचकर विविध लक्षणों को पैदा करती है। इससे सोकर उठने पर पलकों में स्तम्भ हो जाता है। आँखों में शूक से भरे प्रतीत होते हैं, आँखें कष्ट से बन्द होती हैं और उनसे अश्रुस्राव होता रहता है। मर्दन से इन लक्षणों की शान्ति हो जाती है। इस रोग को 'कृच्छ्रोन्मीलन' कहते हैं। (मूल श्लोक मधुकोश व्याख्या में देखिए।)

सुश्रुत के अनुसार कुल नेत्र रोगों की संख्या ७६ होती है किन्तु माधव ने कुञ्चन और पक्ष्मशात का अधिक उल्लेख किया है अतः इनके अनुसार नेत्र रोगों की संख्या ७८ हो जाती है। सुश्रुत ने भी बालरोगाध्याय में 'कुकूणक' नामक एक नेत्र रोग का उल्लेख किया है किन्तु वह बालकों में ही होता है अतः उसका संग्रह यहाँ नहीं किया है। यह ७६ नेत्र रोग, बाल, वृद्ध युवा, स्त्री, पुरुष सभी को हो सकते हैं।

समाप्तं चेदं नेत्ररोगनिदानम्।

---

१. 'कण्डूरत्र पित्तदूषितरक्तभवा' इति क.।

अथ शिरोरोगनिदानम्

कारणभेदेन शिरोरोगभेदं दर्शयति—

शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः ।
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥
सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैः ॥ १ ॥ (सु. उ. २५)

वात, पित्त, कफ, सन्निपात, रक्त, क्षय, क्रिमि, सूर्यावर्त, अनन्तवात, अर्धावभेदक तथा शङ्खक नामों से (ग्यारह) शिरोरोगों की उत्पत्ति होती है ॥ १ ॥

अथ[1] कर्णनासानेत्राणामधिष्ठानत्वेन शिरसो नयनरोगानन्तरं शिरोरोगनिदानारम्भः। शिरोरोगाश्चैकादश, तत्र कारणभेदेन शिरोरोगभेदं दर्शयन्नाह–शिरोरोगा इत्यादि। वात-पित्तकफैरित्युक्ते गम्यत एव त्रिभिरिति; तत्कथं तदुक्तिः[2] ? उच्यते—सर्वेषां शिरोरोगाणां सन्निपातजत्वख्यापनार्थं, वातादिभिश्चोत्कर्षात्; तदुक्तं शालाक्ये—सर्व एव शिरोरोगाः सन्निपातसमुत्थिताः। औत्कट्याद्दोषलिङ्गैस्ते कीर्तितास्तद्विदा दश ॥'–इति। त्रिभिः सन्निपातेनेति पदद्वयेन प्रकृतिविकृतिसमवेतसन्निपातद्वयमाहुरन्ये। अत्र पक्षे सन्निपातजत्वादेकत्वगणनया न संख्यातिरेकः; त्रिभिरिति पदं [3]पृथकत्वद्योतनार्थमिति गदाधरः। क्षयेणेति, असृग्वसादीनां क्षयेण; क्षयजोऽयं धातुक्षयजनितवातकोपेन सहसाकृतवातजन्यत्वेनापचय-पूर्वकः, वातजस्तु सञ्चयप्रकोपजनित इति भेदः; अत एवानुपशयोऽप्यस्य संस्वेदनादिना [4]शुक्रक्षयकृदेवोपन्यस्तः। शिरोरोगशब्देन शिरोगतशूलरूपा रुजाऽभिधीयते, तेन सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैरित्यभिधानमुपपद्यते अन्यथा तेषामेव शिरोरोगत्वात्तैः शिरोरोगा जायन्त इत्यसंगतं स्यात् ॥ १ ॥

विमर्श—प्राचीन शालाक्य तन्त्र में मुखरोग, नासारोग, कर्णरोग तथा नेत्ररोग के समान सिर के रोगों का भी वर्णन मिलता है। शिरोरोग कहने से सामान्यतया सिर में होने वाले सम्पूर्ण रोगों का ग्रहण करना चाहिये। कुछ विद्वानों ने इसी प्रकार का संग्रह किया भी है। किन्तु प्राचीन आयुर्वेद के संहिता ग्रन्थों में इस प्रकार का वर्गीकरण नहीं मिलता। उन्होंने सिर की विद्रधि, ग्रन्थि, अर्बुद आदि का वर्णन शल्यतन्त्रान्तर्गत उन उन रोगों में किया है। इसी तरह कुछ रोगों का कायचिकित्सा में और कुछ का क्षुद्र रोगों (अरूंषिका, दारुणक, खालित्य, पालित्य आदि) में समावेश कर दिया है। प्रकृत में शिरोरोग से सिर के शूल का ग्रहण करना चाहिये। यदि इस से सिर के सभी रोगों का ग्रहण किया जाय तो 'सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैः' सुश्रुत का यह वचन व्यर्थ होता है; क्योंकि सूर्यावर्त आदि स्वयं भी सिर के रोग हैं वे पुनः सिर के किन रोगों को उत्पन्न करते हैं। इसके अतिरिक्त प्राचीन ग्रन्थों में भी सिर में होने वाले विभिन्न रोगों का वर्णन इससे पृथक् ही किया गया है। इस प्रकार शिरोरोग से सिर के शूल का ही ग्रहण किया जाता है। मधुकोशकार और चक्रपाणि का भी यही मत है—'शिरोरोगशब्देन शिरोगतशूलरूपा रुजाभिधीयते, तेन सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैरित्यभिधानमुपपद्यते

१. 'शिरःसंश्रितान् श्रवणादिरोगानभिधायोर्ध्वजत्रुगतपारिशेष्यादाश्रयभूतशिरोरोगनिदानम्' क.।
२. 'तत्किमर्थं पुनरभिधानं' क.। ३. 'द्योतनार्थं' क.। ४. 'शुद्धिकृदेवोपन्यस्तः' क.।

अन्यथा तेषामेव शिरोरोगत्वात्तैः शिरोरोगा जायन्त इत्यसंगतं स्यात्' (मधुकोष) 'तेन नार्रूपिकादयोऽत्र प्रकरणे शिरोरोगशब्देनोच्यते शिरोरोगशब्दस्य शूल एव रुजाकरे वृत्तत्वात्' (चक्रपाणिः)।

सुश्रुत ने उपर्युक्त ग्यारह शिरोरोगों का वर्णन किया है। भावप्रकाश तथा योगरत्नाकर में भी शिरोरोगों की यही संख्या बताई गई है। कुछ विद्वान् नेत्ररोगोक्त अन्यतोवात और अनन्तवात को एक मानकर केवल दस ही भेद मानते हैं—

'सूर्यावर्तावभेदाभ्यां शङ्खकेन तथैव च। दशप्रकारस्याप्यस्य लक्षणं संप्रवक्ष्यते ॥

वस्तुतः यह ठीक नहीं, क्योंकि उक्त दोनों रोग भिन्न हैं—अन्यतोवात वातिक एवं नेत्र रोग है, सुश्रुत ने उसका पाठ वातिक गण में किया है—

'याप्योऽथ तन्मयः काचः साध्याः स्युः सान्यमारुताः।'

और अनन्तवात त्रिदोषज व्याधि है—

'अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम्।'

प्रधानता के आधार पर वात, पित्त और कफ तीनों से अलग-अलग शिरोरोग की उत्पत्ति वर्णित है वास्तव में सभी शिरोरोग त्रिदोषज होते हैं—

सर्व एव शिरोरोगाः सन्निपातसमुत्थिताः। औत्कट्याद्दोषलिङ्गैस्ते कीर्तितास्तद्विदा दश ॥

त्रिदोषज होते हुए भी दोष की उल्वणता के अनुसार वातिक आदि व्यवहार होता है। इन के अतिरिक्त भी अनेक रोग सिर में होते हैं किन्तु ये अधिक महत्व के होने से पृथक् वर्णित हैं। अतएव चरक ने सुस्पष्ट शब्दों में कहा है—'अतः शिरोविकाराणां कश्चिद्भेदः प्रवक्ष्यते। (च. सि. ९) अर्थात् अब कुछ शिरोरोगों का ही वर्णन किया जायगा। इसके बाद शंखकादि पांच रोगों का वर्णन कर 'स्तम्भसुप्तिगुरुत्वाद्याः श्लैष्मिकाः शिरःकम्पार्दितादयः वातात्मकाः' तथा 'रक्तपित्तादिरोगाः' का उल्लेख किया है। वातादिजनित पांच शिरोरोगों का पृथक् वर्णन भी सूत्रस्थान अध्याय १७ में किया है। यहां भी सिर में विविध रोगों की उत्पत्ति बतायी गयी है :—

वातादयः प्रकुप्यन्ति शिरस्यस्रं च दुष्यति। ततः शिरसि जायन्ते रोगा विविधलक्षणाः ॥
प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च। यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते ॥
अर्धावभेदको वा स्यात्सर्वं वा रुज्यते शिरः। प्रतिश्यायमुखनासाक्षिकर्णरोगशिरोभ्रमाः ॥
अर्दितं शिरसः कम्पो गलमन्याहनुग्रहः। विविधाश्चापरे रोगा वातादिक्रिमिसम्भवाः ॥
पृथग्दृष्टाश्च ये पञ्च संग्रहे परमर्षिभिः। शिरोगदांस्तांञ्छृणु मे यथास्वैर्हेतुलक्षणैः ॥

वस्तुतः शिरोरोगों के हेतु, सम्प्राप्ति और लक्षणों का वर्णन चरक ने अति सुन्दर रूप से किया है और माननीय है। आधुनिक ग्रन्थों में वर्णित प्रायः सभी स्थूल या सूक्ष्मविकार जनित शिरःशूलों का समावेश इन्हीं रोगों में हो जाता है।

शिरोरोग के लिए शिरःशूल, शिरोऽभिताप तथा शिरोवेदना शब्द का व्यवहार होता है। अंग्रेजी में इसे हैडेक (Headache) कहते हैं। प्राचीन ग्रन्थों में इसका विभिन्न रोगों में होने वाले लक्षण के अतिरिक्त स्वतन्त्र रोग भी मान कर वर्णन किया गया है। किन्तु आधुनिक विद्वान् एक लक्षण मात्र मानते हैं जो अनेक रोगों में मिल सकता है।

शिरःशूल मस्तिष्कगत रोगों का प्रधान लक्षण है। सिर के निम्न भागों पर प्रभाव पड़ने से शिरःशूल की उत्पत्ति होती है।

(१) करोटिबहिर्गत कारण—इसमें कपालास्थि तथा उसकी पेशियां और रक्तवाहिनियां इन पर आघात या दबाव पड़ने से शिरःशूल होता है।

(२) कपालान्तर्गत कारण—कपालास्थियों के भीतर की बड़ी-बड़ी रक्तवाहिनियों तथा पञ्चम, नवम व दशम शीर्षण्य नाडी पर प्रभाव होने से भी शिरःशूल होता है।

उपर्युक्त रचनाओं पर मस्तिष्कगत रोग का प्रभाव होने से शिरःशूल की उत्पत्ति होती है। मस्तिष्क के निम्न रोगों में शिरःशूल पाया जाता है—

(क) मस्तिष्क के अर्बुद

(ख) मस्तिष्कावरणशोथ (Meningitis)

(ग) मस्तिष्क सुषुम्ना जल (Cerebro spinal fluid) की वृद्धि।

नेत्र, नासिका, कर्ण तथा दांत के व्रणशोथ (Inflammation) में भी सिर में दर्द होता है जिसका वर्णन नेत्ररोगों में 'अन्यतोवात' नाम से हो चुका है।

कारणभेदसे शिरःशूल के निम्न भेद किये जा सकते हैं —

(१) स्थानीयकारणजन्यशूल—पुरःकपालवायुविवरशोथ तथा अस्थिशोथ से यह अवस्था उत्पन्न होती है।

(२) संवाहित शूल—(Referred pain)—प्रतिश्याय, नासाजवनिका की वक्रता (Deviation of the septum), तारामण्डल शोथ (Iritis), अधिमन्थ (Glaucoma), दन्तगतशोथ एवं मध्यकर्णशोथ (Otitis media) के परिणामस्वरूप यह शूल होता है।

(३) वातजन्य शिरःशूल (Nervous headache)—त्रिशाखा-नाडीशूल, मस्तिष्कगत फिरङ्ग, मस्तिष्कावरणशोथ, मस्तिष्कार्बुद व विद्रधि से यह शूल होता है।

(४) अन्य शारीरिक कारणजन्य शूल—जीर्ण वृक्कशोथ (Chronic nephritis), मूत्रविषमता (Uraemia) रक्तचाप की वृद्धि (High B. P.) योषापस्मार, अर्धावभेदक, आन्त्रिक ज्वर, मसूरिका आदि के कारण यह शूल होता है।

वातिकशिरोरोगलक्षणमाह—

यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम्।
बन्धोपतापैः प्रशमश्च यत्र शिरोऽभितापः स समीरणेन ॥२॥ (सु. उ. २५)

जिस व्यक्ति के सिर में बिना किसी लक्षित कारण से तीव्र पीडा हो, जो रात्रि में बढ़ जाये और बांधने तथा स्वेदन से शान्त हो जाय उसे 'वातिक शिरःशूल' समझना चाहिये॥ २॥

वातिकशिरोरोगलक्षणमाह—यस्यानिमित्तमित्यादि। [1]अनिमित्तमतर्कितनिमित्तं वायोर्विषमक्रियत्वात्, तेन निमित्तानुषङ्गिणा कालादिनेत्यर्थः। निशि चातिमात्रमिति रात्रौ शीतेन वायोराधिक्यान्महती रुजा भवति, शीतयोनित्वाद्वायोः; [2]बन्धोपतापैरिति बन्धो बन्धनं वस्त्रादिभिः, उपतापः स्वेदादिभिः, व्यक्त्यपेक्षया बहुवचनम्, एतेनोपशयो दर्शितः। शिरोऽभितापः शिरोरुजा॥ २॥

विमर्श—वाग्भट ने पीडा की प्रकृति का वर्णन अधिक स्पष्ट और विस्तार से किया है* 'शंख प्रदेश में सुई के समान चुभन होती है। ग्रीवा पश्चाद् मार्ग फटा जाता है, भ्रुकुटियों का मध्य तथा मस्तक पीडा के साथ घूमता है, कानों में झनझनाहट होती रहती है, रोगी को ऐसा अनुभव

* निस्तुद्यते भृशं शङ्खौ घाटा सम्भिद्यते तथा। भ्रुवोर्मध्यं ललाटं च भ्रमतीवातिवेदनम्॥ बाध्येते स्वनतः श्रोत्रे निष्कृष्येत इवाक्षिणी। घूर्णतीव शिरः सर्वं सन्धिभ्यश्च प्रमुच्यते॥ स्फुरत्यतिसिराजालं कन्धराहनुसंग्रहः। प्रकाशासहता घ्राणात्स्रावोऽकस्मात् व्यथाशमौ॥वा.

१. 'अलक्षितनिमित्तं' क.। २. 'बन्धोपतापैरित्यवयवबहुत्वाद् द्वन्द्वे बहुवचनम्' क.।

होता है कि कोई आँखों को बाहर निकाल रहा है, सारा सिर चक्कर काटता है और धड़ से अलग होता हुआ प्रतीत होता है। सिर की सिराओं में स्फुरण होता है, कन्धे तथा हनु जकड़ जाते हैं, प्रकाशसन्त्रास (Photophobia) और नासास्राव होता है। अकस्मात् पीडा शान्त हो जाती है। तैलमर्दन, स्नेहन, बन्धन व स्वेदन से पीडा शान्त होती है। वाग्भट शिरःशूल के दो भेद करते हैं—

(१) सारे सिर में पीडा, (२) आधे सिर में पीडा इस प्रकार वाग्भट के अनुसार अर्धावभेदक भी वातिक के अन्तर्गत ही समझा जाता है।

मार्दवं मर्दनस्नेहस्वेदबन्धैश्च जायते। शिरस्तापोऽयमर्धन्तु मूर्ध्नः सोऽर्धावभेदकः॥

आधुनिक दृष्टि से इस प्रकार के शिरःशूल को न्यूरेल्जिया (Neuralgia) या न्यूरेल्जिक हैडेक (Neuralgic headache) कहते हैं। यह वातसंस्थानीय अपजनन (Degeneration of nervous system), रक्तविकार, निर्बलता, दन्तविकार तथा चिन्ता से उत्पन्न होता है।

पित्तजशिरोरोगं प्राह—

यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूप्यति[1] चाक्षिनासम्।
शीतेन रात्रौ च भवेच्छमश्च शिरोऽभितापः स तु पित्तकोपात्॥ ३॥

जिसका सिर जलते हुए अंगारों के समान उष्ण हो आँख तथा नाक से धूम सा निकल रहा हो, शीत से तथा रात्रि में जिसका शमन हो उस शिरःशूल को पित्तज समझना चाहिये॥ ३॥

पित्तजलक्षणमाह—यस्योष्णमङ्गारचितमित्यादि। अङ्गारचितं यथैवेति ज्वलदङ्गाराच्छन्नमिवेत्यर्थः। धूप्यति धूमायते धूमपूर्णमिव भवतीत्यर्थः। धूप्यतीति दिवादेराकृतिगणत्वात्। अक्षि च नासा चेत्यक्षिनासं, प्राण्यङ्गत्वादेकवद्भावः। उपशयं दर्शयति—शीतेन रात्रौ चेत्यादि॥ ३॥

विमर्श—महर्षि चरक ने कटु, अम्ल, लवण, क्षार, मद्यपान, क्रोध, धूप तथा अग्नि से पित्तप्रकोप होने पर पैत्तिक शिरःशूल की उत्पत्ति माना है—

कट्वम्ललवणक्षारमद्यक्रोधातपानलैः। पित्तं शिरसि संदुष्टं शिरः शीतं सुपूयते।

हेतुविपरीत चिकित्सा के सिद्धान्त से शीतोपचार करने पर तथा स्वभावशीत रात्रि में शूल का शान्त होना भी स्वाभाविक है।

आधुनिक दृष्टि से इसे बिलियस हैडेक (Bilious headache) कह सकते हैं। इस प्रकारका शूल पचनसंस्थान की विकृति (मन्दाग्नि, अजीर्ण, अम्लपित्त, यकृत रोग तथा आन्त्रशोथ आदि) में होता है।

श्लेष्मजशिरःशूलं लक्षयति—

शिरो भवेद्यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमं च। (सु. उ. २५)
शूनाक्षिकूटं वदनं च यस्य शिरोऽभितापः स कफप्रकोपात्॥ ४॥

जिसका सिर कफ से लिप्त, भारी, जकड़ा हुआ तथा शीतल हो जाता है, जिसमें मुख और नेत्रकूट सूज जाते हैं उसे कफज शिरःशूल समझना चाहिये॥ ४॥

श्लेष्मजलक्षणमाह—शिरो भवेदित्यादि। कफोपदिग्धमिति कफलिप्तम्[2]। गुरु गौरवयुतम्। प्रतिष्टब्धं बद्धमिव। हिमं हिमस्पर्शम्। शूनाक्षिकूटमिति वदनविशेषणम्। तथा हि चरकः—'शिरो मन्दरुजं तेन गुरु स्तिमितभारिकम्।' (च. सू. १७) इति। अत्रापि स्वेदादिनोपशयो ज्ञेयः॥ ४॥

---

१. 'दह्यति' क.। २ 'कफलिप्तमिव प्रस्तुतमिति यावत्' क.।

विमर्श—महर्षि चरक ने कहा है—कफज शिरोरोग में सिर सुन्न और मन्द पीडा वाला होता है। रोगी तन्द्रा, आलस्य और अरुचि से पीडित रहता है।

इस शूल को प्रसेकज (Catarrhal) या संवाहित पीडा (Referred pain) की श्रेणी में रखा जा सकता है। इस प्रकार का शूल प्रतिश्याय, दृष्टिशक्ति की कमी, दन्तरोग, मध्य कर्णशोथ, आमाशय तथा गर्भाशय की विकृतियों में होता है।

सान्निपातिकशूलं लक्षयति—

शिरोऽभितापे त्रितयप्रवृत्ते सर्वाणि लिङ्गानि समुद्भवन्ति। (सु. उ. २५)

त्रिदोषज शिरःशूल में तीनों दोषों के लक्षण मिलते हैं।

सान्निपातिकलक्षणमाह—शिरोऽभिताप इत्यादि। सर्वाणि लिङ्गानि अनन्तरोक्तानि वातादिलिङ्गानि। (अयं[1] च सन्निपातो विकृतिविषमसमवेतो ज्ञेयः, अन्यथा सर्वेषामेव शिरोरोगाणां त्रिदोषजत्वात् पृथगभिधानं व्यर्थं स्यात्, अस्य च विकृतिविषमसमवेतत्वं कारणभेदाज्ज्ञेयं न तु विरुद्धलक्षणतया; स चायं कारणभेद उत्कटसर्वदोषजत्वादेव विज्ञेयः।) यथा त्रिदोषजे राजयक्ष्मणि स्वरभेदादिजनकानां वातादीनामुत्कटत्वमिति। उक्तं हि चरके—'वाताच्छूलं भ्रमः कम्पः पित्ताद्दाहो मदस्तृषा। कफाद् गुरुत्वं तन्द्रा च शिरोरोगे त्रिदोषजे॥' (च. सू. १७) इति॥

विमर्श—यद्यपि सभी शिरोरोग त्रिदोषज होते हैं तथा विकृतिविषमसमवायजन्य शिरोरोग का प्रतिपादन करने के लिये इसका पृथक् वर्णन किया गया है। पीछे दोषोल्वणता के आधार पर वातिक आदि शिरोरोगों का वर्णन किया गया है। चरक ने त्रिदोषज शिरोरोग में तीनों दोषों से होने वाले लक्षणों का पृथक्-पृथक् निर्देश किया है। यथा—वायु से शूल, चक्कर तथा कम्पन, पित्त से दाह-जलन, मद और प्यास तथा कफ से भारीपन और तन्द्रा ये लक्षण होते हैं। इस प्रकार के लक्षण आधुनिक ग्रंथों में वर्णित पुरःकपालीय वायुविवर शोथ (Frontal sinusitis) में पाया जाता है।

रक्तजशिरोरोगलक्षणमाह—

रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च॥ ५॥

रक्तज शिरःशूल में पित्त के समान लक्षण होते हैं। इसमें स्पर्शासहता लक्षण पित्तज से अधिक होता है॥ ५॥

रक्तजलक्षणमाह—रक्तात्मक इत्यादि। पित्तसमानलिङ्ग इति पित्तजशिरोरोगतुल्यलक्षणः। पैत्तिकलिङ्गाधिकमिह स्पर्शासहत्वम्॥ ५॥

विमर्श—चेहरे की लाली तथा सिर की पीडाक्षमता ये दो इसके विशिष्ट लक्षण हैं। अभिघातज कपालास्थि शोथ एवं तीव्र मदात्यय (Acute Alcoholism) यथा रक्तभाराधिक्य (High blood pressure) में ये लक्षण होते हैं।

क्षयजशिरोरोगलक्षणमाह—

असृग्वसाश्लेष्मसमीरणानां शिरोगतानामिह संक्षयेण।

---

१. एतच्चिह्नमध्यस्थः पाठः क पुस्तके नोपलभ्यते।

क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम्।
संस्वेदनच्छर्दनधूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति ॥ ६ ॥

सिर में रहने वाले रक्त, वसा, कफ और वायु के क्षय से अत्यधिक भयंकर पीडा से युक्त और कष्टसाध्य क्षयज शिरःशूल उत्पन्न होता है। स्वेदन, वमन, धूमपान, नस्य और रक्तमोक्षण से इसकी वृद्धि होती है ॥ ६ ॥

क्षयजलक्षणमाह--असृगित्यादि। वसासृजोः सर्वदेहस्थितत्वाच्छिरसि स्थितिः, श्लेष्मणश्च स्थानमेव शिरः, उदानवायोरूर्ध्वंगतित्वाच्छिरस्यवस्थानं, तेषां क्षयेणोग्ररुजत्वं व्याधिप्रभावात्; यतो वृद्धे वायावुग्ररुजा युज्यते न तु क्षीणे, यदुक्तं; '[1]वाते पित्ते कफे चैव क्षीणे लक्षणमुच्यते। कर्मणः प्राकृताद्धानिः।' (च. सू. १८) इति। अन्यैः पुनरयं पाठः सुश्रुते स्वीकृतः, यथा 'वसाबलासक्षयसंभवानाम्' इति। युक्तश्चायं पाठः, वातक्षये हि कफवृद्धौ कफजः शिरोरोगः स्यात्, 'वृद्धिर्वाऽपि विरोधिनाम्' (च. सू. १८) इति वचनात्। किं चैतस्य चिकित्सायामुक्तं--'पाने नस्ये च सर्पिः स्याद्वातघ्नमधुरैः श्रृतम्।' इति। ततश्च समीरणपाठो न सङ्गतः, न[2] हि क्षीणे वायौ शमनमुक्तम्, अपि तर्हि वर्धनविधिः, यदुक्तं--'क्षीणा वर्धयितव्याः' (सु. चि. ३३) इति। वसा देहस्नेहस्योपलक्षणं, तेन मेदोमज्जशुक्रमस्तिष्कान्यप्यवरुध्यन्ते, तेषां देहस्नेहत्वात्। पित्तमांसादिक्षयजस्तु चयादिक्रमजक्षयकृतवातशिरोरोग एवावरुध्यते, इति गदाधरः। शिरोऽभितापः शिरोरुजा। संस्वेदनच्छर्दनधूमनस्यैः, कफक्षयः, नागरादितीव्रधूमेन वसामस्तिष्कादिक्षयः, सिरामोक्षादिभिरसृक्क्षयः, अत एवैतैः संस्वेदनादिभिः क्षयजस्य वृद्धिः। अयं विदेहेऽपि पठ्यते 'भ्रमति तुद्यते शून्यं शिरो विभ्रान्तनेत्रता। मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके॥' इति। चक्षुष्योऽप्याह--'स्त्रीप्रसंगादभीघातादथवा देहकर्मणा। क्षिप्रं संजायते कृच्छ्रः शिरोरोगः क्षयात्मकः॥ वातपित्तात्मकं लिङ्गं व्यामिश्रं तत्र लक्षयेत्। इति ॥ ६ ॥

विमर्श--वसा और रक्त सर्वशरीरव्यापी होने से सिर में भी रहते हैं। ऊर्ध्वगतिस्वभाव उदान और सर्वव्यापक होने से व्यान वायु भी सिर में रहता है। कफ का तो प्रधान स्थान सिर होता ही है। इस प्रकार इन सब का क्षय होने से शिर में पीड़ा होती है। यहाँ सन्देह होता है कि वृद्ध वायु ही शूल उत्पन्न कर सकता है क्षीण नहीं; क्योंकि क्षीण अवस्था में प्राकृत कः की हानि होती है।

'वाते पित्ते कफे चैव क्षीणे लक्षणमुच्यते। कर्मणः प्राकृताद्धानिः········॥'

इसके लिये मधुकोशकार ने उत्तर दिया है कि व्याधिस्वभाव से यह शूल होता है 'तेन क्षयेणोग्ररुजत्वं व्याधिप्रभावात्'। इसके अतिरिक्त कुछ विद्वान् असृग्वसा आदि के स्थान पर 'वसाबलासक्षयसंभवानाम्' वसा और कफ के क्षय से उत्पन्न-ऐसा पाठ करते हैं। वस्तुतः यह पाठ उचित भी प्रतीत होता है, क्योंकि वसा (स्नेह), कफ और रक्त के क्षय से वायु प्रकुपित होता है और वही तीव्र पीडा उत्पन्न करता है। यदि कहा जाय कि 'वातादि दोषों में किसी एक के क्षीण होने पर उसके विरोधी दोष की वृद्धि होती है जैसा कि चरक ने पूर्वोक्त 'वाते पित्ते' आदि श्लोक के चतुर्थ पाद में कहा है 'वृद्धिश्चापि विरोधिनाम्' अतः 'असृग्वसा' आदि मूल पाठ के अनुसार वातक्षय होने पर उसके विरोधी कफ की वृद्धि होती है और 'क्षयजशिरोऽभिताप' कफजनित होता है तो यह भी ठीक नहीं। क्योंकि धातुक्षय से वातवृद्धि होती है और क्षयज शिरो-

१. 'क्षीणा जहति स्वं लिङ्गम्'-इति क.।   २. 'यतः क्षीणे वर्धनं कर्तव्यं' क.।

रोग की चिकित्सा में भी वातघ्न द्रव्यों के सेवन का निर्देश किया गया है। स्वतः क्षीण वायु के शमन की कोई आवश्यकता प्रतीत नहीं होती बल्कि 'क्षीणा वर्धयितव्याः' उसको तो बढ़ाने का प्रयास करना चाहिये। इसलिये वायु के क्षय का निर्देश करना सर्वथा असंगत है। तथा इस पाठ में वायु के साथ कफ के क्षय का भी उल्लेख है। वसा शारीरिक स्नेह का उपलक्षण है अतः शरीर में रहने वाले मेद, मज्जा तथा शुक्र इन सब स्निग्ध पदार्थों का ग्रहण कर लेना चाहिये। आचार्य विदेह के अनुसार इसमें निम्न लक्षण होते हैं—भ्रम, सूचीवेधनवत् पीडा, शिरःशून्यता, मूर्च्छा तथा अंगावसाद। आचार्य चक्षुष्य इसमें वायु और पित्त के लक्षण मानते हैं—

स्त्रीप्रसंगादभीघातादथवा देहकर्मणा। क्षिप्रं संजायते कृच्छ्रः शिरोरोगः क्षयात्मकः॥
वातपित्तात्मकं लिङ्गं व्यामिश्रं तत्र लक्षयेत्।

आधुनिक दृष्टि से इस रोग को सार्वदैहिक कारणजन्य वर्ग में रख सकते हैं। पाण्डु, अंकुश-मुख कृमि, मधुमेह तथा जीर्ण विषम-ज्वर जैसे सार्वदेहिक एवं चिरकालीन रोगों से एवं अति मैथुनादि जनित शुक्रक्षय से शरीर की वसा, रक्त और कफ का क्षय हो जाता है। कभी २ अभि-घात आदि से सद्यः रक्तादि का क्षय होता है। रक्तक्षय से मस्तिष्कगत रक्ताल्पता (Cerebral anaemia) हो जाती है। इसके परिणामस्वरूप सिर में शूल होने लगता है। प्रधान विकार के दूर न होने पर केवल लाक्षणिक चिकित्सा से इसमें कुछ भी लाभ नहीं होता अतः इस रोग को कृच्छ्रसाध्य माना गया है।

क्रिमिजशिरोरोगं वर्णयति—

निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चान्तः।
घ्राणाच्च गच्छेत् सलिलं सपूयं शिरोभितापः क्रिमिभिः स घोरः॥ ७॥

जिस रोगी के सिर में अत्यधिक तोद हो, अन्दर (कपालास्थियों में) ऐसा प्रतीत होता है मानो कोई (श्लेष्मलकला आदि को) खा रहा है और स्फुरण हो या गति का अनुभव हो, नासिका से पूययुक्त जल का स्राव हो उस भयंकर शिरःशूल को क्रिमिज समझना चाहिये। (कभी-कभी क्रिमि भी स्राव के साथ निकलते हैं।) ॥ ७॥

क्रिमिजमाह—निस्तुद्यत इत्यादि। निस्तुद्यते सूचीभिरिव तुद्यते। संभक्ष्यमाणमित्यत्र 'क्रिमिभिः' इति शेषः, प्रकरणात्। स्फुरतीव मनाक् चलतीव। [2]घ्राणाच्चेति चकारो भिन्न-क्रमेण सलिलमित्यत्र संबध्यते, तेन सलिलं पूयं च गच्छेत् तथा क्रिमयश्च कदाचिद्गच्छ-न्तीति, तथा च चरकः—'क्रिमीणां दर्शनेन च' (च. सू. १७) इति॥ ७॥

विमर्श—चरक ने पीडा के अतिरिक्त स्राव में कृमियों की उपस्थिति भी मानी है—

व्यवच्छेदरुजाकण्डूशोणदौर्गन्ध्यदुःखितम्।
कृमिरोगातुरं विद्यात् कृमीणां लक्षणेन तु॥ (च. सू. १७)

महर्षि चरक ने इस रोग की सम्प्राप्ति का अधिक स्पष्ट रूप से वर्णन किया है—'पथ्यापथ्य-मिश्रित भोजन करने से रक्त और मांस क्लिन्न होकर सन्निपात को प्रकुपित कर देते हैं और सिर में कृमियों की उत्पत्ति हो जाती है। वे कृमि सिर के रक्त का पान करते हुए भयंकर पीडा, चित्त-विभ्रंश, ज्वर, कास तथा बल की हानि करते हैं। सिर में रूक्षता, शोथ, चुभन, दाह, फटने जैसी पीडा तथा दुर्गन्ध उत्पन्न हो जाती है। कपाल, तालु और सिर में खुजली और शुष्कता हो जाती

१. 'रुधिरं' क.। २. 'घ्राणाच्च गच्छेदित्यत्र चकारेण कृमयश्च गच्छन्तीति द्रष्टव्यं' क.।

है। नासिका से रक्तवर्ण का स्वच्छ स्राव निकलता है और कानों में झनझनाहट होती है*।

आधुनिक दृष्टि से विचार करने पर कृमिज शिरोरोग के दो भेद कर सकते हैं :—

(१) साक्षात् कृमिजन्य (२) परम्परा या अप्रत्यक्ष कृमिजन्य।

साक्षात्कृमिजन्य में नासिका द्वारा स्राव के साथ कृमि भी गिरते हैं, इनका प्रत्यक्ष किया जा सकता है। इस प्रकार की अवस्था वायुविवरशोथ (Sinusitis) के कारण मिल सकती है जिसका वर्णन पीनस और रक्तज या दुष्ट प्रतिश्याय के साथ हो चुका है।

दूसरे प्रकार में कृमि दिखाई नहीं पड़ते और न तो नासिका से किसी प्रकार का स्राव ही होता है। उदर के गण्डूपदक्रिमि, अंकुशमुखकृमि की उपस्थिति से सिर में संवाहित या सांवेदनिक पीडा होती है। किन्तु यह प्रायः अधिक तीव्र स्वरूप की नहीं होती। ये कृमि आन्त्रस्थ रक्त पर अपना निर्वाह करते हैं जिसके परिणामस्वरूप मस्तिष्क में रक्ताल्पता होकर शिरःशूल होता है। इसका समावेश वातिक या क्षयज शिरोरोग में हो जाता है।

सूर्यावर्तं लक्षयति—

सूर्योदयं या प्रति मन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढा।
विवर्धते चांशुमता सहैव सूर्यापवृत्तौ विनिवर्तते च।
सर्वात्मकं कष्टतमं विकारं सूर्यापवर्तं तमुदाहरन्ति ॥८॥ (सु. उ. २५)

जो पीडा सूर्योदय से प्रारम्भ होकर धीरे-धीरे बढ़ती हुई आँख और भ्रुकुटी में फैल जाती है, जो सूर्य की वृद्धि के साथ-साथ बढ़ती है और सूर्य के घटने पर घटती है उस त्रिदोषज और कृच्छ्रसाध्य व्याधि को सूर्यावर्त कहते हैं॥ ८॥

सूर्यावर्तलक्षणमाह—सूर्योदयमित्यादि। सूर्योदयं प्रति लक्षीकृत्य या रुगक्षिभ्रुवं समुपैतीति संबन्धः। अक्षिभ्रुवाविति पाठान्तरे प्राण्यङ्गत्वेन प्राप्तैकवद्भावस्याभावः, नासिकास्तनयोरितिवल्लक्षणव्यभिचारात्। सूर्योदये प्रातर्मन्दं मन्दं यथा स्यात्तथा रुजां समुपैति, अंशुमता च सूर्येण सह गाढा यथा भवति तथा वर्धते। अयमर्थः—यथा सूर्यो वर्धते तथा वेदना प्रवृद्धा भवति, सूर्यस्यापवृत्तौ सायाह्ने विनिवर्तते शाम्यतीत्यर्थः; 'गाढा' इत्यत्र 'गूढा' इति पाठान्तरं, तदा सूर्यापगमे गूढा रात्रौ लीनेत्यर्थः। सर्वात्मकमिति सन्निपातजम्। 'व्याधिस्वभावाच्च कालविशेषनियमः। कष्टतमं कृच्छ्रसाध्यम्। ननु, अयं सुश्रुते वातपित्ताभ्यां पठ्यते, तद्यथा—'आवर्तसंज्ञः स तु सूर्यपूर्वो व्याधिर्मतः पित्तसमीरणाभ्याम्। शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च॥' (सु. उ. २५) इति। तत्कथं सर्वजत्वम्? उच्यते-सुश्रुते औत्कर्ष्येण व्यपदेश इति न विरोधः। ननु, एवं कथं रात्रौ वायुसमानगुणशीतप्रादुर्भावे वेदनालीनता, दिवसस्याद्यन्तयोर्मन्दरुक्त्वं च? उच्यते-अत्रापि पित्तस्य प्रबलतमत्वात्। यत्तु चिकित्सायां शिरीषमूलपिप्पलीमूलवचावपीडाद्यभिहितं तद्व्याधिप्रत्यनीकत्वात्। अथ वातपित्तजत्ववर्णनेन विशिष्टकालभवने हेतुर्दर्शितो भवति। यतो वातपित्तयोः शीतोष्णात्मकत्वात्। पूर्वाह्णे सूर्यवृद्धिक्रमेण स्रोतसां सङ्कोचक्रमादवरुद्धमार्गयोर्वेदनाकरत्वं, पराह्णे निवर्तमाने सूर्ये तु स्रोतसां विवृतत्वात् स्वमार्गव्याघातविरहेण

---

* संकीर्णभोजनैर्मूर्ध्नि क्लेदिते रुधिरामिषे। कोपिते सन्निपाते च जायन्ते मूर्ध्नि जन्तवः॥
शिरसस्ते पिबन्तोऽस्रं घोराः कुर्वन्ति वेदनाः। चित्तविभ्रंशजननौ ज्वरकासौ बलक्षयः॥
रौक्ष्यशोफव्यधच्छेददाहस्फुटनपूतिताः। कपाले तालुशिरसोः कण्डूशोषप्रमीलकाः।
ताम्राच्छसिङ्घाणकता कर्णनादश्च जायते॥

वेदनाया अजनकत्वमिति युक्तः कालविशेषनियमः। तथा चाह निमिः—'सूर्यसोमात्मकौ नित्यं स्वहेतू पित्तमारुतौ। कुर्वाते वेदनां तीव्रां दिनात् पूर्वाह्न एव तु॥ आदित्यतेजसा युक्ते निवृत्तेऽपि च भास्करे। स्रोतसां विवृतत्वाच्च ततः श्लेष्माधिगच्छति॥ उद्धतो मातरिश्वा च स्वमार्गं प्रतिपद्यते। तस्मान्मध्यदिनादूर्ध्वं वेदनाऽत्र प्रशाम्यति॥' इति। वातपित्तजत्वमस्याधिकत्वेन व्यपदेश इति न्यायात्; तेन पूर्वेण समं न विरोधः। विदेहे सूर्यावर्तविपर्ययोऽपि पठ्यते—'तत्र वातानुगं पित्तं चितं शिरसि तिष्ठति। मध्याह्ने तेजसाऽर्कस्य तद्विवृद्धं शिरोरुजम्॥ करोति पैत्तिकीं घोरां संशाम्यति दिनक्षये। अस्तङ्गते प्रभाहीने सूर्ये [1]वायुर्विवर्धते॥ पित्तं शान्तिमवाप्नोति ततः शाम्यति वेदना। एष पित्तानिलकृतः सूर्यावर्तविपर्ययः॥' इति। अयमत्र सूर्यावर्त एवान्तर्भावनीयश्चातुर्थिके चातुर्थिकविपर्ययवत्॥ ८॥

विमर्श—'सूर्यस्येव आवर्तो भ्रमणं यस्य स सूर्यावर्तो विकारः' सूर्य के समान जिसका उत्कर्ष (प्रातः से मध्याह्न तक वृद्धि) और अपकर्ष (मध्याह्न के उपरान्त क्रमशः ह्रास) हो उसे सूर्यावर्त कहते हैं। सुश्रुत ने इसे वातपित्तज माना है—

आवर्तसंज्ञः स तु सूर्यपूर्वो व्याधिर्मतः पित्तसमीरणाभ्याम्।
शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च॥

किन्तु यहाँ पर त्रिदोषज क्यों माना गया है ? वस्तुतः यह रोग त्रिदोषज ही है किन्तु उल्बणता के आधार पर इसे वातपित्तज कह दिया गया है। इस प्रकार इसे वातपित्तोल्बण त्रिदोषज शिरःशूल कह सकते हैं। फिर यह शंका उठती है कि यदि यह रोग वातपित्तोल्बण ही है तो वात के समान शीत गुणवाली रात्रि में पीडा का शमन किस प्रकार हो सकता है तथा अपराह्न एवं उत्तर रात्रि में (जब वायु की स्वभावतः वृद्धि होती है) पीडा कम क्यों होती है। उत्तर-वात और पित्त में भी पित्त प्रबलतर रहता है अतः उसके विपरीत शीत से शूल की शान्ति हो जाती है। चिकित्सा में जो शिरीषमूल, पिप्पलीमूल तथा वचा जैसे पित्तवर्धक पदार्थों के अवपीड नस्य का निर्देश किया है वह व्याधिप्रत्यनीक चिकित्सा की दृष्टि से ही, दोषप्रत्यनीक चिकित्सा की दृष्टि से नहीं। वातपित्तोल्बण होने से इनके विशेष काल में पीड़ा होना भी स्वाभाविक है। दिन के पूर्वभाग में सूर्यताप से शोषित कफ के कारण वायु-मार्गों का अवरोध रहता है और मार्ग में अवरुद्ध वात और पित्त वेदना उत्पन्न करते हैं। मध्याह्न के उपरान्त कफ पिघल कर स्थानान्तरित हो जाता है जिससे वायु के संचार के लिये मार्ग स्वच्छ हो जाता है और पीडा की शान्ति होने लगती है। रात्रि के समय मार्ग पूर्ण शुद्ध हो जाने से तथा स्वाभाविक शीत से पित्त के शान्त हो जाने पर पीडा शान्त हो जाती है। रात्रि में सोने से पुनः पूर्ववत् कफ का संचय होता है और प्रातःकाल सूर्योदय से वही क्रम जारी हो जाता है। इस तथ्य का वर्णन आचार्य निमि ने भी उपर्युक्त प्रकार से ही किया है (मूल श्लोक मधुकोश में देखें)। वाग्भट ने भी इस रोग को वातसहकारी पित्तोल्बण सन्निपातज माना है*। महर्षि चरक इसमें वायु और रक्त की प्रबलता बताते हैं। उनका कहना है कि सूर्योदय के समय मस्तिष्कगत श्लेष्मा पिघलने लगता है जिससे पीडा भस्म हो जाती है। मध्याह्न में अधिक पिघलने से पीड़ा बढ़ जाती है। सायंकाल पुनः मस्तुलुङ्ग जम जाता है†।

* पित्तानुबद्धः शङ्खाक्षिभ्रूललाटेषु मारुतः। रुजं सस्पन्दनां कुर्यादनुसूर्योदयोदयाम्।
आमध्याह्नं विवर्धिष्णुः क्षुद्वतः सा विशेषतः। अव्यवस्थितशीतोष्णसुखा शाम्यत्यतः परम्॥

† सन्धारणादजीर्णाच्चैर्मस्तिष्कं रक्तमारुतौ। दुष्टौ दूषयतस्तच्च दुष्टं ताभ्यां विमूर्च्छितम्॥
सूर्योदयेऽशुसंतापाद् द्रवो विष्यन्दते शनैः। तदा दिने शिरःशूलं दिनवृद्ध्या च वर्धते॥
दिनक्षये ततः स्त्याने मस्तिष्के सम्प्रशाम्यति। सूर्यावर्तः स एव स्यात्.......।

१. 'वायुर्निवर्तते' क.।

दर्वीत्यादि। दर्वीकराणां विषमाशु हन्ति अश्वत्थादौ विशेषेण दर्वीकराणामाशुमारकं, दर्वीकराः फणिनः। सर्वाणि चोष्णे द्विगुणीभवन्तीति उष्णसंयोगे सति सर्वाणि विषाणि स्वरूपतो द्वैगुण्यं भजन्ते; 'सर्वाणि चोक्तानि यथाक्रमेण' इति पाठान्तरे अयमर्थः-सर्वाणि भोगिमण्डलिराजिलविषाणि यथाक्रमेण यथोद्दिष्टक्रमेणोक्तान्यश्वत्थादिष्वाशुघातीनि। दर्वीकरविषस्य पृथगुपादानं विशेषार्थम् ॥

अवस्थाविशेषे सर्पविषस्यासाध्यत्वं प्राह—

अजीर्णपित्तातपपीडितेषु बालेषु वृद्धेषु बुभुक्षितेषु ॥ २० ॥
क्षीणक्षते मेहिनि कुष्ठयुक्ते रूक्षेऽबले गर्भवतीषु चापि।

अजीर्ण, पित्त और धूप से पीडित व्यक्तियों में, बालकों, वृद्धों और भूखों में, क्षतक्षीण, मेह से पीडित, कुष्ठी, रूक्ष, निर्बल व्यक्तियों एवं गर्भवती स्त्रियों में सर्पविष असाध्य होता है ॥ २० ॥

एवमपरेष्वप्याशुघातित्वं संभवति, तानाह—अजीर्णेत्यादि। अजीर्णपित्तातपपीडितेष्विति अजीर्णिनि दोषत्रयप्रकोपात्, पित्तातपपीडितयो रौक्ष्यात्, बालवृद्धयोः संपूर्णक्षीणधातुत्वेन विषवेगासहत्वात्, बुभुक्षितेष्विति पित्तवृद्ध्योष्णदेहत्वात्, क्षीणक्षत इति क्षतक्षीणे बहुलवातदुष्टेः, मेहिनि दोषत्रयप्रकोपात्, कुष्ठयुक्ते रक्तादिदोषात्, रूक्षे वातकोपात्, अबले क्लेशासहत्वात्, गर्भवतीषु गर्भेणोरसिस्थदोषत्वात्, एषु विषमाशुघातीति ॥

अन्यदप्यसाध्यलक्षणमाह—

शस्त्रक्षते यस्य न रक्तमेति राज्यो लताभिश्च न संभवन्ति ॥ २१ ॥
शीताभिरद्भिश्च न रोमहर्षो विषाभिभूतं परिवर्जयेत्तम्।
जिह्मं मुखं यस्य च केशशातो नासावसादश्च सकण्ठभङ्गः ॥ २२ ॥
कृष्णः सरक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वं च विवर्जनीयः।
वर्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्ध्वमधश्च यस्य ॥ २३ ॥
दंष्ट्रानिपाताश्चतुरश्च यस्य तं चापि वैद्यः परिवर्जयेच्च।

उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाऽप्यथवा विवर्णम्॥ २४॥
सारिष्टमत्यर्थमवेगिनं च ज्ञात्वा नरं कर्म न तत्र कुर्यात्।

शस्त्र से क्षत होने पर भी जिसका रक्त नहीं निकलता, लताओं से मारने या बाँधने पर जिसके रेखायें नहीं उभरतीं, ठण्डे जल से जिसको रोम-हर्ष नहीं होता उस विषयुक्त रोगी की चिकित्सा न करनी चाहिये। जिसका मुख टेढ़ा हो जाये, जिसके बाल गिरने लगें, जिसका नासाभंग और स्वरभंग हो जाये, जिसके दंशस्थान पर रक्तिमायुक्त कृष्णवर्ण का शोथ हो और जिसका हनुस्तम्भ (Lock-jaw) हो जाये उसे भी असाध्य समझना चाहिये। जिसके मुख से मोटी बत्ती सी लार निकले, जिसके निम्न (गुदा आदि) और ऊर्ध्व (नासा आदि) दोनों मार्गों से रक्त का स्राव हो और जिसमें चार दंष्ट्राओं के चिह्न हों उसकी भी चिकित्सा वैद्य को न करनी चाहिये। जो उन्मत्त हो, जिसमें अत्यधिक उपद्रव हों, जिसका स्वर हीन हो गया हो, जिसका वर्ण विकृत हो गया हो, जिसमें अरिष्ट लक्षण दिखाई पड़ें एवं जिसको किसी प्रकार (मल, मूत्र) का वेग या गमन आदि की शक्ति न हो उस व्यक्ति की भी चिकित्सा न करनी चाहिये॥ २१-२४॥

इदानीं सर्वथा वर्जनीयानाह—शस्त्रक्षत इत्यादि। राज्यो लताभिश्चेति राज्यो लेखाः लताभिस्ताडनाच्च भवन्ति। तदुक्तं 'मालम्बायने-'नैति रक्तं क्षताद्यस्य लताघातैर्न राजिकाः। न लोमहर्षः शीताद्भिर्वर्जयेत्तं विषार्दितम्' इति। जिह्मं वक्रं, स्तब्धमिति कार्तिकः। केशशात इति कर्षणात् केशोत्पाटः। कण्ठभङ्गो ग्रीवाया अविधारणम्। हन्वोः स्थिरत्वं हनुद्वयस्य लग्नत्वम्। वर्तिर्घनेन लालारूपा वर्त्तिः। रक्तं स्रवेदूर्ध्वमधश्च यस्येति मुखनासागुदादिभ्यः शोणितस्रावः। दंष्ट्रानिपाताश्चतुरश्चेति चत्वार इति प्राप्ते चतुर इति निर्देश आगमविधेरनित्यत्वात्, तथा 'अग्रतश्चतुरो वेदा' इत्यादि। उन्मत्तमत्यर्थमुपद्रुतमिति उन्मत्तमत्यर्थमुन्मादवन्तम्, उपद्रुतं ज्वरातिसारादिभिरत्यर्थमुपद्रुतम्। हीनस्वरं वक्तुमसमर्थम्। विवर्णं कृष्णवर्णम्। सारिष्टं नासाभङ्गादियुक्तम्। अवेगिनं गम[2]नादिवेगरहितं, विण्मूत्रादिवेगरहितमिति कार्तिकः॥ २१-२४॥

विमर्श—विष प्रभाव से स्कन्दन (Coagulation) हो जाने के कारण काटने पर भी रक्तस्राव नहीं होता। रोगी में सर्वप्रकार की प्रत्यावर्तन क्रियायें (Reflex actions) नष्ट हो जाती हैं। अतः ठण्डे पानी के छिड़कने से भी रोमहर्ष नहीं होता।

दंष्ट्रानिपाताश्चतुरः—सर्प की चार दंष्ट्रायें शास्त्र में बताई गई हैं—

सर्पदंष्ट्राश्चतस्रस्तु तासां वामाधराऽसिता। पीता वामोत्तरा दंष्ट्रा रक्तश्यावाऽधरोत्तरा॥

इन चार दंष्ट्राओं में ही विष रहता है। सर्प यदि चारों दंष्ट्राओं को लगाता है तो शरीर में विष की अधिक मात्रा प्रविष्ट होती है। अतएव इसे असाध्य माना गया है।

दूषीविषं वर्णयति—

जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा॥ २५॥
स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति। (सु. क. २)

पुराना अथवा विषघ्न औषधियों के प्रभाव से प्रभावरहित किया हुआ, वनाग्नि, अथवा धूप से सूखा हुआ अथवा स्वभाव से ही गुणहीन बन जाता है॥ २५॥

स्थावरजङ्गमविषमेव जीर्णत्वादिभिर्विशेषैर्दूषीविषसंज्ञां लभते; तदाह—जीर्णमित्यादि।

---

१. 'अनघायनेऽप्युक्तम्' क.। २. 'प्रथमादिवेगरहितम्' क.।

विषघ्नौषधिभिरिति अगदादिभिः। दावाग्निवातातपशोषितं वेति दावाग्निर्वनाग्निः। स्वभावतो वा गुणविप्रहीनमिति स्वभावादेव किमपि विषं व्यवायिविकासिप्रभृतिषु दशसु गुणेषु मध्ये एकद्वित्र्यादिगुणहीनं यदि भवति तदा दूषीविषतामुपैति ॥ २५ ॥

गुणहीनस्य तस्य लक्षणान्याह—

वीर्याल्पभावान्न निपातयेत्तत् कफान्वितं वर्षगणानुबन्धि ॥ २६ ॥
तेनार्दितो भिन्नपुरीषवर्णो वैगन्ध्यवैरस्ययुतः पिपासी । (सु. क. २)
मूर्च्छां भ्रमं गद्गदवाग्वमिं च विचेष्टमानोऽरतिमाप्नुयाद्वा ॥ २७ ॥

शक्ति की कमी और कफ युक्त होने के कारण वह विष प्राणघातक नहीं होता। तथा पाक न होने से वर्षों तक शरीर में बना रहता है। इससे पीड़ित रोगी अतिसार, विवर्णता, विकृत गन्ध, मुखवैरस्य, प्यास, मूर्च्छा, भ्रम, गद्गदवाक्यता (हलकापन), वमन, विरुद्धचेष्टा और अरति से पीड़ित रहता है ॥ २६–२७ ॥

गुणहीनतामेव कार्येण दर्शयति—वीर्याल्पभावादित्यादि। न निपातयेदिति न मारयति सद्यश्चिरेण वा। कफान्वितमिति कफान्वितं सत् मन्दीभूतौष्ण्यादिगुणं न मारयति। वर्षगणानुबन्धीति अपाकाच्चिरस्थायि। तेनार्दितो भिन्नपुरीषवर्ण इति तेन दूषीविषे[१]णार्दितो भिन्नशब्दोऽत्र पुरीषवर्णाभ्यां प्रत्येकमभिसंबध्यते, भिन्नवर्चो विवर्णः। वैगन्ध्यवैरस्ययुत इति विरुद्धगन्धमुखवैरस्ययुक्तः। विचेष्टमानो विरुद्धां चेष्टां कुर्वन्, अरतिमसुखं लभते ॥

विमर्श—दूषीविष को आधुनिक दृष्टि से जीर्णविषता (Chronic poisoning) कह सकते हैं।

स्थानविशेषेण दूषीविषस्य विशिष्टलक्षणान्याह—

आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी। (सु. क. २)
भवेत् समुद्ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः ॥ २८ ॥

दूषीविष यदि आमाशय में स्थित है तो (कफावृत वात से) कफवातज रोग की उत्पत्ति होती है। यदि यह विष पक्वाशय में रहे तो रोगी वात-पित्तजन्य व्याधि से पीड़ित रहता है तथा सिर के बाल और शरीर के रोम गिर जाने से रोगी पंख कटे हुए पक्षी के समान दिखाई देता है ॥ २८ ॥

स्थानविशेषेण विशिष्टलिङ्गमाह—आमाशयस्थ इत्यादि। कफावृतत्वेन वातकोप आमाशये, तेन कफवातरोगीत्युक्तम्। अनिलपित्तरोगीति पक्वाशये दुष्टवातसंबन्धेन प्रत्यासन्नस्याशयस्थस्य पित्तस्य कोपः। भवेत् समुद्ध्वस्तशिरोरुहाङ्ग इति अत्राङ्गशब्दात् परं रुहशब्दो द्रष्टव्यः, तेनायमर्थः—समुद्ध्वस्तशिरोरुहाङ्गः, शिरोरुहाः केशाः, अङ्गरुहं लोम, तदुक्तमालम्बायने—'सीदन्ति केशलोमानि तस्मिन् पक्वाशयं गते' इत्यादि। विलूनपक्षस्तु यथा विहङ्ग इति मुण्डितपक्षशकुनिसदृशः, एतत् पक्वाशयगतस्यैव लिङ्गम् ॥ २८ ॥

रसादिधातुगतदूषीविषस्य लक्षणानि व्याचष्टे—

स्थितं रसादिष्वथवा यथोक्तान् करोति धातुप्रभवान् विकारान्।
कोपं च शीतानिलदुर्दिनेषु यात्याशु, पूर्वं शृणु तस्य रूपम् ॥२९॥
(सु. क. २)

१. 'गररूपेण पीडितः' क.।

रस रक्त आदि धातुओं में स्थित दूषीविष धातुओं में होने वाले (सुश्रुत के व्याधि समुद्देशीय अध्याय (सू० अ० १४) में बताये गये अन्न में अश्रद्धा अरुचि आदि) लक्षणों को उत्पन्न करता है। ठण्डी वायु और दुर्दिन में (आकाश में बादल होने पर) इसका शीघ्र प्रकोप होता है। उसके पूर्वरूपों का आगे वर्णन किया जाता है ॥ २९ ॥

तस्य रसादिधातुगतस्य लिङ्गमाह—स्थितं रसादिष्वित्यादि । यथोक्तान् करोति धातुप्रभवान् विकारानिति सुश्रुते व्याधिसमुद्देशीयाध्यायोक्तानन्नाश्रद्धादीन् करोति; कोपं च शीतानिलदुर्दिनेषु यातीति कफसंबन्धाच्छीतादौ काले कोपं याति । पूर्वं श्रृणु तस्य रूपमिति पूर्वरूपं श्रृण्वित्यर्थः ॥ २९ ॥

तस्यैव पूर्वरूपाणि रूपाणि च निरूपयति—

निद्रां गुरुत्वं च विजृम्भणं च विश्लेषहर्षावथवाऽङ्गमर्दम् ।
ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठजन्म ॥ ३० ॥
मांसक्षयं पादकरप्रशोथं मूर्च्छां तथा छर्दिमथातिसारम् । (सु. क. २)
दूषीविषं श्वासतृषाज्वरांश्च कुर्यात् प्रवृद्धिं जठरस्य चापि ॥ ३१ ॥

दूषीविष पूर्वरूपावस्था में निद्रा, भारीपन, जम्भाई अधिक आना, शरीर में शिथिलता, रोमहर्ष एवं अङ्गमर्द को उत्पन्न करता है। बाद में (रूपावस्था में) अन्नमद (भोजन के बाद नशा जैसी स्थिति होना), अन्न का न पचना, अरुचि, त्वचा पर मण्डल और चकत्तों की उत्पत्ति, मांसक्षय, हाथ-पैरों में सूजन, मूर्च्छा, वमन, अतिसार, श्वासकृच्छ्रता, प्यास, ज्वर तथा उदर की वृद्धि करता है ॥ ३०-३१ ॥

तदेवाह—निद्रेत्यादि । विश्लेषहर्षाविति विश्लेषो गात्रस्य शैथिल्यं, हर्षो रोमहर्षः । एतानि वातकफजानि लिङ्गानि । तत इति पूर्वरूपादनन्तरम् । अन्नमदाविपाकाविति अन्नमदः अन्ने भुक्ते मदो हर्षः अन्नमदः, कार्तिकस्त्वन्नविक्षेपणमन्नमदमाह, अन्नमदो रसाजीर्णमिति गदाधरः अविपाकोऽन्नस्यापाकः । पादकरप्रशोथमिति पादे करे च प्रकृष्टं शोथं करोति । 'मूर्च्छां तथा छर्दिमथातिसारम्' इत्यस्य स्थाने 'प्रलेपकं छर्दिम्' इत्यादि पाठान्तरे प्रलेपकं स्वेदप्रवृत्त्या पिच्छिलं गात्रं,[१] ज्वरविशेषं वा ॥ ३०-३१ ॥

दूषीविषस्य नानाविकारकारित्वं व्याचष्टे—

उन्मादमन्यज्जनयेत्तथाऽन्यदानाहमन्यत्क्षपयेच्च शुक्रम् । (सु. क. २)
गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान्विकारांश्च बहुप्रकारान् ॥ ३२ ॥

कुछ दूषीविष उन्माद, कुछ आनाह, कुछ शुक्रक्षय, कुछ गद्गदता (हकलापन), कुछ कुष्ठ तथा दूसरे विविध प्रकार के अनेक (विसर्प, विस्फोट आदि) विकारों को उत्पन्न करते हैं ॥ ३२ ॥

तदेव नानाप्रकारं यद्यत्करोति तत्तदाह—उन्मादमन्यदित्यादि । क्षपयेच्च शुक्रमिति षाण्ढ्यं करोतीत्यर्थः । तांस्तानिति विसर्पविस्फोटकादीन् ॥ ३२ ॥

दूषीविषस्य निरुक्तिमाह—

दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः ।
यस्मात् संदूषयेद्धातूँस्तस्माद् दूषीविषं स्मृतम् ॥ ३३ ॥

---

१. 'प्रलेपकत्वेन स्वेदाप्रवृत्त्या गात्रलिप्तत्वं क. ।

देश, काल, अन्न और दिन में सोने के प्रभाव से प्रकुपित होकर यह धातुओं को वार-बार दूषित करता रहता है अतः इसे दूषीविष कहते हैं ॥ ३३ ॥

दूषीविषस्य साध्यासाध्यतां विवेचयति—

साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम् । (सु. क. २)
दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः ॥ ३४ ॥

संयमी व्यक्ति में उत्पन्न हुआ अल्पकालीन दूषीविष साध्य होता है। एक वर्ष पुराना होने पर याप्य और क्षीण एवं अपथ्यसेवी व्यक्ति का दूषीविष असाध्य होता है ॥ ३४ ॥

दूषीविषस्य निरुक्तिमाह—दूषितमित्यादि। देशकालान्नदिवास्वप्नैरिति देशः प्रचुरानिलशीतवृष्टिरनूपादिः, कालः शीतानिलदुर्दिनादिः, अन्नं सुरातिलकुलत्थादि, तैर्दूषितं कोपितम्, अभीक्ष्णशः पुनः पुनः। धातुदूषकत्वेन दूषीविषम्। संयोगजं विषं द्विविधम्; एकं सविषाविषसंयोगकृतं कृत्रिमसंज्ञम्, अपरं निर्विषद्रव्यकृतं गरसंज्ञम्। यदाह वृद्धकाश्यपः- 'संयोगजं च द्विविधं तृतीयं विषमुच्यते। गरः स्यादविषं तत्र सविषं कृत्रिमं[1] मतम् ॥' इति। अत एव रसायने चरकः-'दंष्ट्राविषे शूलविषे सगरे कृत्रिमे विषे।'—इति ॥ ३३-३४ ॥

विमर्श—देश से अधिक वायु, शीत और वृष्टि युक्त आनूप देश समझना चाहिये। काल से ठण्डी वायु और दुर्दिन वाला काल लिया जाता है। अन्न में शराब, तिल, कुलथी आदि द्रव्य समझने चाहिये।

पूर्वोक्त स्थावर और जङ्गम विषों के अतिरिक्त एक तीसरा संयोगज विष भी होता है। उसका भी समावेश दूषीविष में ही हो जाता है। संयोगज विष दो प्रकार के होते हैं—(१) कृत्रिम—यह सविष और निर्विष पदार्थों के संयोग से बनता है। (२) गर—यह दो निर्विष पदार्थों के संयोग से बनता है। काश्यप ने कहा भी है—

संयोगजं च द्विविधं तृतीयं विषमुच्यते। गरः स्यादविषं तत्र सविषं कृत्रिमं मतम् ॥

गरविषजुष्टस्य लक्षणान्याह—

सौभाग्यार्थं स्त्रियः स्वेदं रजो नानाङ्गजान् मलान् ।
शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्[2] ॥ ३५ ॥
तैः स्यात् पाण्डुः कृशोऽल्पाग्निर्गरश्चास्योपजायते ।
मर्मप्रधमनाध्मानं हस्तयोः शोथलक्षणम् ॥ ३६ ॥
जठरं ग्रहणीदोषो यक्ष्मा गुल्मः क्षयो ज्वरः ।
एवंविधस्य चान्यस्य व्याधेर्लिङ्गानि दर्शयेत् ॥ ३७ ॥

कुछ स्त्रियाँ सौभाग्य की प्राप्ति (वशीकरण) के निमित्त स्वेद, रज, विविध अंगों से उत्पन्न मलों तथा शत्रुओं द्वारा प्रयुक्त गर संयोगज विषों को अन्न में मिलाकर दे देती हैं। इससे वह व्यक्ति पाण्डुवर्ण का, कृश और मन्दाग्नि से पीड़ित हो जाता है। इन चीजों से उसके शरीर में गरविष की उत्पत्ति हो जाती है। इसमें मर्मव्यथा, आध्मान, हाथों में शोथ के लक्षण, उदररोग, ग्रहणीरोग, यक्ष्मा, गुल्म, क्षय, ज्वर तथा इसी प्रकार की अन्य व्याधि के लक्षण भी प्रकट होते हैं ॥

१. 'कृत्रिमं' क.। २. 'प्रयच्छन्त्यन्नमाश्रितान' क.।

तद् द्वयमपि दर्शयितुमाह—सौभाग्यार्थमित्यादि। स्त्रियः सौभाग्यार्थं शत्रुप्रयुक्ता वा सविषजन्तूनां स्वेदं, रजश्चूर्णं, नानाङ्गजान् नानागरकरान् मलान्; अन्नादौ ददति। तैरिति स्वेदरजःप्रभृतिभिः। गरश्चास्येति अपाकाज्जठरावस्थितस्वेदादिरेव गरः अत एव तस्योदरामयः; किंवा वक्ष्यमाणमर्मप्रथमनादिलक्षणो व्याधिर्गरः। मर्मप्रथमनं मर्मव्यथा। शोथलक्षणमिति शोथ एव लक्षणं, जठरमुदरम्। अन्यस्य व्याधेर्लिङ्गानि दर्शयेदिति अन्यस्य विस्फोटादेर्लिङ्गं दर्शयति॥ ३५-३७॥

विमर्श—स्त्रियाँ पति या प्रेमी के वशीकरण के लिए अपना स्वेद, रज आदि खिला देती हैं। इसके अतिरिक्त कभी-कभी वे शत्रुओं से मिलकर उनके द्वारा दिये हुए गरविष का भी प्रयोग लोगों पर कर देती हैं। जिससे मन्दविष के चिरकालीन प्रभावस्वरूप अनेक विकार उत्पन्न होते हैं।

लूताविषवर्णनावसरे प्रथमं तस्या निरुक्तिमाह—

यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः। (सु. क. २)
तस्माल्लूतास्तु भाष्यन्ते संख्यया ताश्च षोडश॥ ३८॥

चूँकि क्रुद्ध महर्षि वसिष्ठ के स्वेदबिन्दु कटे हुए (लून) तृण पर पड़ गये (उसीसे इनकी उत्पत्ति हुई) इसलिये उन्हें लूता कहते हैं। इसके सोलह भेद होते हैं॥ ३८॥

संप्रति लूतानां घोरविषत्वप्रतिपादनार्थमैतिह्यमाह—यस्माल्लूनं तृणमित्यादि। इति किल श्रुतिः—'विश्वामित्रो नरपतिः कामधेनोर्बलात्कारग्रहेण मुनिसत्तमं वशिष्ठं कोपयांचकार, कुपितेन तेनान्तर्ज्वलद्धिरलकोपानलज्वलितं कुकूलयुगलमिव बहलपाटलं लोचनद्वयं वहता भगवान् रविरवलोकितः। ततस्तस्य भ्रुकुटिभयङ्करललाटतटप्रस्यन्दी स्वेदबिन्दूत्करः प्रचण्डतरः प्रत्यासन्नलूनतृणे धेन्वर्थं संभृते निपतितो लूताऽभूत्'—इति। तास्तु षोडश। यदाह सुश्रुतः—'त्रिमण्डला तथा श्वेता कपिला पीतका तथा। लालामूत्रविषा रक्ता कठिना चाष्टमी स्मृता॥ सौवर्णिका लाजवर्णा जालिन्येकपदी तथा। कृष्णाग्निवक्त्र काण्डा च मालागुण्यष्टमी मता॥' (सु. क. ८) इति॥ ३८॥

विमर्श—इस प्रकार की एक पौराणिक कथा है कि प्राचीनकाल में जब राजा विश्वामित्र महर्षि वसिष्ठ की प्रिय गाय कामधेनु की पुत्री नन्दिनी को बलपूर्वक छीनने लगे तो मुनि वसिष्ठ को क्रोध आ गया। क्रोध से उनके मस्तक पर पसीना आ गया। उसकी कुछ बूँदें समीप में पड़े हुए कटे तिनकों पर भी पड़ गयीं। इससे ही एक सविष जीव विशेष की उत्पत्ति हो गई। लून या कटे हुए तृण से उत्पत्ति के कारण इसे लूता कहने लगे। यह एक रोचक कथानक अवश्य प्रतीत होता है किन्तु इसका वास्तविक रहस्य क्या है यह कहना दुष्कर है। कुछ विद्वानों ने इसकी व्युत्पत्ति का भिन्न प्रकार से ही वर्णन किया है—

अन्ये वदन्ति भुक्तस्य दुष्टस्यान्नस्य मूर्च्छनात्। संभवन्ति हि विस्फोटा ये लूताकीटलक्षणाः।
यथास्वं धारयन्तस्ते लूताकीटास्तु कीर्तिताः॥

वस्तुतः इस व्युत्पत्ति में सार दिखाई देता है। सुश्रुत ने मकड़ियों के सोलह भेद बताये हैं। उनके नामों को मधुकोश में देखें।

लूतानां सामान्यदंशलक्षणमाह—

ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः॥ ३९॥
पिडका विविधाकारा मण्डलानि महान्ति च।

शोथा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा ॥ ४० ॥
सामान्यं सर्वलूतानामेतद् दंशस्य लक्षणम् । (सु. क. २)

उनके दंश से दंशस्थान पर कोथ, रक्तस्राव, ज्वर, जलन, अतिसार तथा अन्य त्रिदोषज रोग उत्पन्न हो जाते हैं। विविध आकार की पिडकायें, बड़े-बड़े चकत्ते, मृदु या श्यावर्ण शोथ उत्पन्न हो जाते हैं। ये शोथ विसर्री (फैलने वाले) होते हैं। सब मकड़ियों के दंश के ये सामान्य लक्षण हैं ॥ ३९-४० ॥

तासां सामान्यदंशलक्षणमाह—ताभिर्दष्ट इत्यादि। दंशकोथ इति दंशदेशे पूतिभाव इत्यर्थः। प्रवृत्तिः क्षतजस्येति रक्तस्य प्रवर्तनम्। सर्वलूतानामिति असाध्याष्टविधसौवर्णिकादिलूतानामेव सामान्यलक्षणं ज्ञेयम्। यतस्त्रिमण्डलादीनामष्टानां कृच्छ्रसाध्यत्वं, ताभिर्दष्टे शिरोदुःखमित्यादिना सामान्यलक्षणमभिधाय सौवर्णिकाद्यनन्तरमेतत् पठितवान् सुश्रुतः। माधवकरेण तु षोडशानां सामान्यलक्षणमेतदित्यभिप्रायेण पठितमिति ॥ ३९-४० ॥

विमर्श—मकड़ी को अंग्रेजी में स्पाइडर (Spider) कहते हैं। इससे एक सौम्यस्वरूप का विष निकलता है जो छोटे-छोटे जन्तुओं को मार डालता है, किन्तु मनुष्यों में उसका प्रभाव बहुत साधारण होता है। इसकी एक जाति और होती है जिसे लैट्रोडैक्टस (Latrodectus) कहते हैं। इससे अतितीव्र विष निकलता है, जिसके कारण तीव्र पीडा, स्थानीय शोथ, शोफ (Oedoma), कभी-कभी कोथ (Gangrene), रक्तमूत्रता (Haematuria) तथा नाडीसंस्थान की विकृति के लक्षण प्रकट होते हैं। इससे दंशस्थान पर संज्ञानाश हो जाता है। कभी-कभी श्वसनसंस्थानीय लक्षण तथा धनुर्वातिक पेशी-संकोच के लक्षण भी दिखाई पड़ते है। इसमें अन्य पूयजनक जीवाणु का उपसर्ग भी हो सकता है। उस अवस्था में ज्वर अधिक तीव्र हो जाता है।

त्रिमण्डलाद्यष्टानां दूषीविषाणां लक्षणमाह—

दंशमध्ये तु यत् कृष्णं श्यावं वा जालकाचितम् ॥ ४१ ॥
ऊर्ध्वाकृति भृशं पाकं क्लेदशोथज्वरान्वितम् । (च. चि. २५)
दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्दिशेत् ॥ ४२ ॥

दंशस्थान के मध्य में जो काला व श्याववर्ण का, जालवत् रचना से युक्त, ऊपर से उठा हुआ, या जले हुए के समान क्लिन्नता, शोथ तथा ज्वर से युक्त बहुत बड़ा पाक होता है उसे दूषीविष श्रेणी की मकड़ियों से दष्ट (काटा हुआ) समझना चाहिये ॥ ४२ ॥

त्रिमण्डलादयोऽष्टौ दूषीविषास्तासां लक्षणमाह— दंशमध्ये त्वित्यादि। ऊर्ध्वाकृतीति ऊर्ध्वगस्वरूपम्, अन्ये 'दग्धाकृति' इति पठन्ति, तद्व्यक्तार्थम्। दूषीविषाभिरिति कालान्तरप्रकोपिविषाभिः। दष्टमिति दंशम् ॥ ४१-४२ ॥

सौवर्णिकादीनां लूतानां सामान्यलक्षणं प्राह—

शोथः[1] श्वेताः सिता रक्ताः पीता वा[2] पिडका ज्वरः[3] ।
प्राणान्तिकाश्च[4] जायन्ते श्वासहिक्काशिरोग्रहाः ॥ ४३ ॥
(च. चि. २५)

---

१. 'शोथाः' क. । २. 'सपिडकाज्वराः' क. । ३. सर्पाणामेव विण्मूत्रकीटाः स्युः कीटजास्तु ताः । दूषीविषाः प्राणहरा इति संक्षेपतो मताः ॥ इति. ख. । ४. 'प्राणान्तिकाभिः' क. ।

सौवर्णिक आदि आठ प्रकार की मकड़ियों के विष से शोथ, सफेद, लाल व पीले वर्ण की पिडकायें, ज्वर, श्वास, हिचकी और सिर में जकड़ाहट ये लक्षण होते हैं। ये मकड़ियाँ प्राणघातक होती हैं ॥ ४३ ॥

सौवर्णिकादीनामष्टानामसाध्यानां प्राणहराणां सामान्यलक्षणमाह—शोथ इत्यादि। प्राणान्तिका इति प्राणहराः ॥ ४३ ॥

मूषिकदूषीविषलक्षणमाह—

आदंशाच्छोणितं पाण्डुमण्डलानि ज्वरोऽरुचिः ।
लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्दिते ॥ ४४ ॥ (च. चि. २५)

मूषिक के दूषीविष से पीड़ित रोगी में दंशस्थान से रक्तस्राव प्रारम्भ हो जाता है। उसमें पाण्डुवर्ण के चकत्ते, ज्वर, अरुचि, रोमहर्ष तथा जलन के लक्षण होते हैं ॥ ४४ ॥

आखुदूषीविषलक्षणमाह—आदंशादित्यादि। आदंशाच्छोणितमित्यत्र 'गलति' इति शेषः। आखवः शुक्रविषाः। यदुक्तं-'शुक्रं पतति यत्रैषां शुक्रस्पृष्टैः, स्पृशन्ति यत्।' (सु.क.) इति ॥ ४४ ॥

विमर्श—चूहों के शुक्र में विष रहता है। वह जहाँ गिरता है वहीं विकार प्रारम्भ हो जाते हैं—'शुक्रं पतति यत्रैषां शुक्रस्पृष्टैः स्पृशन्ति यत्' आजकल इस रोग को मूषिकदंश ज्वर (Rat Bite fever) कहते हैं। स्पाइरिलम माइनस (Spirillum Minus) नामक चूहे के काटने से इस रोग की उत्पत्ति होती है। यह रोग चीन, जापान और आस्ट्रेलिया में पाया जाता है। कभी-कभी भारतवर्ष में भी इसके रोगी मिल जाते हैं। काटने के दो से छः सप्ताह के अन्दर लक्षण प्रारम्भ हो जाते हैं। शीतपूर्व ज्वर, मिचली, वमन, शाखाओं में (विशेषतया दंशस्थान पर) पीड़ा होती है। समीपस्थ लसग्रन्थियाँ सूज जाती हैं। मुख, शाखा तथा धड़ पर शीतपित्त के समान चकत्ते भी कभी-कभी पड़ जाते हैं। ज्वर धीरे-धीरे बढ़कर १०३° हो जाता है। चार-पाँच दिन में यह उतर जाता है। एक दिन रुक कर पुनः इसकी पुनरावृत्ति होती है। दंश के स्थानीय लक्षण, पुनरावर्तक ज्वर, लसग्रन्थिवृद्धि, श्वेतकायाणुमयता (Leucocytosis) तथा उपसिप्रिय की वृद्धि (Eosinophillia) से इस रोग का विनिश्चय किया जा सकता है।

प्राणहरमूषिकदंशं लक्षयति—

मूर्च्छाङ्गशोथवैवर्ण्यक्लेदशब्दाश्रुतिज्वराः । (च. चि. २५)
शिरोगुरुत्वं लालासृक्छर्दिश्चासाध्यमूषिकैः ॥ ४५ ॥

असाध्य मूषिकों के काटने से मूर्च्छा, अङ्गों में शोथ, विवर्णता (Discolouration), गीलापन, बधिरता, ज्वर, सिर में भारीपन, लालास्राव तथा रक्तवमन ये लक्षण होते हैं ॥ ४५ ॥

प्राणहरमूषिकलक्षणमाह—मूर्च्छेत्यादि। अङ्गशोथेति मूषिकाकार एवाङ्गशोथो ज्ञेयः। यदुक्तमन्यत्र—'चीयते ग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः।' (सु. क. ७) इति। शब्दाश्रुतिः बाधिर्यम्, अन्ये 'मन्दारुचिः' इति पठन्ति। असाध्यमूषिकैः मारणात्मकैः ॥ ४५ ॥

विमर्श—मूषिक के १८ भेद और प्रत्येक के दंश या विष के लक्षण सुश्रुत संहिता कल्पस्थान अ० ७ और अष्टाङ्गहृदय उत्तर तन्त्र अ० ३८ में देखें।

कृकलासदष्टलक्षणं व्याचष्टे—

कार्ष्ण्यं श्यावत्वमथवा नानावर्णत्वमेव वा । (च. चि. १३)

मोहोऽथ वर्चसो भेदो दष्टे स्यात् [1]कृकलासकैः ॥ ४६ ॥

गिरगिट के द्वारा काट लेने पर दंशस्थान का वर्ण काला, श्याव या विचित्र हो सकता है। रोगी मूर्च्छा और अतिसार से पीडित रहता है ॥ ४६ ॥

कृकलासदष्टलिङ्गमाह—कार्ष्ण्यमित्यादि। वर्चसो भेदोऽतिसारः ॥ ४६ ॥

वृश्चिकविषस्य लक्षणान्याह—

दहत्यग्निरिवादौ च भिनत्तीवोर्ध्वमाशु च।
वृश्चिकस्य विषं याति दंशे पश्चात्तु तिष्ठति ॥४७॥ (च. चि. २३)

बिच्छू के दंश या डंक मारने पर प्रारम्भ में (दंशस्थान पर) अग्नि के समान दाह एवं भेदन के समान पीडा होती है। इसके बाद बिच्छू का विष शीघ्र ही ऊपर को चढ़ता है और कुछ देर बाद वह पुनः दंशस्थान में स्थिर हो जाता है ॥ ४७ ॥

वृश्चिकदंशस्यासाध्यतां निरूपयति—

दष्टोऽसाध्यश्च हृद्घ्राणरसनोपहतो नरः। (च. चि. २५)
मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसून् ॥ ४८ ॥

बिच्छू के दंश से जिस मनुष्य के हृदय, नासिका एवं जिह्वा में विकार हो गया हो वह असाध्य होता है। इसके अतिरिक्त बिच्छू के काटने से जिसका मांस गल कर गिरने लगे एवं अत्यधिक वेदना हो वह भी शीघ्र ही प्राण त्याग कर देता है ॥ ४८ ॥

वृश्चिकविषलिङ्गमाह—दहत्यग्निरिवेत्यादि। वृश्चिकः स्वनामख्यातः, स च आरविषः। दष्टोऽसाध्यश्च। हृद्घ्राणरसनोपहतो नर इति यदा हृदयनासाजिह्वोपघाता भवति तदा तद्दष्टो न साध्यः। मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसूनित्यादिनाऽयमपरोऽसाध्यप्रकारः। 'दष्टोऽसाध्यैस्तु' इति पाठपक्षेऽसाध्यैः सद्यःप्राणहरैर्वृश्चिकैर्दष्टो यथोक्तलिङ्गो भवति। चरकेऽप्ययमेव पाठः ॥ ४७–४८ ॥

विमर्श—बिच्छू भी एक विषैला प्राणी है। इसकी भी अनेक जातियाँ पाई जाती हैं। कुछ जातियों के दंश से रोगी को कष्ट तो पर्याप्त होता है किन्तु मृत्यु का भय नहीं रहता। इनके विष को केवल रुजाकर कह सकते हैं। इसके अतिरिक्त कुछ बिच्छू इस प्रकार के भी पाये जाते हैं जिनके डंक मारते ही शरीर का मांस गलकर गिरने लगता है और रोगी की मृत्यु हो जाती है। इन्हें मारक या सद्योमारक की कोटि में रखा जा सकता है। बिच्छू के काटने पर दंशस्थान से कुछ ऊपर अंगों में कई बन्ध लगा दिये जाते हैं जिससे विष का प्रसार ऊपर की ओर न हो। सर्प-विष के समान इसका भी ऊर्ध्वगमन का स्वभाव होता है। इन दोनों में एक सबसे बड़ा अन्तर यह है कि सर्पदंश में पीड़ा नहीं होती और इसमें पीडा की पराकाष्ठा हो जाती है। इसी आधार पर लोक में एक कहावत भी है—'साँप का काटा सोवे, बिच्छू का काटा रोवे'। सर्पदंश में निद्रा, तन्द्रा मुख्य लक्षण है।

वृश्चिक-विष का विशेष प्रभाव नाडीमण्डल पर होता है। तीव्र विष में अन्य स्थानों के दंश होने पर भी मस्तिष्क और नाडियों के द्वारा हृदय, नासिका, जिह्वा आदि अंगों में भी कम्प, स्तम्भ आदि विकार हो सकते हैं और यह स्थिति प्रायः घातक होती है। इसी आधार पर कुछ

१. इति पाठाभिप्रायेण।

लोग इस श्लोक में 'दष्टोऽसाध्यैः' यह पाठान्तर मानते हैं और इसे तीव्र विष वाले असाध्य वृश्चिक के दंश का लक्षण मानते हैं।

विच्छू के पुच्छ प्रान्त में दो विष-गर्भ ग्रन्थियाँ रहती हैं। डंक मारने से इनका विष दंश-स्थान से प्रविष्ट हो जाता है। इसके कारण दंशस्थान पर तीव्र पीडा रहती है। सार्वदैहिक लक्षणों में ज्वर होकर तीन से छः दिन तक रह सकता है, उदर में भयङ्कर शूल, वमन एवं अतिसार होते हैं। नाडीमण्डल के प्रभावित हो जाने पर सर्वाङ्ग में स्वेदप्रवृत्ति एवं पेशियों में उद्वेष्टन (Cramps) होते हैं। उद्वेष्टन अधिकतर गले और जबड़े की पेशियों में पाये जाते हैं। यदि विष बहुत ही तीव्र है तो आगे चलकर पक्षाघात, श्वासावरोध तथा संन्यास के उपरान्त मृत्यु हो जाती है। छोटे बच्चों में वृश्चिक दंश की मारकता अधिक पाई जाती है।

कणभदष्टलिङ्गमाह—

विसर्पः श्वयथुः शूलं ज्वरश्छर्दिरथापि च ।
लक्षणं कणभैर्दष्टे दंशश्चैवावसीदति[1] ॥ ४९ ॥ (च. चि. २३)

कणभ नामक विशेष कीड़े के काटने पर विसर्प, शोथ, शूल, ज्वर एवं वमन ये लक्षण होते हैं। इसके अतिरिक्त दंशस्थान कटकर गिरने लगता है ॥ ४९ ॥

कणभदष्टलिङ्गमाह— विसर्प इत्यादि । कणभः कीटविशेषः ॥ ४९ ॥

विमर्श—सुश्रुत ने १८ वातिक, २४ पैत्तिक, १३ श्लैष्मिक और १२ सान्निपातिक सविष क्रिमियों का वर्णन किया है। कणभ पैत्तिक और उच्चिटिङ्ग वातिक कीटों में से एक है। कीटों का विशेष वर्णन सुश्रुतसंहिता के कीटकल्पाध्याय में देखें। कणभ को कुछ लोग वृश्चिक और कुछ कृकलास का भेद (विषखोपडा) मानते हैं किन्तु इसका विष लोक में असाध्य माना जाता है। श्री गंगाधर जी इसे भ्रमर विशेष मानते हैं।

उच्चिटिङ्गदष्टस्य लक्षणानि व्याचष्टे—

हृष्टलोमोच्चिटिङ्गेन स्तब्धलिङ्गो भृशार्तिमान् ।
दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते ॥ ५० ॥ (च. चि. २३)

उच्चिटिङ्ग (वृश्चिक-भेद) नामक कीट के काटने पर रोम खड़े हो जाते हैं, शिश्नोत्थापन हो जाता है, एवं अत्यधिक पीड़ा का अनुभव होता है। रोगी को ऐसी प्रतीति होती है मानो उसके सम्पूर्ण अङ्ग शीतल जल से सिंचित हैं ॥ ५० ॥

उच्चिटिङ्गदष्टमाह—हृष्टरोमेत्यादि ॥ ५० ॥

विमर्श—सुश्रुत के अनुसार उच्चिटिङ्ग एक वातिक सविष कीट है। वाग्भट ने इसे वृश्चिक-भेद ही माना है किन्तु यह पुच्छ से डंक न मारकर मुख से काटता है। यही इसकी विशेषता है। 'उच्चिटिङ्गस्तु वक्त्रेण दशत्यभ्यधिकव्यथः' (वा. उ. ३७)

सविषमण्डूकदष्टलिङ्गमाह—

एकदंष्ट्रार्दितः शूनः सरुजः पीतकः सतृट् ।
छर्दिर्निद्रा च सविषैर्मण्डूकैर्दष्टलक्षणम् ॥ ५१ ॥ (च. चि. २३)

विषैले मेढकों के काटने से रोगी की एक दाढ़ में दर्द, पीले वर्ण की पीडायुक्त सूजन, प्यास, वमन और निद्रा ये लक्षण होते हैं ॥ ५१ ॥

---

१. 'दंशश्चैव विशीर्यते' इति पाठान्तरम् ।

विमर्श—चक्रपाणि आदि टीकाकारों ने इस श्लोक का निम्नलिखित अर्थ किया है—'एक ही दाढ़ से दंश हुआ हो, रोगी शोथ और पीडा युक्त हो और पीला हो जावे, प्यास, वमन और निद्रा हो तो उसे सविष मण्डूक दष्ट समझें।'

सुश्रुत ने कृष्ण, सार, कुहुक, हरित, रक्त, यववर्ण, भ्रुकुटी और कोटिक भेद से आठ प्रकार के मण्डूकों का वर्णन किया है। पहिले ६ के दंश से दंशस्थान पर खुजली और मुख से पीला झाग आता है और अन्तिम दो के दंश में अत्यधिक दाह, वमन और मूर्च्छा भी होती है। कुछ आचार्य अन्तिम दो को असाध्य मानते हैं।

सविषमत्स्यजलौकसां दष्टलक्षणं प्राह—

मत्स्यास्तु सविषाः कुर्युर्दाहं शोथं रुजं तथा ।
कण्डूं शोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः ॥ ५२ ॥ (च. चि. २३)

विषैली मछलियों के दंश से जलन, शोथ और पीडा ये लक्षण होते हैं। विषैली जोंकों के काटने पर खुजली, शोथ, ज्वर और मूर्च्छा की उत्पत्ति होती है ॥ ५२ ॥

सविषमण्डूकादिदष्टलिङ्गमाह—एकदंष्ट्रार्दित इत्यादि। स्वभावादेकया दंष्ट्रया कृतो दंशो भवति ॥ ५१-५२ ॥

विमर्श—सुश्रुत ने ६ सविष और ६ निर्विष जलौका का वर्णन किया है और इन्द्रायुधादंश को असाध्य माना है। (सु. सू. १३)

गोधाया दष्टलक्षणान्याह—

विदाहं श्वयथुं तोदं स्वेदं च गृहगोधिका ।

गृहगोधा (छिपकली) के काटने पर जलन, सूजन, सुई के चुभने जैसी पीडा और स्वेदप्रवृत्ति ये लक्षण होते हैं।

गृहगोधिकादष्टलिङ्गमाह—विदाहमित्यादि। गृहगोधिका ज्येष्ठी, अन्ये तु भ्रामरकमाहुः। अत्र वक्ष्यमाणं कुर्यादिति सम्बन्धनीयं तेन विदाहादीनां कर्मत्वम् ॥—

विमर्श—सुश्रुत ने इसके श्वेता, कृष्णा, रक्तराजी, रक्तमण्डला, सर्षपश्वेता और सर्षपिका यह ६ भेद माने हैं। सर्षपिका दंश से हृदय में पीड़ा और अतिसार विशेष लक्षण होते हैं और इसका दंश असाध्य होता है।

शतपद्या दष्टलक्षणान्याह—

दंशे स्वेदं रुजं दाहं कुर्याच्छतपदीविषम् ॥ ५३ ॥ (च. चि. २३)

शतपदी या कनखजूरे (कांतर या गोजर) के विष से स्वेदप्रवृत्ति, पीडा और दाह ये लक्षण होते हैं ॥ ५३ ॥

शतपदीदष्टलक्षणमाह—दंशे इत्यादि। कुर्याच्छतपदीविषमिति शतपदी काण्डिका ॥

विमर्श—सुश्रुत ने इसके ८ भेद बताये हैं—'शतपद्यस्तु परुषा, कृष्णा, चित्रा, कपिला, पीतिका, रक्ता, श्वेता, अग्निप्रभा इत्यष्टौ; ताभिर्दष्टे शोफो वेदना दाहश्च हृदये, श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च।' (सु. क. ८)

मशकदष्टलक्षणान्याह—

कण्डूमान् मशकैरीषच्छोथः स्यान्मन्दवेदनः ।
असाध्यकीटसदृशमसाध्यमशकक्षतम् ॥ ५४ ॥ (च. चि. २३)

मच्छर के काटने पर खुजली, साधारण शोथ और मन्द वेदना होती है। असाध्य कीट के समान असाध्य मच्छर का दंश भी असाध्य होता है ॥ ५४ ॥

मशकदष्टलिङ्गमाह—कण्डूमानित्यादि। असाध्यकीटसदृशमिति असाध्यकीटैर्लूतादिभिः समलक्षणमिति। असाध्यं मशकक्षतमिति। पञ्चसु मशकेषु मध्ये पर्वतीयमशकक्षतमसाध्यम्। यदाह सुश्रुतः—पर्वतीयस्तु कीटैश्च प्राणहरैस्तुल्यलक्षणः' (सु. क. ८) इति ॥

विमर्श—सौवर्णिक आदि आठ प्रकार की मकड़ियों के समान कुछ पहाड़ी मच्छर भी इस प्रकार के होते हैं कि उनका काटा हुआ रोगी मर जाता है। सुश्रुत ने पाँच प्रकार के मच्छरों का वर्णन किया है। उनमें पर्वतीय जाति प्राणनाशक होती है—'सामुद्रः, परिमण्डलः, हस्तिमशकः, कृष्णः, पर्वतीय इति पञ्च, पर्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः' (सु० क० अ० ८।१८ः)। विभिन्न मशकों के दंश द्वारा मलेरिया, श्लीपद, कालाजार आदि अनेक भयानक रोगों के हेतुभूत कीटाणुओं का भी संक्रमण एक रोगी से दूसरे पर होता है।

मक्षिकादष्टलक्षणं विवेचयति—

सद्यः प्रस्राविणी श्यावा दाहमूर्च्छाज्वरान्विता ।
पिडका मक्षिकादंशे तासां तु स्थगिकाऽसुहृत् ॥ ५५ ॥ (च. चि. २३)

मक्खी (मधुमक्खी) के काटने पर शीघ्र स्राव करने वाली, श्याववर्ण की, जलन, मूर्च्छा एवं ज्वर के लक्षणों से युक्त पिडका उत्पन्न हो जाती है। उनमें स्थगिका नामक मक्खी का दंश, प्राणनाशक होता है ॥ ५५ ॥

मक्षिकादष्टलिङ्गमाह—सद्य इत्यादि। तासां च स्थगिकाऽसुहृदिति तासां सुश्रुतोक्तषण्मक्षिकाणां मध्ये स्थगिका प्राणहरेत्यर्थः ॥ ५ ॥

विमर्श—सुश्रुत ने छः प्रकार की मक्षिकाओं का वर्णन किया है—'कान्तारिका, कृष्णा, पिङ्गला, मधूलिका, काषायी, स्थालिका (स्थगिका); काषाया स्थालिका च प्राणहरे'। (सु० क० ८।१७)

चतुष्पदां द्विपदां च नखदन्तविषलक्षणमाह—

चतुष्पद्भिर्द्विपद्भिश्च नखदन्तविषं च यत् ।
शूयते पच्यते वापि स्रवति ज्वरयत्यपि ॥ ५६ ॥ (च. चि. २३)

चतुष्पद या द्विपद जन्तुओं के नाखून और दाँतों का विष लगने से दंशस्थान पर सूजन और पाक हो जाता है। पाक से स्राव होता है और रोगी ज्वर से पीडित रहता है ॥ ५६ ॥

चतुष्पद्भिरिति चतुष्पादा व्याघ्रादयः। द्विपदा वनमानुषवानरादयः ॥ ५ ॥

प्रसङ्गाद् व्याघ्रादिहिंसकजन्तूनां विषलक्षणमाह—

श्वशृगालतरक्ष्वृक्षव्याघ्रादीनां यदाऽनिलः ।
श्लेष्मप्रदुष्टो मुष्णाति संज्ञां संज्ञावहाश्रितः ॥ ५७ ॥
तदा प्रस्रस्तलाङ्गूलहनुस्कन्धोऽतिलालवान्[1] ।
अव्यक्तबधिरान्धश्च सोऽन्योन्यमभिधावति ॥ ५८ ॥

---

१. ह्रस्वता छन्दोऽनुरोधेन।

प्रमूढोऽन्यतमस्त्वेषां खादन्विपरिधावति ।
तेनोन्मत्तेन दष्टस्य दंष्ट्रिणा सविषेण तु ॥ ५९ ॥
सुप्तता जायते दंशे कृष्णं चातिस्रवत्यसृक् ।
दिग्धविद्धस्य लिङ्गेन प्रायशश्चोपलक्षितः ॥ ६० ॥ (सु. क. ७)

कुत्ता, गीदड, तेंदुवा, रीछ, व्याघ्र आदि हिंसक जन्तुओं में वायु कफ से दूषित होकर जब उनके संज्ञावाही स्रोतों में आ जाता है तो इससे उन जन्तुओं की ज्ञानशक्ति नष्ट हो जाती है। उस समय उनकी पूँछ, हनु (Lower jaw) तथा कन्धे नीचे गिर जाते हैं, मुख से लार टपकती रहती है, वे कुछ अन्धे और बहरे प्रतीत होते हैं और एक दूसरे की ओर दौड़ते हैं। इनमें जो कोई अधिक पागल होता है वह दूसरों की ओर काटने को दोड़ता है। उस पागल दंष्ट्री से काटे हुए व्यक्ति के दंशस्थान पर संज्ञाशून्यता, कालापन तथा अत्यधिक रक्तस्राव होता है। इसके अतिरिक्त विषलिप्त शस्त्र से आक्रान्त होने पर जो लक्षण होते हैं वे भी इसमें पाये जाते हैं ॥ ५७-६० ॥

श्वादिना दष्टस्यारिष्टलिङ्गानि प्राह—

येन चापि भवेद्दष्टस्तस्य चेष्टां रुतं नरः ।
बहुशः प्रतिकुर्वाणः क्रियाहीनो विनश्यति ॥ ६१ ॥
दंष्ट्रिणा येन दष्टश्च तद्रूपं यस्तु पश्यति ।
अप्सु चादर्शबिम्बे वा तस्य तद्रिष्टमादिशेत् ॥ ६२ ॥
त्रस्यत्यकस्माद्योऽभीक्ष्णं दृष्ट्वा स्पृष्ट्वाऽपि वा जलम् ।
जलत्रासं तु तं विद्याद्रिष्टं तदपि कीर्तितम् ॥ ६३ ॥

पागल कुत्ते आदि जिस जानवर ने काटा हो मनुष्य बार-बार उसके समान चेष्टायें और ध्वनि करता है; अपने प्रकृत कार्यों को नहीं कर पाता एवं उसकी मृत्यु हो जाती है। यदि मनुष्य कुत्ते आदि किसी विशेष जानवर से काटे जाने पर जल या दर्पण में उसी का प्रतिबिम्ब देखता है तो उसे अरिष्ट लक्षणों से युक्त समझना चाहिये। जिसमें जल को देखकर या छूकर बार-बार अचानक डरता है उस रोग को जलत्रास कहते हैं। यह भी अरिष्ट लक्षण है ॥ ६१-६३ ॥

अन्यदरिष्टलक्षणमाह—

अदष्टो वा जलत्रासी न कथंचन सिद्ध्यति ।
प्रसुप्तो वोत्थितो वाऽपि स्वस्थस्त्रस्तो न सिद्ध्यति ॥ ६४ ॥

बिना किसी जानवर के काटे हो जिसको जलत्रास हो जाये वह भी किसी प्रकार ठीक नहीं हो सकता। साधारणतया स्वस्थ दिखाई देने वाला व्यक्ति भी सोते या जागते इस प्रकार डरता हो तो उसे भी असाध्य ही समझना चाहिये ॥ ६४ ॥

विमर्श—जिस प्रकार विषलिप्तशस्त्र के लगने से शरीर में विष के लक्षण प्रकट होने लगते हैं, वैसे ही किसी विष से आक्रान्त कुत्ते आदि प्राणी के काटने से भी विष के वही लक्षण प्रकट होते हैं जिससे वह प्राणी आक्रान्त है। विषाक्रान्त होने पर रोगी दर्पण या जल में उसी पशु को

देखता है, जिसने उसे काटा है। इसे अलर्कविष और अंग्रेजी में रेबिस (Rabis) कहते हैं। प्रकृत में उसके एक लक्षण स्वरूप **जलसंत्रास** रोग का वर्णन किया गया है। आजकल इसे हाइड्रोफोबिया (Hydrophobia) कहते हैं। विषाक्रान्त कुत्ते, बिल्ली, गीदड़ और भेड़िये के काटने से इस रोग की उत्पत्ति होती है। कभी-कभी बिना किसी जन्तु के काटे निज कारणों से भी आयुर्वेद में इसकी उत्पत्ति मानी गई है—

अदष्टस्यापि जन्तोर्हि जलत्रासो भवेद्यदि। तस्यारिष्टं हि भिषजो ब्रुवते विषचिन्तकाः।
जलं विना जलत्रासो जायते श्लेष्मसञ्चयात्॥

इस प्रकार का जलसंत्रास असाध्य होता है। इसका कारण श्लेष्मा द्वारा बुद्धिस्थान का अवरोध होने पर रोगी सोते-जागते सर्वदा अपने को जल में डूबता हुआ सा देखता है। जल को देखकर डरता है—

'बुद्धिस्थानं यदा श्लेष्मा केवलः प्रतिपद्यते। तदा बुद्धौ निरुद्धायां श्लेष्मणाधिष्ठितो नरः॥
जाग्रत्सुप्तोऽथवात्मानं मज्जन्तमिव मन्यते। सलिलात् त्रस्यति तदा जलत्रासं तु तं विदुः॥

जलसंत्रास नाडीमण्डल का रोग है। सर्वप्रथम यह किसी जानवर (कुत्ता, बिल्ली) आदि में होता है। इनके काटने से मनुष्य में इस रोग की उत्पत्ति होती है। लक्षणोत्पत्ति के पश्चात् चार-पाँच दिन में ही रोगी का प्राणान्त हो जाता है। इस रोग का संचय काल १ से २ मास होता है। कभी-कभी दो सप्ताह में और कभी आठ मास के पश्चात् भी लक्षण प्रारम्भ होते हैं।

इसमें विशेष प्रकार का मस्तिष्कशोथ (Encephalitis) होता है। सुषुम्नाशीर्ष में इसकी स्पष्ट प्रतीति होती है। मस्तिष्कावरण में स्थानीय रक्तस्राव मिलते हैं। मस्तिष्कसुषुम्ना जल की वृद्धि हो जाती है। इसका उत्पादक कारण एक सूक्ष्मदर्शकातीत एवं निःस्यन्दनातीत (Ultra Microscopic and Filterable) विषाणु है। यह रुग्ण पशु के मस्तिष्क और लालारस में रहता है। काटने से इसका संक्रमण मनुष्य में हो जाता है। सुषुम्नाशीर्ष (Medulla) और लघुमस्तिष्क (Cerebellum) में नैग्री बाडी (एक अण्डाकार सूक्ष्म रचना) पाई जाती है। विषाक्रान्त पशु की प्रकृति बदल जाती है—

(१) यह उत्तेजित होकर दूसरे पशुओं को काटता है इसका निर्देश माधव ने 'अन्योऽन्यमभिधावति' के द्वारा किया है।

(२) लालास्राव—इसका निर्देश 'अतिलालवान्' के द्वारा किया गया है।

(३) पिछली टाँगों में घात (Paralysis of hind limbs) हो जाता है। इससे उसकी पुच्छ नीचे गिर जाती है। इसी को प्रस्रस्त लाङ्गूल कहते हैं। घात आगे बढ़ता है जिससे हनु और कन्धे भी लटक जाते हैं।

जलसंत्रास के लक्षण तीन अवस्थाओं में विभक्त किये गये हैं—

(१) प्रथम अवस्था (First stage) इसे पूर्वरूप की अवस्था भी कहते हैं। इसमें निम्न लक्षण होते हैं—

(क) दंशस्थान पर पीडा।
(ख) मस्तिष्कावसाद (Mental depression)
(ग) बेचैनी और निद्रानाश।
(घ) नाडी की गति तीव्र हो जाती है।
(ङ) बोलने में कठिनता (Dysphagia)

(२) द्वितीया अवस्था (Second stage) इसे उत्तेजना की अवस्था भी कहते हैं। एक या

दो दिन बेचैनी और ज्वर बढ़ जाता हैं। चेहरे पर भयानकता आ जाती है। गले की पेशियों में संकोच हो जाने से बोलने और निगलने में कठिनाई होती है। रोगी जल या लालारस को भी नहीं निगल पाता। वाणी (Hoarse) हो जाती है। इसके बाद शरीर की अन्य पेशियाँ भी आक्रान्त हो जाती हैं और वायु शीत आदि साधारण वाह्य उत्तेजनाओं से भी बाह्यायाम (Opisthotonos) से युक्त आक्षेप होने लगते हैं। यह अवस्था दो से तीन दिन तक रहती है।

(३) तृतीयावस्था (Third stage)—इसे घात (Paralysis) की अवस्था भी कहते हैं। परिश्रान्त होने पर पेशी-संकोच पूर्णतया बन्द हो जाते हैं, रोगी संन्यस्तावस्था में पहुँचकर मृत्यु-मुख में चला जाता है।

साध्यासाध्यता—शंखप्रदेश (scalp) चेहरे तथा गर्दन के दंश अधिक भयानक या असाध्य होते हैं।

निर्विषपुरुषलक्षणमाह—

प्रशान्तदोषं प्रकृतिस्थधातुमन्नाभिकामं सममूत्रविट्कम् ।
प्रसन्नवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यम् ॥ ६५ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने विषनिदानं समाप्तम् ॥ ६९ ॥

जिसका दोष प्रकोप शान्त हो गया हो, जिसकी धातुयें प्रकृतिस्थ (निर्मल) हो गई हों, जो अन्न की इच्छा करता हो, जिसको मलमूत्र का त्याग ठीक समय पर और उचित रूप में होता हो, जिसका वर्ण, इन्द्रिय, मन और चेष्टायें प्राकृत हों उस मनुष्य को वैद्य निर्विष समझे ॥ ६५ ॥

विषातुरः कीदृशो निर्विषो भवतीति दर्शयितुमाह—प्रशान्तदोषमित्यादि। अन्नाभिकाममित्यनेन प्रकृतिस्थाग्नितोक्ता। यदाह चरकः—'प्रायेणोपहताग्नित्वात् सपिच्छमतिसार्यते। प्राप्नोति चास्यवैरस्यं न चान्नमभिनन्दति॥' इति। सममूत्रविट्कमिति अक्षीणानतिरिक्तमूत्रपुरीषम्। अन्ये—'समसूत्रजिह्वं' इति पठन्ति, तदाऽयमर्थः—सममविकृतं सूत्रं जिह्वा च यस्य स तथा, एतेन विषदुष्टा जिह्वा न रसबोधिनी भवति, सूत्रमपि जिह्वायां विषप्रभावेण वैकृतं भवतीति प्रतिपादयति। जिह्वाग्रहणेनैव सूत्रग्रहणे सिद्धे तस्य च रसग्रहणे अनुगुणत्वप्रतिपादनार्थं पृथगुपादानम्। अनेन श्लोकेन 'समदोषः समाग्निश्च' (सु. सू. १५) इत्यादिश्लोकस्य सकल एवार्थः उपबद्धः ॥ ६५ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विषनिदानं समाप्तम् ॥ ६९ ॥

सूक्तिमुक्तावलीग्रन्थे[1] गुरुणा यच्च गुम्फितम्। मया समस्तमग्रन्थि तद्गिरा शुद्धियुक्तया[2] ॥१॥
गुणनिधिगुरुबद्धे दाम्नि वाङ्मालतीनां, परमपरिमलश्रीधाम्नि लब्धावलम्बम्।
स्फुरति वचनकुन्दं मन्दसौरभ्यलेशाद्वचनमपि मदीयं किंचिदेतत् कदाचित् ॥ २ ॥
इति श्रीविजयरक्षितश्रीकण्ठदत्तविरचिता मधुकोशव्याख्या समाप्ता ॥

विमर्श—इस श्लोक में स्वस्थ के सम्पूर्ण लक्षणों से युक्त पुरुष को निर्विष माना है। स्वस्थ लक्षण—समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥

समाप्तं चेदं विषरोगनिदानम्।

---

१. 'गुम्फ' क.। २. 'शुद्धमुक्तया' क.।

अथ विषयानुक्रमणिका

ज्वरोऽतिसारो ग्रहणी चार्शोऽजीर्णं विसूचिका ।
अलसश्च विलम्बी च क्रिमिरुक्पाण्डुकामलाः ॥ १ ॥
हलीमकं रक्तपित्तं राजयक्ष्मा उरःक्षतम् ।
कासो हिक्का सह श्वासैः स्वरभेदस्त्वरोचकः ॥ २ ॥
छर्दिस्तृष्णा च मूर्च्छाद्या रोगाः पानात्ययादयः ।
दाहोन्मादावपस्मारः कथितोऽथानिलामयः ॥ ३ ॥
वातरक्तमूरुस्तम्भ आमवातोऽथ शूलरुक् ।
पक्तिजं शूलमानाह उदावर्तोऽथ गुल्मरुक् ॥ ४ ॥
हृद्रोगो मूत्रकृच्छ्रं च मूत्राघातस्तथाऽश्मरी ।
प्रमेहो मधुमेहश्च पिडकाश्च प्रमेहजाः ॥ ५ ॥
मेदस्तथोदरं शोथो वृद्धिश्च गलगण्डकः ।
गण्डमालाऽपची ग्रन्थिरर्बुदः श्लीपदं तथा ॥ ६ ॥
विद्रधिर्व्रणशोथश्च द्वौ व्रणौ भग्ननाडिके ।
भगन्दरोपदंशौ च शूकदोषस्त्वगामयः ॥ ७ ॥
शीतपित्तमुदर्दश्च कोठश्चैवाम्लपित्तकम् ।
विसर्पश्च सविस्फोटः सरोमान्त्यो मसूरिकाः ॥ ८ ॥
क्षुद्रास्यकर्णनासाक्षिशिरःस्त्रीबालकामयाः ।
विषं चेत्ययमुद्दिष्टो रुग्विनिश्चयसंग्रहः ॥ ९ ॥

ज्वर, अतिसार, ग्रहणी, अर्श, अजीर्ण, विसूचिका, अलसक, विलम्बिका, क्रिमिरोग, पाण्डु, कामला, हलीमक, रक्तपित्त, राजयक्ष्मा, उरःक्षत, कास, हिक्का, श्वास, स्वरभेद, अरोचक, छर्दि, तृष्णा, मूर्च्छा, भ्रम, निद्रा, तन्द्रा, संन्यास, पानात्यय, परमद, पानाजीर्ण, पानविभ्रम, दाह, उन्माद, अपस्मार, वातव्याधि, वातरक्त, ऊरुस्तम्भ, आमवात, शूल, परिणामशूल, अन्नद्रवशूल, आनाह, उदावर्त, गुल्म, हृद्रोग, मूत्रकृच्छ्र, मूत्राघात, अश्मरी, प्रमेह, मधुमेह, प्रमेहपिडिका, मेदोरोग, उदररोग, शोथ, वृद्धि, गलगण्ड, गण्डमाला, अपची, ग्रन्थि, अर्बुद, श्लीपद, विद्रधि, व्रणशोथ, शारीरव्रण, सद्योव्रण, भग्न, नाडीव्रण, भगन्दर, उपदंश, शूकदोष, कुष्ठ, शीतपित्त, उदर्द, कोठ, अम्लपित्त, विसर्प, विस्फोट, रोमान्तिका, मसूरिका, क्षुद्ररोग, मुखरोग, कर्णरोग, नासारोग,

नेत्ररोग, शिरोरोग, स्त्रीरोग (प्रदर, योनिव्यापत् , योनिकन्द, मूढगर्भ, सूतिकारोग स्तनरोग, स्तन्यदुष्टि), बालरोग तथा विषरोग इन सबका रोगविनिश्चय नामक ग्रन्थ में संग्रह किया गया है।

सुभाषितं यत्र यदस्ति किंचित्तत्सर्वमेकीकृतमत्र यत्नात् ।
विनिश्चये सर्वरुजां नराणां श्रीमाधवेनेन्दुकरात्मजेन ॥ १० ॥

जहाँ कहीं भी मनुष्यों के रोग-निदान के विषय में उपयुक्त तत्त्व पाये गये हैं उन सब का संग्रह इन्दुकर के पुत्र श्री माधव ने इस रोग-विनिश्चय नामक ग्रन्थ में यत्नपूर्वक किया है ॥

रोगिणां कृते माधवस्य शुभाशंसा—

यत्कृतं सुकृतं किंचित्कृत्वैवं रुग्विनिश्चयम् ।
मुञ्चन्तु जन्तवस्तेन नित्यमातङ्कसन्ततिम् ॥ ११ ॥

इति श्रीमाधवकरविरचितं माधवनिदानं समाप्तम् ॥

इस रोगविनिश्चय नाम ग्रन्थ की रचना करके मैंने जो कुछ भी पुण्य किया है उसके सहारे सम्पूर्ण मानवजाति सदा रोग-समूह से मुक्ति पाती रहे ॥ ११ ॥

इति श्रीमाधवकरविरचितस्य रोगविनिश्चयापरपर्य्यायमाधवनिदानस्य काशीहिन्दूविश्वविद्यालयीयायुर्वेदमहाविद्यालयाध्यापकेन श्रीयदुनन्दनशर्मणा सुसंशोध्य सम्पादिता तच्छिष्येण ऋषिकुलायुर्वेदविद्यालयाध्यापकेन श्रीसुदर्शनशास्त्रिणा कृता विमर्शयुता विद्योतिनी हिन्दी व्याख्या समाप्ता ।

समाप्तश्चायं ग्रन्थः

परिशिष्टम्

अथ सामान्यसन्निपातज्वरस्य भेदाः

एकोल्वणास्त्रयस्तेषु द्व्युल्वणाश्च तथेति षट्। त्र्युल्वणश्च भवेदेको विज्ञेयः स तु सप्तमः ॥१॥
प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च षट्। सन्निपातज्वरस्यैवं स्युर्विशेषास्त्रयोदश ॥२॥

सामान्यरूप से सन्निपात ज्वर के १३ भेद—त्रिदोष से उत्पन्न होने वाले सन्निपात ज्वरों में केवल एक-एक दोष की उल्वणता (अधिकता) से तीन भेद और दो-दो दोषों की अधिकता से भी तीन भेद इस प्रकार मिलकर ६ भेद हुए और तीनों दोषों की अधिकता से एक सातवाँ भेद होता है। प्रवृद्ध, मध्य तथा हीन वात, पित्त तथा कफ के द्वारा ६ भेद होते हैं। इस भाँति सन्निपात ज्वर के सामान्यरूप से कुल १३ भेद होते हैं ॥ १-२ ॥

विमर्श—चरकसंहिता चिकित्सास्थान अध्याय ३ में प्रत्येक के अलग-अलग लक्षण भी दिये हैं और कुछ ग्रंथों में प्रत्येक के लिए विभिन्न नाम भी मिलते हैं जिनका उल्लेख नीचे किया जा रहा है। इनमें से कुछ का वर्णन पूर्वार्धं पृष्ठ ९७ पर भी हो चुका है। विभिन्न ग्रन्थों में इनके विशिष्ट नाम और लक्षण भी दिए गये हैं उनका वर्णन नीचे किया जा रहा है।

अथानुक्रमेण त्रयोदशसन्निपातनामानि—

विस्फारकश्चाशुकारी कम्पनो बभ्रसंज्ञकः। शीघ्रकारी तथा भल्लुः सप्तमः कूटपाकलः ॥३॥
संमोहकः पाकलश्च याम्यः क्रकच इत्यपि। ततः कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः ॥४॥

क्रम से उपर्युक्त १३ सन्निपात ज्वरों के नाम ये हैं—१ विस्फारक, २ आशुकारी, ३ कम्प, ४ बभ्र, ५ शीघ्रकारी, ६ भल्लु, ७ कूटपाकल, ८ संमोहक, ९ पाकल, १० याम्य, ११ क्रकच, १२ कर्कटक और १३ वैदारिक ॥ ३-४ ॥

१ वातोल्वणविस्फारकलक्षणम्—

श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथू। पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च ॥
वातोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। एष विस्फारको नाम्ना सन्निपातः सुदारुणः ॥

श्वास, कास, भ्रम, मूर्च्छा, प्रलाप, मोह, कँपकँपी, पँसुलियों में पीड़ा, अधिक जंमाई आना और मुख में कषैलापन ये सब लक्षण त्रिदोष में वात की अधिकता होने पर मिलते हैं और उसका नाम 'विस्फारक' है, यह अत्यन्त भयङ्कर होता है ॥ ५-६ ॥

विमर्श—कुछ ग्रन्थों में 'विस्फोटक' या 'विस्फुरक' पाठ मिलता है तथा लक्षणों में भी कुछ अन्तर है। (देखिए पूर्वार्धं पृ० ९४ मधुकोश)

२ पित्तोल्वणाशुकारिलक्षणम्—

अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च। गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते ॥
पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। भिषग्भिः सन्निपातोऽयमाशुकारी प्रकीर्त्तितः॥

अतिसार, भ्रम, मूर्च्छा, मुख का पक जाना, शरीर में लाल-लाल बिन्दुओं का दिखाई पड़ना तथा अधिक दाह होना ये सब लक्षण पित्तप्रधान सन्निपातज्वर के होते हैं। वैद्य लोग इस सन्निपात ज्वर को 'आशुकारी' कहते हैं ॥ ७-८ ॥

विमर्श—भालुकि तन्त्र के अनुसार इसका विशिष्ट वर्णन पूर्वार्धं पृ० ९४ पर मधुकोष में देखें। वहाँ इसे 'शीघ्रकारी' संज्ञा दी गई है।

३ कफोल्वणकम्पनलक्षणम्—

जडता गद्गदा वाणी रात्रौ निद्रा भवत्यपि। प्रस्तब्धे नयने चैव मुखमाधुर्यमेव च ॥ ९ ॥
कफोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। मुनिभिः सन्निपातोऽयमुक्तः कम्पनसंज्ञकः ॥

शरीर में जडता होना, गद्गद कण्ठ से बोलना, रात्रि में अवश्य नींद आना, नेत्रों में स्तब्धता तथा मुख में मधुरता (मीठा खाये हुए के समान मुख का स्वाद रहना) ये सब लक्षण कफप्रधान सन्निपात ज्वर में होते हैं। ऋषियों ने इस सन्निपात ज्वर का नाम 'कम्पन' कहा है ॥ ९-१० ॥

विमर्श—भालुकि तन्त्र में इसे कफ्फण या फम्फण कहा है और विशद सम्प्राप्ति के साथ लक्षणों का भी विस्तृत वर्णन किया है (मधुकोश पू० पृ० ९४ देखें)

४ वातपित्तोल्वणबभ्रलक्षणम्—

वातपित्ताधिको यस्तु सन्निपातः प्रकुप्यति। तस्य ज्वरो मदस्तृष्णा मुखशोषः प्रमीलकः ॥
आध्मानारतितन्द्राश्च कासश्वासभ्रमश्रमाः। मुनिभिर्बभ्रनामाऽयं सन्निपात उदाहृतः ॥

जिस सन्निपात ज्वर में वात तथा पित्त ये दोनों दोष कफ की अपेक्षा अधिक कुपित हों तब मद (नशा चढ़े के समान मालूम पड़ना), अधिक प्यास, मुख का सूखना, नेत्रों का मिचे से रहना, आध्मान (अफारा), अरति, तन्द्रा, खांसी, श्वास, भ्रम तथा श्रम (थकावट) ये सब लक्षण उत्पन्न होते हैं और इसे मुनियों ने 'बभ्र' नामक सन्निपात ज्वर कहा है ॥ ११-१२ ॥

विमर्श—कुछ लोग इसे 'बभ्रु' 'विभु' या 'विधु' भी कहते हैं। (मधुकोश पू० पृ० ९४ देखें)

५ वातकफोल्वणशीघ्रकारिलक्षणम्—

वातश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। तस्य शीतज्वरो मूर्च्छा क्षुत् तृष्णा पार्श्वनिग्रहः ॥
शूलमस्विद्यमानस्य तन्द्रा श्वासश्च जायते। असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते ॥
न हि जीवत्यहोरात्रमनेनाविष्टविग्रहः ॥ १४ ॥

जिसके वातकफप्रधान त्रिदोष प्रकुपित होता है उसे शीतज्वर, मूर्च्छा, भूख तथा प्यास अधिक लगना, पंसुलियों में पीड़ा, पसीने का न निकलना, तन्द्रा तथा श्वास ये सब प्रगट होते हैं, यह सन्निपातज्वर असाध्य होता है, इसे वैद्य लोग 'शीघ्रकारी' कहते हैं, इससे युक्त रोगी अहोरात्र (२४ घण्टे) तक नहीं जीता है ॥ १३-१४ ॥

विमर्श—मधुकोश में संगृहीत भालुकि तन्त्र के पाठ में वातकफाधिक सन्निपात ज्वर का नाम 'मकरी' दिया गया है और उसमें प्रस्तुत पाठ के प्रथम श्लोक के ही लक्षणों के साथ अन्य लक्षणों का भी उल्लेख है। शेष १॥ श्लोक में वर्णित लक्षणों का वर्णन 'शीघ्रकारी' में किया गया है जो कि वहाँ पित्तोल्वण सन्निपात ज्वर माना गया है (पूर्वार्ध पृष्ठ ९४ देखें।)

६ पित्तकफोल्वणभल्लुलक्षणम्—

पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। अन्तर्दाहो बहिः शीतं तस्य तृष्णा प्रवर्द्धते ॥
तुद्यते दक्षिणे पार्श्वं उरःशीर्षगलग्रहः। ष्ठीवति श्लेष्मपित्तं च कृच्छ्रात्कोठश्च जायते ॥१६॥
विड्भेदश्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः। ऋषिभिर्भल्लुनामाऽयं सन्निपात उदाहृतः ॥१७॥

जब पित्तकफप्रधान त्रिदोष प्रकुपित होता है और उससे जब ज्वर होता है तब शरीर के अन्दर दाह, ऊपर से सर्दी लगना, प्यास की अधिक वृद्धि, दाहिने पार्श्व में सुई चुभने की सी पीड़ा, हृदय, मस्तक तथा गले में दबाने की सी पीड़ा होना, थूक के साथ कठिनता से कफ तथा पित्त का निकलना, कोठ (बरें के काटे हुए के समान चकत्ता), दस्त पतला होना। श्वास, कास,

हिचकी तथा प्रमीलक (नेत्रों का मिचे से रहना), ये सब प्रकट होने लगते हैं। ऋषियों ने इसे 'भल्लु' नामक सन्निपात ज्वर कहा है ॥ १५-१७ ॥

विमर्श—इसे 'फल्गु' भी कहते हैं (देखें पू० पृ० ९४ मधुकोश)

७ वातपित्तकफोल्वणकूटपाकलक्षणम्—

सर्वदोषोल्वणो यस्य सन्निपातः प्रकुप्यति। त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥
व्याधिभ्यो दारुणश्चैव वज्रशस्त्राग्निसन्निभः। केवलोच्छ्वासपरमः स्तब्धाङ्गः स्तब्धलोचनः॥
त्रिरात्रात्परमेतस्य जन्तोर्हरति जीवितम्। तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः ॥२०॥
धर्षितो राक्षसैर्नूनमवेलायां चरन्ति ये। अम्बया ब्रुवते केचिद् यक्षिण्या ब्रह्मराक्षसैः ॥२१॥
पिशाचैर्गुह्यकैश्चैव तथाऽन्यैर्मस्तके हतम्। कुलदेवार्चनाहीनं धर्षितं कुलदैवतैः ॥२२॥
नक्षत्रपीडामपरे गरकर्मेति चापरे। सन्निपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥२३॥

जिसमें सभी दोष प्रधान रूप से प्रकुपित होते हैं, वह सन्निपात ज्वर अन्य रोगों की अपेक्षा अधिक भयङ्कर होता है और वह वज्र, बिजुली, शंख तथा अग्नि के समान शीघ्र प्राणनाशक होता है। इसमें रोगी केवल ऊंचा श्वास लेता रहता है, सम्पूर्ण शरीर जकड़ जाता है, आँखें पथरा जाती हैं एवं तीन रात्रि में ही यह सन्निपात ज्वर रोगी का प्राण हर लेता है। अपढ़ ग्रामीण लोग इस रोगी को भूत-प्रेत, ब्रह्म, पिशाचादि दैवी पीड़ा अथवा विषादि प्रकोप से आक्रांत समझकर तंत्र-मंत्रों से झाड़-फूंक करते हैं किन्तु सद्वैद्य लोग इस सन्निपात ज्वर को 'कूटपाकल' कहते हैं ॥ १८-२३ ॥

विमर्श—सुश्रुत ने इसी को अभिन्यास ज्वर कहा है (देखिये पूर्वार्ध पृ० ९५)

७ अधिकवातमध्यपित्तहीनकफसंमोहकलक्षणम्—

प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ २४ ॥
प्रलापायाससंमोह-कम्पमूर्च्छाऽरतिभ्रमाः। एकपक्षाभिघातश्च तत्राप्येते विशेषतः ॥ २५ ॥
एष संमोहको नाम्ना सन्निपातः सुदारुणः ॥ २६ ॥

प्रवृद्ध (अधिक बढ़ा हुआ) वात-मध्यपित्त-हीनवृद्ध कफ ये तीनों दोष जहां पर मिलकर सन्निपात ज्वर को उत्पन्न करते हैं उसमें वातदिकों के जो रोग (लक्षण) पृथक्-पृथक् कहे हुए हैं वे सब दोष-बलानुरूप सामान्य रूप से अवश्य होते हैं, साथ-साथ में प्रलाप, श्रम, मोह, कम्प, मूर्च्छा, अरति (किसी कार्य में चित्त का न लगना) भ्रम तथा एक भाग में पक्षाघात (लकवा) हो जाना ये सब लक्षण विशेषरूप से रहते हैं, इस भयंकर सन्निपात का नाम मुनियों ने 'संमोहक' रखा है ॥ २४-२६ ॥

विमर्श—यहां पर मूल में 'रोगास्त एवोक्ताः' अर्थात् 'वातादिकों के जो रोग पृथक्-पृथक् कहे गये हैं' इस वाक्य से निम्न लिखित रोग (लक्षण) समझना चाहिये। वातसम्बन्धी रोग-पीड़ा, कँपकँपी, नींद न आना तथा विष्टम्भ आदि। पित्तसम्बन्धी रोग—दाह, अधिक प्यास तथा गर्मी मालूम पड़ना और पसीना निकलना इत्यादि। कफसम्बन्धी रोग—शरीर में गुरुता, अग्नि की मन्दता, अधिक खाँसी तथा नाक और मुख से पानी गिरना आदि। यहाँ पर उपर्युक्त वातादिजन्य लक्षण दोष-बलानुसार होते हैं अर्थात् इस सन्निपात में वायु का अधिक बल होने से वातजन्य लक्षण प्रबल रूप से होते हैं, पित्त का बल मध्यम होने से पित्तजन्य लक्षण मध्यमरूप से होते हैं तथा कफ का बल हीन होने से कफजन्य लक्षण हीनरूप से होते हैं। किन्तु इन सब रोगों के होते हुये भी इस सन्निपात से लेकर पक्षाघात पर्यन्त विकार विशेष रूप से होते हैं।

९ मध्यवाताधिकपित्तहीनकफपाकलक्षणम्—

मध्यप्रवृद्धहीनैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः॥
मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः। कासःश्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदि व्यथ॥
खेभ्यो रक्तं विसृजति सरक्तस्तब्धनेत्रता। तत्राप्येते विशेषाः स्युर्मृत्युरर्वाक् त्रिवासरात्।
भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः॥ २९॥

मध्यवात, अधिकपित्त तथा हीन वृद्ध कफ के द्वारा जो सन्निपात ज्वर होता है उसमें वातादि दोष-जनित जो पूर्वोक्त रूप हैं, वे ही सब दोष-बलानुसार प्रकट होते हैं। और विशेषतः मोह, प्रलाप, मूर्च्छा, मन्यास्तम्भ, शिरोग्रह (सिर में पीड़ा) खाँसी, श्वास, श्रम, तन्द्रा, संज्ञा का नाश, हृदय में व्यथा, मुख, नासिका आदि इन्द्रियों के छिद्रों से रक्त गिरना, नेत्रों में लालिमा तथा स्तब्धता (जडता) हो जाना ये सब भी होते हैं। इस सन्निपात में तीन दिन पूर्ण होने के पहले ही रोगी की मृत्यु हो जाती हैं। एवं वैद्य लोग इसे 'पाकल' नामक सन्निपात कहते हैं॥ २७–२९॥

१० हीनवाताधिकपित्तमध्यकफयाम्यलक्षणम्—

हीनप्रवृद्धमध्यैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः॥३०॥
हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः। पच्यन्तेऽप्यर्थमूर्ध्वाधःपूयशोणितनिर्गमः॥३१॥
शीर्णदन्तश्च मृत्युश्च तत्राप्येतद्विशेषतः। भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्तितः॥

हीनवात, अधिक-पित्त तथा मध्यकफ के द्वारा जो संनिपात ज्वर होता है उसमें पूर्वोक्त वातादिकों के दोष-बलानुसार लक्षण प्रकट होते हैं तथापि विशेष रूप से रोगी के हृदय में दाह होता हैं, और यकृत्–प्लीहा, आंत तथा फुप्फुस ये सब पक जाते हैं, ऊपर मुखादिक मार्ग से तथा नीचे गुदादिक मार्ग से पूय (पीब) तथा रक्त निकलते हैं, दाँत गिरने लगते हैं, यहाँ तक कि मृत्यु भी हो जाती है। वैद्य लोग इसें 'याम्य' नामक संनिपात कहते हैं॥ ३०–३२॥

११ अधिकवातहीनपित्तमध्यकफक्रकचलक्षणम्—

प्रवृद्धहीनमध्यैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः॥३३॥
प्रलापायाससंमोहाः कम्पमूर्च्छाऽरतिभ्रमाः। मन्यास्तम्भेन मृत्युः स्यात्तत्राप्येतद्विशेषतः॥
भिषग्भिः सन्निपातोऽयं क्रकचः संप्रकीर्त्तितः॥ ३५॥

अधिक वात, हीनपित्त तथा मध्यकफ के द्वारा जो सन्निपात ज्वर होता है उसमें पूर्वोक्त वातादिकों के लक्षण दोष-बलानुसार प्रकट होते ही हैं किन्तु विशेष रूप से प्रलाप, आयास, मोह, कम्प, मूर्च्छा, अरति (बेचैनी), भ्रम ये सब भी प्रकट होते हैं। तथा मन्यास्तम्भ से मृत्यु भी हो जाती है। वैद्य लोग इस सन्निपात का नाम 'क्रकच' कहते हैं॥ ३३–३५॥

१२ मध्यवातहीनपित्तमध्यकफकर्कटकलक्षणम्—

मध्यहीनाप्रवृद्धैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः॥३६॥
अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते। रक्तमालक्तकेनैव लक्ष्यते मुखमण्डलम्॥३७॥
पित्तेनाकर्पितः श्लेष्मा हृदयान्न प्रसिच्यते। इषुणेवाहतं पार्श्वं तुद्यते खन्यते हृदि॥३८॥
प्रमीलकश्वासहिक्का वर्द्धन्ते तु दिने दिने। जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः॥३९॥
विसर्गं नाभिजानाति कूजेच्चापि कपोतवत्। अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रौष्ठतालुकः॥
तन्द्रानिद्राऽतियोगार्त्तो हतवाङ् निहतद्युतिः। अरतिं लभते नित्यं विपरीतानि चेच्छति॥
आयम्यते च बहुशो रक्तं ष्ठीवति चाल्पशः। एष कर्कटको नाम्ना सन्निपातः सुदारुणः॥४२॥

मध्यवात–हीनपित्त–मध्यकफ के द्वारा जो सन्निपात ज्वर होता है उसमें वातादिकों से पूर्वोक्त लक्षण दोष-बलानुसार प्रकट होते ही हैं किन्तु विशेष रूप से शरीर के अन्दर दाह होता

है, बोलने में असमर्थता हो जाती है, मुख आलता लगे हुए के समान लाल रङ्ग का हो जाता है, पित्त से खींचा हुआ (शोषित) कफ हृदय से बाहर नहीं निकलता है, पसुलियों में बाण चुभने के समान और हृदय में खोदने के समान पीड़ा होती है एवं प्रमीलक (सम्पूर्ण इन्द्रियों को अपने २ विषय को ग्रहण करने में असमर्थता), श्वास, हिचकी ये सब रोग दिन पर दिन बढ़ने लगते हैं, जिह्वा जली हुई के समान तथा स्पर्श में खुरदरी हो जाती है, गले के अन्दर शूकधान्य-जौ आदि के अग्रभाग के समान कांटे चारों तरफ निकल आते हैं, मल-मूत्रादि के त्याग का ज्ञान नहीं रह जाता है, कबूतर के समान अस्फुट शब्द गले से निकलने लगता है, कण्ठ कफ से अत्यन्त भरा रहता है, मुख, ओष्ठ, तालु सूखने लगते हैं, तन्द्रा तथा निद्रा अधिक रहती हैं, बोलने की शक्ति तथा शरीर की कान्ति नष्ट हो जाती है, किसी भी अवस्था में शान्ति नहीं मिलती, विपरीत पदार्थों की सर्वदा इच्छा होती है और बारम्बार हाथ-पैर को फैलाता रहता है, थूक के साथ किञ्चित्-किञ्चित् रक्त जाने लगता है। इन सब लक्षणों से युक्त अत्यन्त भयङ्कर इस सन्निपात को वैद्य लोग 'कर्कटक' कहते हैं ॥ ३६-४२ ॥

१३ हीनवातमध्यपित्ताधिककफवैदारिकलक्षणम्—

हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥४३॥
अल्पशूलं कटीतोदो मध्ये दाहो रुजा भ्रमः। भृशं क्लमः शिरोबस्तिमन्याहृदयवाग्रुजः ॥४४॥
प्रमीलकः श्वासकासहिक्काजाड्यविसंज्ञताः। प्रथमोत्पन्नमेनन्तु साधयन्ति कदाचन ॥४५॥
एतस्मिन् सन्निवृत्ते तु कर्णमूले सुदारुणा। पिडका जायते जन्तोर्यया कृच्छ्रेण जीवति ॥४६॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः। त्रिरात्रात्परमेतस्य व्यर्थमौषधकल्पनम् ॥४७॥

हीनवात-मध्यपित्त-अधिककफ के द्वारा जो सन्निपात ज्वर होता है उसमें वातादिकों के पूर्वोक्त दाहादिक लक्षण दोष-बलानुसार होते ही हैं, किन्तु विशेष रूप से उसमें थोड़ा शूल, कमर में सूई चुभोने की सी पीड़ा, छाती में दाह तथा पीड़ा, भ्रम, अत्यन्त क्लान्ति एवं सिर, मूत्राशय, गरदन, हृदय इन स्थानों में तथा बोलने में पीड़ा, प्रमीलक (नेत्रों का मिचते जाना), श्वास, खाँसी, हिचकी, शरीर में जड़ता और अत्यन्त बेहोशी होना ये सब लक्षण प्रकट होते हैं। रोग उत्पन्न होने के साथ ही यदि चिकित्सा की जाय तो कदाचित् रोगी बच सकता है, अन्यथा उसकी मृत्यु निश्चित रहती है। इस सन्निपात ज्वर के निवृत्त होने पर रोगी के कान के मूल भाग में अत्यन्त भयङ्कर फोड़ा उत्पन्न होता है, जिससे रोगी बड़ी कठिनता से मरने से बचता है, अन्यथा प्रायः मृत्यु हो जाती है। इस भयङ्कर सन्निपात को 'वैदारिक' कहते हैं। तीन रात्रि के अन्दर यदि उसकी उचित चिकित्सा न की जाय तो बाद में औषध देना व्यर्थ हो जाता है, रोगी मरने से नहीं बचता है ॥ ४३-४७ ॥

अथ पूर्वोक्तत्रयोदशसन्निपातज्वरविशेषाणां तन्त्रान्तरस्थनामानि।

शीताङ्गस्त्रिमलोद्भवज्वरगणे तन्द्री प्रलापी ततो-
रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा।
साभिन्यासकजिह्वकश्च कथितः प्राक्सन्धिगोऽथान्तको-
रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठग्रहौ ॥ ४८ ॥

पूर्वोक्त १३ सन्निपात ज्वरविशेषों के तन्त्रान्तरस्थ नाम—१. शीताङ्ग, २. तन्द्री, ३. प्रलापी, ४. रक्तष्ठीवयिता, ५. संभुग्ननेत्र, ६, अभिन्यासक, ७. जिह्वक, ८. सन्धिग, ९. अन्तक, १०. रुग्दाह, ११. चित्तविभ्रम, १२. कर्णग्रह और १३, कण्ठग्रह ॥ ४८ ॥

विमर्श—मूल में 'तन्द्री' पद से 'तन्द्रिक', 'प्रलापी' पद से 'प्रलापक' 'रक्तष्ठीवयिता' पद से 'रक्तष्ठीवी', 'संभुग्न', पद से 'भुग्ननेत्र', 'अभिन्यासक' पद से 'अभिन्यास', 'कर्णकण्ठग्रहौ' अर्थात् 'कर्णग्रह, पद से 'कर्णिक' तथा 'कण्ठग्रह' पद से 'कण्ठकुब्जक' सन्निपात का ही बोध करना चाहिये ॥

अथ तेषां प्रत्येकं लक्षणानि ।

१ तत्र शीताङ्गस्य लक्षणम्—

हिमशिशिरशरीरः सन्निपातज्वरी यः, श्वसनकसनहिक्कामोहकम्पप्रलापैः ।
क्लमबहुकफवातैर्दाहवम्यङ्गपीडा-स्वरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ॥ ४९ ॥

जिस सन्निपात ज्वर में रोगी का शरीर बर्फ के समान शीतल हो और श्वास, खांसी, हिचकी मोह, कम्प, प्रलाप, क्लान्ति तथा कफ अधिक निकलना एवं वायु का अधिक कुपित होना, दाह, वमन, अङ्गों में पीड़ा, स्वर में विकृति ये लक्षण हों उसे 'शीताङ्ग' सन्निपात कहते हैं ॥ ४९ ॥

२ तन्द्रिकस्य लक्षणम्—

तन्द्राऽतीव ततस्तृषाऽतिसरणं श्वासोऽधिकः कासरुक्
संतप्ताऽतितनुर्गले श्वयथुना सार्द्धञ्च कण्डूः कफः ।
सुश्यामा रसना क्लमः श्रवणयोर्मान्द्यञ्च दाहस्तथा
यत्र स्यात् स हि तन्द्रिको निगदितो दोषत्रयोत्थो ज्वरः ॥ ५० ॥

जिस ज्वर में रोगी को अधिक तन्द्रा तथा प्यास, अतीसार, श्वास और खाँसी हो, शरीर अधिक गर्म हो, गले में सूजन के साथ खुजली तथा कफ हो, जीभ काली हो एवं क्लान्ति, कानों से अत्यन्त स्वल्प सुनाई पड़ना और दाह ये सब लक्षण हों उसे वैद्य लोग 'तन्द्रिक' सन्निपात कहते हैं ॥ ५० ॥

३ प्रलापकस्य लक्षणम्—

यत्र ज्वरे निखिलदोषनितान्तरोष-जाते प्रलापबहुलाः सहसोत्थिताश्च ।
कम्पव्यथापतनदाहविसंज्ञताः स्यु-र्नाम्ना प्रलापक इति प्रथितः पृथिव्याम् ॥५१॥

जिस ज्वर में वातादिक सम्पूर्ण दोषों के प्रकुपित होने से रोगी अधिक प्रलाप करता हो तथा कम्प, शरीर में पीड़ा, उठने पर खड़खड़ा, कर गिर पड़ना, दाह तथा अत्यन्त बेहोशी ये सब लक्षण प्रगट हों, उसे संसार में प्रसिद्ध 'प्रलापक' सन्निपात कहते हैं ॥ ५१ ॥

४ रक्तष्ठीविनो लक्षणम्—

निष्ठीवो रुधिरस्य रक्तसदृशं कृष्णं तनौ मण्डलं
लौहित्यं नयने तृषाऽरुचिवमिश्वासातिसारभ्रमाः ।
आध्मानं च विसंज्ञता च पतनं हिक्काऽङ्गपीडा भृशं
रक्तष्ठीविनि सन्निपातजनिते लिङ्गं ज्वरे जायते ॥ ५२ ॥

थूकने पर रक्त निकलना, शरीर में रक्तवर्ण के तथा काले चकत्तों का होना; नेत्रों में लालिमा, अधिक प्यास, अरुचि, वमन, श्वास, अतिसार, भ्रान्ति, अफरा, होश न रहना, उठते-उठते लड़खड़ा कर गिर पड़ना, हिचकी, अङ्गों में अत्यन्त पीडा होना ये सब लक्षण 'रक्तष्ठीवी' सन्निपात ज्वर में होते हैं ॥ ५२ ॥

५ भुग्ननेत्रस्य लक्षणम्—

भृशं नयनवक्रता श्वसनकासतन्द्रा भृशं, प्रलापमदवेपथुश्रवणहानिमोहास्तथा ।
पुरा निखिलदोषजे भवति यत्र लिङ्गं ज्वरे, पुरातनचिकित्सकैः स इह भुग्ननेत्रो मतः ॥५३॥

जिस सन्निपात ज्वर में रोगी के नेत्रों में टेढ़ापन हो एवं श्वास, तन्द्रा, अधिक प्रलाप, मद, कम्प, बधिरता तथा मोह ये सब लक्षण प्रकट हों, उसे प्राचीन वैद्य लोग, 'भुग्ननेत्र' सन्निपात कहते हैं।

६ अभिन्यासस्य लक्षणम्—

दोषास्तीव्रतरा भवन्ति बलिनः सर्वेऽपि यत्र ज्वरे
मोहोऽतीव विचेष्टनो विकलता श्वासो भृशं मूकता।
दाहश्चिक्कणमाननञ्च दहनो मन्दो बलस्य क्षयः
सोऽभिन्यास इति प्रकीर्त्तित इह प्राज्ञैर्भिषग्भिः पुरा ॥ ५४ ॥

जिस सन्निपात ज्वर में सभी वातादिक दोष अत्यन्त प्रकुपित तथा बलवान् हों एवं रोगी में अधिक मोह, चेष्टाहीनता, विकलता, श्वास, मूकता, दाह, मुख में चिकनापन, अग्नि की मन्दता तथा बल की हानि ये लक्षण हों, उसे प्राचीन वैद्यजन 'अभिन्यास' नामक सन्निपात कहते हैं ॥५४॥

७ जिह्वकस्य लक्षणम्—

त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं, वृताऽकठिनकण्टकैस्तदनु निर्भरं मूकता।
श्रुतिक्षतिबलक्षतिश्वसनकाससन्तप्तताः, पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥५५॥

जिस सन्निपात ज्वर में रोगी की जिह्वा में अत्यन्त कठिन काँटे पड़ जायँ तथा उसके साथ ही अत्यन्त मूकता हो जाय अर्थात् वह किसी प्रकार से बोल न सके, सुनने की शक्ति न हो तथा बल की हानि हो एवं श्वास, खांसी तथा शरीर में अधिक ताप हो, उसे प्राचीन वैद्यजन 'जिह्वक' सन्निपात कहते हैं ॥ ५५ ॥

८ सन्धिगस्य लक्षणम्—

व्यथाऽतिशयिता भवेच्छ्वयथुसंयुता सन्धिषु, प्रभूतकफता मुखे विगतनिद्रता कासरुक्।
समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे, त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः॥

जिस सन्निपातज्वर में रोगी के सन्धिस्थानों में शोथ के साथ-साथ अधिक पीड़ा भी हो और मुख में अत्यन्त कफ लिपटा रहता हो, नींद न आती हो तथा खांसी अधिक आती हो, उसे 'सन्धिग' या 'सन्धिक' कहते हैं ॥ ५६ ॥

९ अन्तकस्य लक्षणम्—

यस्मिंल्लक्षणमेतदस्ति सकलैर्दोषैरुदीते ज्वरेऽ-
जस्रं मूर्द्धविधूननं सकसनं सर्वाङ्गपीडाऽधिका।
हिक्काकाससदाहमोहसहिता देहेऽतिसन्तप्तता
वैकल्यञ्च वृथावचांसि मुनिभिः संकीर्त्तितः सोऽन्तकः ॥ ५७ ॥

जिस सन्निपात ज्वर में रोगी निरन्तर सिर को हिलाया करे तथा खांसी, सर्वाङ्ग में अधिक पीड़ा, हिचकी, श्वास, दाह, मोह, देह में अत्यन्त सन्ताप, विकलता और व्यर्थ बकवाद करना ये सब लक्षण देख पड़ते हों, उसे आयुर्वेदज्ञ मुनिजन 'अन्तक' सन्निपात कहते हैं ॥ ५७ ॥

१० रुग्दाहस्य लक्षणम्—

दाहोऽधिको भवति यत्र तृषा च तीव्रा, श्वासप्रलापविरुचिभ्रममोहपीडाः।
मन्याहनुव्यथनकण्ठरुजः श्रमश्च, रुग्दाहसंज्ञ उदितस्त्रिभवो ज्वरोऽयम् ॥ ५८ ॥

जिस सन्निपात ज्वर में रोगी को अधिक दाह होता हो तथा प्यास अधिक लगती हो एवं श्वास, प्रलाप, विरुचि (विपरीत रुचि), भ्रम, मोह, पीड़ा, मन्या (नाड़) तथा ठोड़ी में अत्यन्त वेदना, कण्ठ में पीड़ा, थकावट ये सब लक्षण हो रहे हों, उसे 'रुग्दाह' सन्निपात समझना चाहिये ॥

१४ चित्तभ्रमस्य लक्षणम्—

गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते मुह्येत् ।
दाहव्यथाभयार्त्तो नरस्तु चित्तभ्रमे ज्वरे भवति ॥ ५९ ॥

'चित्तभ्रम' सन्निपात ज्वर में रोगी गाना गाता है, नाचता है, हँसता है, प्रलाप करता है, बुरे ढंग से देखता है तथा मोह को प्राप्त होता है एवं दाह, व्यथा तथा भय से पीडित होता है ॥५९॥

१२ कर्णिकस्य लक्षणम्—

दोपत्रयेण जनितः किल कर्णमूले, तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च ।
कण्ठग्रहो बधिरता श्वसनं प्रलापः प्रस्वेदमोहदहनानि च कर्णिकाख्ये ॥ ६० ॥

जिस ज्वर में तीनों दोपों के कुपित होने से रोगी के कर्णमूल भाग में सूजन के साथ तीव्र पीड़ा होती हो तथा कण्ठ का अवरोध, श्वास, प्रलाप, अधिक पसीना निकलना, मोह तथा दाह होता हो, उसे 'कर्णिक' सन्निपात कहते हैं ॥ ६० ॥

१३ कण्ठकुब्जस्य लक्षणम्—

कण्ठः शूकशतावरुद्धवदतिश्वासः प्रलापोऽरुचि-
र्दाहो देहरुजा तृषाऽपि च हनुस्तम्भः शिरोऽर्त्तिस्तथा ।
मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोपज्वरे
यत्र स्यात् स हि कण्ठकुब्ज उदितः प्राच्यैश्चिकित्साबुधैः ॥ ६१ ॥

जिस सन्निपात ज्वर में रोगी का कण्ठ सैंकड़ों धान आदि के शूक के समान कांटों से भरा प्रतीत होता हो तथा अत्यन्त श्वास, प्रलाप, अरुचि, दाह, शरीर में पीड़ा, प्यास, हनुस्तम्भ, शिर में पीड़ा, मोह और कम्पन ये सब लक्षण हों, उसे प्राचीन चिकित्सा शास्त्र के पण्डित लोग 'कण्ठकुब्ज' सन्निपात कहते हैं ॥ ६१ ॥

अथ सन्निपातज्वरस्य साध्यासाध्यत्वम्—

सन्धिगस्तेपु साध्यः स्यात् तन्द्रिकश्चित्तविभ्रमः ।
कर्णिको जिह्वकः कण्ठकुब्जः पञ्चापि कष्टदाः ॥ ६२ ॥
रुग्दाहस्त्वतिकष्टेन संसाध्यस्त्वेपु भाषितः । रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः ।
अभिन्यासोऽन्तकश्चैते षडसाध्याः प्रकीर्त्तिताः ॥ ६३ ॥

साध्य तथा असाध्य सन्निपात ज्वरों के नाम—पूर्वोक्त सन्निपात ज्वरों में सन्धिग सन्निपात साध्य है, १. तन्द्रिक. २. चित्तविभ्रम, ३. कर्णिक, ४. जिह्वक, ५. कण्ठकुब्ज, ये पाँच सन्निपातज्वर कष्टसाध्य हैं, रुग्दाह सन्निपात अत्यन्त कष्टसाध्य है एवं १. रक्तष्ठीवी, २. भुग्ननेत्र, ३. शीतगात्र, ४. प्रलापक, ५. अभिन्यास, ६. अन्तक ये छः सन्निपात ज्वर असाध्य कहे गये हैं ॥ ६२–६३ ॥

अथान्यग्रन्थोक्तवातोल्बणादित्रयोदशसन्निपातानां कुम्भीपाकादीनि नामानि ।

कुम्भीपाकः प्रोर्णुनावः प्रलापी ह्यन्तर्दाहो दण्डपातोऽन्तकश्च ।
एणीदाहश्चाथ हारिद्रसंज्ञो भेदा एते सन्निपातोज्वरस्य ॥ ६४ ॥
अजघोपभूतहासौ यन्त्रापीडश्च संन्यासः । संशोपी च विशेपास्तस्यैवोक्तास्त्रयोदशान्यत्र ॥६५॥

सन्निपात ज्वरों के अन्य १३ कुम्भीपाकादि नाम—१. कुम्भीपाक. २. प्रोर्णुनाव, ३. प्रलापी, ४. अन्तर्दाह, ५. दण्डपात. ६. अन्तक, ७, एणीदाह, ८. हारिद्र, ९. अजघोष, १०. भूतहास, ११. यन्त्रापीड, १२. संन्यास, १३. संतोषी, ये नाम अन्यत्र क्रम से पूर्वोक्त वातोल्बणादि सन्निपात ज्वरों के कहे हुए हैं ॥ ६४–६५ ॥

अथैषां लक्षणानि

१ तत्र कुम्भीपाकस्य लक्षणम्—

घोणाविवरञ्जरद्बहुशोणासितलोहितं सान्द्रम् ।
विलुठन्मस्तकमभितः कुम्भीपाकेन पीडितं विद्यात् ॥ ६६ ॥

जिस सन्निपात ज्वर में रोगी की नाक से काला, लाल एवं गाढ़ा रुधिर निकलता हो और वह अपने सिर को इधर-उधर वारम्वार चलाता हो, उसे 'कुम्भीपाक' सन्निपात ज्वर से पीड़ित समझना चाहिये ॥ ६६ ॥

२ प्रोर्णुनावस्य लक्षणम्—

उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्ताच्चितान्तमुच्छ्वसिति ।
तं प्रोर्णुनावजुष्टं विचित्रकष्टं विजानीयात् ॥ ६७ ॥

जिस सन्निपात ज्वर में रोगी वारम्वार अपने हाथ-पैर आदि अङ्गों को इधर-उधर फेंकता हो तथा निरन्तर जोर से श्वास लेता हो उसे अनेक प्रकार के कष्ट देने वाले 'प्रोर्गुनाव' सन्निपात ज्वर से पीड़ित समझना चाहिये ॥ ६७ ॥

३ प्रलापिनो लक्षणम्—

स्वेदभ्रमाङ्गभेदाः कम्पो दवथुर्वमिर्व्यथा कण्ठे । गात्रञ्च गुर्वतीव प्रलापिजुष्टस्य जायते लिङ्गम्॥

'प्रलापी' सन्निपात ज्वर वाले रोगी को पसीना, श्रम, शरीर तोड़ने की सी पीड़ा, कम्प, नेत्रादिक में दाह, कण्ठ में पीड़ा और शरीर में गुरुता ये सब लक्षण प्रकट होते हैं (इस ज्वर में प्रलाप भी होता है। यह इसके नाम से ही स्पष्ट है) ॥ ६८ ॥

४ अन्तर्दाहस्य लक्षणन्—

अन्तर्दाहः शैत्यं बहिः श्वयथुररतिरति तथा श्वासः ।
अङ्गमपि दग्धकल्पं सोऽन्तर्दाहार्दितः . कथितः ॥ ६९ ॥

जिस ज्वर में रोगी के शरीर के अन्दर दाह हो और ऊपर से सर्दी भी मालूम पड़ती हो तथा शोथ, बेचैनी और श्वास भी हो एवं उसे अपना शरीर जलते हुये के समान प्रतीत होता हो, उसे 'अन्तर्दाह' संनिपात ज्वर से पीड़ित कहते हैं ॥ ६९ ॥

५ दण्डपातस्य लक्षणम्—

नक्तन्दिवा न निद्रामुपैतिगृह्णाति मूढधीर्नभसः। उत्थाय दण्डपाती भ्रमातुरः सर्वतो भ्रमति॥

जिस ज्वर में रोगी को दिन या रात्रि में कभी नींद न आती हो और वह बुद्धि के भ्रम से आकाश की तरफ किसी वस्तु को पकड़ने के लिये जैसे हाथ पसारता है और एकाएक उठकर दण्ड की भांति वारम्बार गिर पड़ता हो एवं भ्रम से युक्त चारों तरफ घूरता हो उसे 'दण्डपात' सन्निपात ज्वर से पीड़ित समझना चाहिये ॥ ७० ॥

६ अन्तकस्य लक्षणम्—

संपूर्यते शरीरं ग्रन्थिभिरभितस्तथोदरं मरुता । श्वासातुरस्य सततं विचेतनस्यान्तकार्त्तस्य॥

'अन्तक' सन्निपात ज्वर वाले रोगी के समस्त शरीर में गाँठें निकल आती हैं और उदर वायु से भर जाता है तथा वह निरन्तर श्वास से अत्यन्त पीड़ित रहता है एवं संज्ञा से रहित भी हो जाता है ॥ ७१ ॥

७ एणीदाहस्य लक्षणम्—

परिधावतीव गात्रे रुग्गात्रे भुजगपतगहरिणगणः । वेपथुमतः सदाहस्यैणीदाहज्वरार्त्तस्य ॥

जिस रोगी को 'एणीदाह' सन्निपात ज्वर होता है उसके शरीर में अत्यन्त पीड़ा होती है। तथा उसे अपने शरीर के ऊपर सांप, पांखी तथा हरिण के समूह दौड़ रहे हों ऐसा प्रतीत होता है और शरीर में कम्प तथा दाह भी होता रहता है ॥ ७२ ॥

८ हारिद्रकस्य लक्षणम्—

यस्यातिपीतमङ्गं नयने सुतरां मलस्ततोऽप्यधिकम् ।
दाहोऽतिशीतता बहिरस्य स हारिद्रको ज्ञेयः ॥ ७३ ॥

जिस त्रिदोष ज्वर में रोगी का शरीर अत्यन्त पीला हो जाता है तथा नेत्र और भी अधिक पीले हो जाते हैं एवं मल नेत्र से भी अधिक पीला हो जाता है और शरीर के अन्दर दाह होता है किन्तु ऊपर से ठण्ढक प्रतीत होती है उसे 'हारिद्रक' संनिपात कहते हैं ॥ ७३ ॥

९ अजघोषस्य लक्षणम्—

छगलकसमानगन्धः स्कन्धरुजावान्निरुद्धगलरन्ध्रः ।
अजघोषसन्निपातादाताम्राक्षः पुमान् भवति ॥ ७४ ॥

'अजघोष' संनिपात ज्वर में रोगी के नेत्र ताम्र के समान लालवर्ण के हो जाते हैं और उसके शरीर से बकरे के समान गन्ध आने लगती है, कन्धों में पीडा होती है तथा गले का छिद्र अवरुद्ध हो जाता है जिससे स्वर बकरे के स्वर के समान हो जाता है ॥ ७४ ॥

१० भूतहासस्य लक्षणम्—

शब्दादीनधिगच्छति न स्वान् विषयान् यदिन्द्रियग्रामैः ।
हसति प्रलपति पुरुषः स ज्ञेयो भूतहासार्त्तः ॥ ७५ ॥

जो रोगी अपने ज्ञानेन्द्रियों से शब्द आदिक विषयों को नहीं ग्रहण करता अर्थात् जो देख सुन आदि नहीं सकता और हंसता तथा (कर्कश स्वर से) प्रलाप करता है उसे भूतहास संनिपात ज्वर से पीड़ित समझना चाहिये ॥ ७५ ॥

११ यन्त्रापीडस्य लक्षणम्—

येन मुहुर्ज्वरवेगाद् यन्त्रेणेवावपीड्यते गात्रम् । रक्तं पित्तञ्च वमेद् यन्त्रापीडः स विज्ञेयः ॥

जिस त्रिदोष ज्वर में रोगी को अपना शरीर बारबार ज्वर के वेग से कोल्हू में पेरने की भांति पीड़ित प्रतीत होता हो और रक्तसहित पित्त का वमन होता हो उसे 'यन्त्रापीड' संनिपात ज्वर समझना चाहिए ॥ ७६ ॥

१२ संन्यासस्य लक्षणम्—

अतिसरति वमति कूजति गात्राण्यभितश्चिरं नरः क्षिपति ।
संन्याससन्निपाते प्रलपत्युग्राक्षिमण्डलो भवति ॥ ७७ ॥

'संन्यास' संनिपात ज्वर में अतीसार और वमन होता है तथा धीरे धीरे अव्यक्त शब्द करने लगता है एवं बहुत देर तक अपने अङ्गों को इधर-उधर फेंकता है, प्रलाप करता है तथा उसका नेत्र-मण्डल देखने में उग्र हो जाता है ॥ ७७ ॥

१३ संशोषिणो लक्षणम्—

मेचकवपुरतिमेचकलोचनयुगलो मलोत्सर्गात् ।
संशोषिणि सितपिडकामण्डलयुक्तो ज्वरे नरो भवति ॥ ७८ ॥

संशोषी संनिपात ज्वर में रोगी का शरीर और दोनों नेत्र अधिक दस्त आने से काले पड़ जाते हैं और शरीर में सफेद फुन्सियों का मण्डल उत्पन्न हो जाता है ॥ ७८ ॥

सन्निपातज्वरस्य भयङ्करता—

नारायण एव भिषग् भेषजमेतेषु जाह्नवीनीरम् । भैषज्यहेतुरेको नित्यं मृत्युञ्जयो ध्येयः ॥

सभी संनिपात ज्वरों में श्रीनारायण ही प्रधानरूप से वैद्य रह जाते हैं, औषधियों में केवल गङ्गाजल ही रह जाता है और आरोग्य होने के लिये एक मृत्युञ्जय भगवान् शिवजी का

ध्यानमात्र आधार रह जाता है। अर्थात् अत्यन्त भयङ्कर होने से बड़ी कठिनता से रोगी के प्राण बचते हैं ॥ ७९ ॥

विमर्श—इसके अतिरिक्त भी ज्वरों के एकदोषज, द्विदोषज और त्रिदोषज ज्वर तथा विभिन्न अन्य कारणों से उत्पन्न अनेक ज्वरों का भी वर्णन भिन्न-भिन्न प्रकारों से प्राचीन अनेक ग्रन्थों में विकीर्ण रूप से मिलता हैं। सबका संग्रह करने से केवल ज्वर पर ही एक स्वतन्त्र ग्रन्थ बन जा सकता है। इसमें से कुछ का संग्रह भिषकूशिरोमणि श्री गोवर्धनशर्मा छांगाणीजी द्वारा सम्पादित (आन्ध्र भाषा में प्राप्त मूल ग्रन्थ नागराक्षरों में परिवर्तित) 'वसवराजीयम्' ग्रन्थ में देख सकते हैं।

सन्निपातज्वरस्य साध्यासाध्यत्वम्—

सन्निपातज्वरान् कष्टानसाध्यानपरे जगुः।

संनिपात ज्वरों की साध्यता और असाध्यता—संनिपात ज्वरों को कोई वैद्य कष्टसाध्य और कोई असाध्य बतलाते हैं अर्थात् संनिपात ज्वर सुखसाध्य किसी भी दशा में नहीं होते।

विमर्श—सन्निपात ज्वर की असाध्यता के लक्षण और कालमर्यादा आदि पूर्वार्ध पृष्ठ १०१ पर देखें। पूर्वोक्त विभिन्न सांनिपातिक ज्वरों में से किसी भी एक का अपचार या उपेक्षा के अन्यस्वरूप में परिवर्तन हो सकता है अथवा उपद्रव स्वरूप किसी एक प्रकार में दूसरा प्रकार भी उत्पन्न हो सकता है। अत एव इनकी अर्वाचीन पद्धति से वर्णित प्रचलित 'टायफायड', 'न्यूमोनिया', 'प्लेग' आदि विभिन्न ज्वरों से तुलना करना (अनेक स्थलों पर सम्भव प्रतीत होते हुए भी) ठीक नहीं। अर्वाचीन विभिन्न ज्वरों के विशिष्ट कारण, लक्षण और सम्प्राप्ति का सामान्य रूप से पृथक्-पृथक् वर्णन होते हुए भी देश, काल और व्यक्ति-भेद से विभिन्न रूप देखने को मिलते हैं। उपेक्षा, कुचिकित्सा और कुपथ्य के परिणाम या उपद्रव स्वरूप एक किसी भी विशिष्ट ज्वर में विभिन्न अन्य ज्वरों के लक्षण उत्पन्न हो जा सकते हैं। जैसे प्रचलित मलेरिया ज्वर में सामान्यतः वातपैत्तिक या वातपित्तोल्बण त्रिदोष ज्वर के लक्षण मिलते हैं किन्तु शीत देश व काल अथवा शीतोपचार आदि से श्लेष्मपित्त ज्वर–के लक्षण और कभी-कभी अवस्था विशेष में उपद्रव स्वरूप त्रिदोष ज्वर के पूर्वोक्त विभिन्न स्वरूपों में से किसी एक के लक्षण उत्पन्न हो जा सकते हैं। यही स्थिति अन्य रोगों में भी मिलती हैं। अतः प्राचीन आचार्यों ने दोषानुसार लक्षणों का निर्देश मात्र ही विशेष महत्त्व का माना है किन्तु पूर्वोक्त त्रिदोष ज्वरों के विभिन्न नाम, लक्षण, सम्प्राप्ति, चिकित्सा और साध्यासाध्यत्व आदि के वर्णनों को देखते हुए 'प्राचीनों ने अन्य दृष्टिकोणों से रोगों का विवेचन करने की उपेक्षा की है' यह भी नहीं कह सकते। इसलिए छात्रों एवं सामान्य वैद्यों के ज्ञान-वृद्धि और सद्वैद्यों के विचार के लिए आगे कुछ प्रचलित अर्वाचीन तन्त्रोक्त रोगों का भी वर्णन किया जा रहा है।

अर्वाचीन-तन्त्रोक्ता ज्वराः

तत्रादौ मन्थरकज्वरनिदानम्[1]—

वह्वध्वक्लान्ततनवस्तथाऽनशनकर्षिताः। दुर्गन्धपूर्णभूमौ वा नित्यमेव निवासिनः ॥१॥
यद्यप्येषां मलोन्मिश्रभक्ष्यपानादिसेवनात्। भवेद्वतुषु सर्वेषु घोरो मन्थरको ज्वरः ॥२॥
तथाऽपि बहुशो लोके ग्रीष्मप्रावृट्शरत्स्वसौ। भीमलक्षणसंयुक्तो लक्ष्यते वैद्यसत्तमैः ॥३॥
अन्त्रिकेत्यभिधानं चापरमस्यैव कथ्यते। सामान्यं कारणं प्रोक्तं विशिष्टं तु निगद्यते ॥४॥
कीटाणवो 'वैसिलस–टाईफोसस' नामकाः। दण्डाकाराः कृतावासा रक्ते मूत्राशये मले ॥५॥

---

१. Typhoid fever,

स्वेदे पित्ताशये प्लीह्नि पिडकास्वान्त्रिकव्रणे। जनयन्ति नृणां देहे ज्वरं प्रोक्तं विशेषतः ॥६॥

अत्यधिक मार्ग चलने से जिनका शरीर थक गया है या अधिक उपवास करने के कारण जो क्षीण हो गये हैं, या दुर्गन्धपूर्ण स्थान में रहने वाले हैं, ऐसे व्यक्तियों को प्रायः इस रोग से पीड़ित रोगियों के मल आदि के सम्पर्क से दूषित भक्ष्य (खाने योग्य) और पेय (पीने योग्य) पदार्थों के सेवन से सभी ऋतुओं में घोर मन्थरक ज्वर होता है, किन्तु साधारणतया लोगों को ग्रीष्म, वर्षा तथा शरद् ऋतु में भयानक लक्षणों से युक्त वह (मन्थरक) दिखाई पड़ता है। इसका दूसरा नाम 'आन्त्रिक ज्वर' भी है। सामान्य कारणों का निर्देश कर दिया गया अब विशेष कारण का उल्लेख करते हैं। वस्तुतः 'बैसिलस टाईफोसस' नामक दण्डाकार कीटाणु ही इस रोग के मूल कारण हैं जो कि रोगी के रक्त, मूत्राशय, मल, स्वेद, पित्ताशय, प्लीहा, पिडका, और आन्त्रिक व्रण में रहते हैं। खाद्य-पेय वस्तुओं में इनकी उपस्थिति से ही पूर्वोक्त ज्वर मनुष्यों के शरीर में हो जाता है ॥ १-६ ॥

मन्थरकज्वरस्य सम्प्राप्तिः—

मलमूत्रस्वेदजातदोषसंसर्गदूषितैः। भक्ष्यपेयादिभिर्द्रव्यैर्नानासंक्रमकारणैः ॥ ७ ॥
कीटाणवः संक्रमणं प्रकुर्वन्ति विशेषतः। कृत्वा संक्रमणं नृणामादावन्त्रं प्रयान्ति ते ॥ ८ ॥
तत्पश्चादन्त्रभित्तिस्थान् ग्रन्थीञ्छोथसमन्वितान्। कृत्वा सद्यो रसं रक्तं दोषान् सङ्कोपयन्त्यपि॥
ततः क्षुद्रान्त्रान्त्यभागाञ्छनैःकुर्वन्ति सक्षतान्। पश्चादान्त्रक्षतानां च वृद्धिः संजायते क्रमात्॥
तथा क्षुद्रान्त्रभागस्थं क्षतं तत्पारगं भवेत्। ततः शोथत्वमाप्नोति चोदरस्था कला ध्रुवम् ॥
एवं रीत्या क्षते वृद्धे पुरीषोत्सर्जने क्वचित्। लक्षयेत यदि रक्तस्य स्रावो भिन्नान्त्रता तदा।
ज्ञातव्या भिषजा चापि नूनं तस्याप्यसाध्यता ॥ १२ ॥

मल-मूत्र तथा स्वेद में स्थित दोषों के संसर्ग से दूषित भक्ष्य तथा पेय पदार्थों के सेवन आदि नानाविध संक्रमण के कारणों से उक्त जीवाणु विशेष रूप में एक व्यक्ति से दूसरे पर संक्रान्त होते हैं। इस भाँति से वे संक्रमण करके प्रथम अन्त्र में प्रवेश करते हैं उसके पश्चात् अन्त्र की भित्तिओं में स्थित ग्रन्थियों का शोथयुक्त कर रस, रक्त तथा दोषों को शीघ्र ही कुपित कर देते हैं। तत्पश्चात् क्षुद्र अन्त्रों के अन्तिम भागों को धीरे-धीरे क्षतयुक्त कर देते हैं। इन अन्त्र-क्षतों की क्रमशः वृद्धि होती है तथा क्षुद्र अन्त्र के भागों में स्थित यह क्षत बढ़ते-बढ़ते आन्त्र को छेद कर पार हो जाता है जिससे उदरस्था कला में शोथ उत्पन्न हो जाता है। इस रीति से क्षत के बढ़ जाने पर जब कभी मल-त्याग के समय रक्त का स्राव होने लगे तो वैद्य को समझ लेना चाहिये कि रोगी के अन्त्र भाग को क्षत आर-पार कर गया है और रोग असाध्य अवस्था में पहुँच गया है ॥ ७-१२ ॥

मन्थरकज्वरस्य पूर्वरूपम्—

शिरोव्यथा स्यादरुचिस्ततोऽरतिस्तमोऽवसादोऽपि च विड्विबद्धता।
सप्ताहपर्यन्तमिति स्फुटास्फुटं ज्वरेऽग्ररूपं नियतं सदाऽऽन्त्रिके ॥ १३ ॥

आन्त्रिक (मन्थरक) ज्वर की पूर्वरूपावस्था में रोगी के सिर में व्यथा, अरुचि, बेचैनी, आँखों के सामने अँधेरा छा जाना, शरीर में अवसाद, मलबद्धता आदि लक्षण एक सप्ताह तक किसी को प्रकट किसी को अप्रकट रूप से होते हैं ॥ १३ ॥

मन्थरकज्वरस्य रूपम्—

तदग्ररूपं च ततोऽष्टमेऽहनि भवेदभिव्यक्तिमवाप्य लक्षणम्।
ज्वरोऽथ नित्यं क्रमतः प्रवर्द्धते सहापरैर्मन्थरकेऽत्र लक्षणैः ॥ १४ ॥
भवेत्तदा तु ज्वरतापसीमा चतुर्युतं पञ्चयुतं शतं वा।

प्लीह्नोऽपि वृद्धिः परिदृश्यतेऽस्मिञ्ज्वरे नृणां मन्थरकाभिधाने ॥ १५ ॥
ये भारतीयाः खलु तेषु मुक्ताफलोपमाः स्युः पिडका ज्वरेऽस्मिन् ।
लीयन्त उद्भूय च तास्तु जङ्घाग्रीवोदरे चैव गदस्वभावात् ॥ १६ ॥
किन्त्वाङ्ग्लदेशस्थनरेषु तद्वत्पूर्वोदिताङ्गेष्वरुणाश्च ताः स्युः ।
ज्वरेऽत्र जिह्वा मलिनाऽथ रूक्षा रक्ताङ्कुरैः स्यात् परितश्चिता च ॥ १७ ॥
एवं क्वचिच्च स्फुटिता तथा चोदरं सदाऽऽध्मानयुतं निरीक्ष्यते ।
एतेषु चिह्नेषु समुद्भवत्सु प्रागुक्तसीमां लभते ज्वरोऽपि ॥ १८ ॥
आद्ये तु सप्ताह इयं दशा स्यादथो द्वितीये दिनसप्तके तु ।
ज्वरस्तु पूर्वोदितसीमसंस्थः प्रलापतन्द्राकसनप्रमोहैः ॥ १९ ॥
आक्षेपदौर्बल्यमुखप्रशोषाध्मानैररत्या सहितो विशेषात् ।
जिह्वाऽत्र रक्ता परितोऽन्त्यभागे तथा च मध्ये मलिनाऽथ कर्कशा ॥ २० ॥
विलोक्यते प्रस्फुटिता च नेत्रे स्तब्धे च तेजोरहिते भवेताम् ।
नाडीगतिर्नातिचलाऽतितापश्चिन्ताविहीना वदनाकृतिः स्यात् ॥ २१ ॥
अन्यानि दोषत्रितयोदितानि चिह्नानि चाप्यत्र भवन्ति नूनम् ।
अथो द्वितीये दिनसप्तके तु क्वचिच्चतुर्थे क्रमतो ज्वरोऽयम् ॥ २२ ॥
उपद्रवैः सार्द्धमुपैति रिक्ततां प्रायस्तृतीये तु गते विमुञ्चति ॥ २३ ॥
उपद्रवसमाधिक्यं सतताहितसेविनः । जायते तेन नियतं कुपथ्यं यत्नतस्त्यजेत् ॥ २४ ॥

इसके बाद आठवें दिन पूर्वोक्त पूर्वरूप के लक्षण स्पष्ट रूप से प्रकट होकर लक्षण स्वरूप हो जाते हैं। उस समय रोगी का ज्वर क्रमशः अन्य लक्षणों के साथ बढ़ने लगता है और ज्वर का तापमान १०४ या १०५ डिग्री तक हो जाता है। मन्थरक ज्वर में रोगी की प्लीहा भी इस सप्ताह में बढ़ जाती है और जङ्घा, ग्रीवा तथा उदर भाग में मोती के समान दाने भी निकल आते हैं जो उत्पन्न होकर विलीन हो जाते हैं। यूरोप-देशवासी में वे दाने पूर्वोक्त स्थानों में ही लाल रङ्ग के होते हैं। जिह्वा मैली, रूखी तथा रक्तवर्ण के अङ्कुरों से सर्वत्र व्याप्त तथा कभी फटी हुई रहती है और उदर आध्मानयुक्त रहता है। इन सब लक्षणों के क्रमशः प्रकट होने पर ज्वर का भी तापमान पूर्वोक्त (१०४–१०५) डिग्री तक पहुँच जाता है। यह दशा ज्वर होने के प्रथम सप्ताह में रहती है उसके बाद द्वितीय सप्ताह में ज्वर का तापमान पूर्वोक्त सीमा पर तो बना ही रहता है किन्तु रोगी को प्रलाप, तन्द्रा, खाँसी, प्रमोह, आक्षेप, दुर्बलता, मुखशोष, आध्मान तथा अरति (किसी काम में मन का न लगना) भी हो जाती है। जिह्वा किनारों पर रक्तवर्ण की और मध्य में मैली तथा कर्कश एवं फटी सी दिखाई पड़ती है। नेत्र स्तब्ध तथा तेजहीन हो जाते हैं। ज्वर का ताप अत्यधिक रहने पर भी नाडी की गति अत्यन्त चञ्चल नहीं होती है, मुख की आकृति चिन्तारहित सी दिखाई पड़ती है। इस प्रकार अन्यान्य भी संनिपात के लक्षण रोगी में प्रकट होते हैं। इसके बाद तृतीय या चतुर्थ सप्ताह में उपद्रवों के सहित यह ज्वर शान्त हो जाता है। अधिकतर तो तीसरे ही सप्ताह में ज्वर छूट जाता है। इसमें निरन्तर कुपथ्य करने वाले रोगी को उपद्रव अधिक बढ़ जाता है। अतः यत्नपूर्वक कुपथ्य से बचना अत्यावश्यक है ॥ १४–२४ ॥

मन्थरकज्वरस्यासाध्यलक्षणम्—

यदा कुपथ्याचरणे रतस्य ज्वरादितस्यान्त्रगतो हि यक्ष्मा ।
भवेत्तदा तेन च फुस्फुसद्वयं ध्रुवं समाक्रान्तमपि प्रदृश्यते ॥ २५ ॥
तथा प्रजातैरितरैरुपद्रवैर्युतोऽयमान्त्रक्षयनामभाग् भवन् ।

असाध्यतां प्राप्य तदा तु याप्यतां लभेत रोगी बहुयत्नतः क्वचिद् ॥ २६ ॥
यदातिसारोऽधिकतीव्रतापो विषाक्तता रक्तविनिर्गमश्च ।
शोथान्विताऽथोदरगा कला स्यात्तदाऽप्यसाध्यो गदितो गदोऽयम् ॥ २७ ॥
अन्यानि रूपाणि च यानि पूर्वप्रोक्तानि वैद्यैरपि तानि नूनम् ।
प्राबल्यमीयुर्यदि दैवतः क्वचित्तदाऽप्यसाध्यत्वमितो गदो भवेत् ॥ २८ ॥
यदा प्रदृश्येत रुजस्त्वसाध्यता चिकित्सकैर्मन्थरकज्वरार्दिते ।
विना चिकित्साऽऽगमसिद्धपादचतुष्टयं स्यान्न तदा तु साध्यता ॥ २९ ॥

जब मन्थरक ज्वर वाले रोगी को बराबर कुपथ्य करते रहने से दैवात् अन्त्रगत यक्ष्मा (क्षय) रोग हो जाता है तब रोगी के दोनों फुफ्फुस (फेफड़े) भी रोगाक्रान्त हो जाते हैं और अन्य उपद्रव भी हो जाते हैं तब यही मन्थरक ज्वर 'आन्त्रक्षय' नाम से असाध्य कहा जाने लगता है और बहुत यत्न करने से कोई-कोई रोगी बचते हैं। जब रोगी को अतिसार, अधिक तीव्र ताप, विषाक्तता (टाक्सीमिया), रक्तस्राव और उदरगा कला में शोथ उत्पन्न हो जाता है तब भी वह असाध्य समझा जाता है और इसके अतिरिक्त अन्यान्य लक्षण ऊपर जो वैद्यों द्वारा कहे गये हैं वे यदि दैवात् उग्ररूप से प्रकट होवें तो अत्यन्त असाध्य समझा जाता है। उस समय सद्वैद्यों द्वारा उत्तमोत्तम औषधादि की उचितरूपेण व्यवस्था करने से ही रोगी का बचना संभव होता है ॥ २५–२९ ॥

विमर्श—मन्थरक ज्वर प्रायः पित्तोल्बण त्रिदोषज होता है किन्तु विभिन्न अवस्थाओं में अथवा अपचार से अन्य दोषों की भी उल्बणता हो सकती है। इस ज्वर से पीड़ित विभिन्न रोगियों में पूर्वोक्त संनिपात ज्वर के विविध स्वरूपों में से किसी भी एक प्रकार के लक्षण मिल सकते हैं।

अथाक्षेपक[1]ज्वरनिदानम्

आक्षेपकज्वरनिरुक्तिः—

यस्मादाक्षिप्यन्ते, प्रायेणाङ्गानि यन्ति संकोचम् । घोरो ज्वरश्च संज्ञाहृदसावाक्षेपकः प्रोक्तः॥

जिस रोग में रोगी के अङ्ग प्रायः आक्षेपयुक्त और संकुचित होते रहते हों और रोगी संज्ञाशून्य हो जाय तथा घोर ज्वर होता हो उसे 'आक्षेपक' ज्वर कहते हैं ॥ १ ॥

आक्षेपकज्वरस्य निदानम्—

बहुजनसमवायो यत्र देशे विशेषादथ च यदि सदा स्यात्पांसुधूमप्रसारः ।
नरि रचयति वासं तत्र जीवाणुजातो ज्वर इह खलु जायेतातिदुःखप्रदोऽयम् ॥ २ ॥

जहाँ पर अधिक मनुष्य निवास करते हों (घनी आबादी हो) तथा जहाँ पर धूलि या धूम अधिक हो वहाँ के रहने वाले लोगों में जीवाणुओं द्वारा यह (आक्षेपक) ज्वर उत्पन्न होता है जो अत्यन्त दुःखप्रद है ॥ २ ॥

तस्य संप्राप्तिः—

पूर्वोक्तहेतोरुदितं विषं हि, मस्तिष्कमूले मनुजस्य यस्य ।
प्रायेण नूनं परितः सुषुम्णाकाण्डं च तच्छादिकलाऽन्तराले
क्रमाद्बसीकामतिपूयतुल्यां संहत्य दोषान्निखिलान्प्रकोप्य ॥ ३ ॥
चेष्टावहनाडिकाव्रजानामत्युत्तेजनहेतुतो जनानाम् ।
बह्वाक्षिपदङ्गकानि शाखाः संकोच्य प्रणिहन्ति चेतनां च ॥ ४ ॥
आक्षेपकगदस्यैषा संप्राप्तिर्वैद्यनिश्चिता । प्रायेणात्र नृणां लोके जीवितं दुर्लभं भवेत् ॥ ५ ॥

1. Cerebro spinal fever or Meningitis.

पूर्वोक्त जीवाणुओं द्वारा उत्पन्न हुआ विष जिस मनुष्य के मस्तिष्कमूल में संसक्त सुषुम्णा काण्ड को आच्छादित करने वाली कला के अन्दर स्थित लसीका को पूययुक्त कर बढ़ा देता है और संपूर्ण दोषों को प्रकुपित कर चेष्टावह नाडियों को अत्यन्त उत्तेजित कर देता है तब अङ्गों में आक्षेप और हाथ-पैरों में संकोच उत्पन्न हो जाता है एवं संज्ञा भी नष्ट हो जाती है, इस प्रकार से आक्षेपक ज्वर की संप्राप्ति का वर्णन वैद्यों ने किया है। प्रायः करके इसमें रोगी का जीना दुर्लभ हो जाता है ॥ ३–५ ॥

तस्य रूपम्—

उग्रा पीडा जायते यस्य शीर्ष्णि च्छर्दिः शैत्यं जातु चिद्वेपथुश्च।
ग्रीवास्तम्भोऽपि प्रसह्याथ शीर्षं पश्चाद् यत्राकृष्यतेऽद्धाऽऽमये तु ॥ ६ ॥
गच्छन्त्यङ्गान्येव संकोचभावं स्यातां वक्रे चक्षुषी नूनमेव।
शाखाः स्तब्धाः सन्ति वृद्धिर्ज्वरस्याजस्रं प्रायो लक्ष्यते स्पष्टतोऽपि ॥ ७ ॥
तन्द्रा मोहोऽपि प्रलापोऽथ शश्वत् स्यादाक्षेपो गात्रमध्ये जनानाम्।
नूनं रक्तश्यावलक्ष्मोद्भवश्च नाशो जायेतेन्द्रियाणां क्रमेण ॥ ८ ॥
आक्षेपकज्वरभवं निखिलं तु चिह्नमेतन्मतं सुभिषजां गदितं मयेत्थम्।
स्याद् यत्र रोगिपुरुषे स मृतो भवेदे-काहाच्च कश्चिदथवा त्रिदिनादवश्यम् ॥ ९ ॥
एवं क्लिश्यँस्त्रिचतुरदिनान्येव सप्ताहमद्धा कश्चिद्धाऽसून्नियतिवशतः प्रायशः संजहाति।
कश्चित् पूर्वार्जितसुकृततिः सच्चिकित्साप्रसङ्गाज्जीवेदाक्षेपकपदयुतेन ज्वरेणार्दितोऽपि ॥

जिसके मस्तक में उग्र पीड़ा और वमन हो, शीत मालूम पड़ती हो, कभी २ कम्प, ग्रीवा में स्तब्धता (जकड़ाहट) हो और सिर पीछे की ओर खिंच जावे तथा अङ्ग संकुचित हो जायँ एवं आखें टेढ़ी, हाथ-पैर स्तब्ध-ज्वर की निरन्तर वृद्धि, तन्द्रा, मोह, प्रलाप तथा बराबर शरीर में आक्षेप हो और रक्त तथा श्याव वर्ण का चिह्न शरीर में उत्पन्न हो जायें, इन्द्रियों को अपने २ विषयों को ग्रहण करने की शक्ति नष्ट हो गई हो, उसे वैद्य लोग आक्षेपक ज्वराक्रान्त कहते हैं। यदि यह लक्षण रोगी में उपस्थित हो जाय तो वह १ दिन अथवा ३ या ४ दिन अथवा कोई-कोई १ सप्ताह तक प्रारब्धवश क्लेश पाता हुआ मर जाता है। पूर्वार्जित पुण्यवश उत्तम चिकित्सा होने से कदाचित् ही कोई बच जाता है ॥ ६–१० ॥

अथ दण्डकज्वरनिदानम्।

तत्रादौ दण्डकज्वरस्य परिचयः—

विशिष्टमशकोद्भवो जगति दण्डकाख्यो ज्वरः, सदाऽस्थिनिचयं नरस्य परिपीडयन्निर्भरम्।
स्थितिं मुनिमितान्यहानि विदधाति नित्यं तनौ, ततो निगदितो ज्वरो मुनिभिरेष सप्ताहकः॥
एनं डेङ्गयूफीवरं त्वाङ्ग्लभाषा-विज्ञा वैद्या दण्डकाख्यं ज्वरं च।
अस्थ्नां नूनं भञ्जनं भूमिमध्ये संभाषन्ते नामधेयैरमीभिः ॥ २ ॥

दण्डक ज्वर एक विशेष प्रकार के मच्छड़ के द्वारा फैलता है। यह मनुष्यों के अस्थिसमूह को पीड़ित करता हुआ १ सप्ताह तक शरीर में बना रहता है। इसी से इसको विचारवान वैद्य सप्ताह-ज्वर, दण्डक ज्वर या अस्थिभञ्जन ज्वर और पाश्चात्य चिकित्सक डेङ्गयूफीवर (Dengue Fever) कहते हैं ॥ १–२ ॥

दण्डकज्वरपूर्वरूपम्—

यदा मानवस्याङ्गमध्येऽङ्गमर्दः क्लमश्चारुचिर्दृश्यते दैवयोगात्।
अथोत्क्लेशसादौ तदा दण्डकाख्य-ज्वरस्याग्ररूपं जनैर्वेदितव्यम् ॥ ३ ॥

दण्डक ज्वर की पूर्वरूपावस्था में अङ्गमर्द, क्लम, अरुचि, जी मचलना और अवसाद होते हैं ॥

दण्डकज्वररूपम्—

अस्थ्नां सन्धिषु घोरा दण्डाहननजसमा पीडा।
क्षिप्रोदयलयशाली समस्ततनुगोऽपि वीसर्पः॥ ४॥
संचारि सन्धिशूलं शोथयुतं लक्ष्यते यत्र।
ज्वरमध्येऽपि च कासः कण्ठे पीडा प्रतिश्यायः॥ ५॥
पुनरावर्त्तनशीलो, मुञ्चत्यष्टाहतो ज्वरो यत्र।
सन्धिरुजाश्चिरकालं, सन्ति वदन्ति च दण्डकज्वरं तम्॥ ६॥
प्रायो जनपदजन्मा, कफमारुतकोपजातनिजवर्ष्मा।
बालानामथ जरतां, जातो दारुण उदीरितो वैद्यैः॥ ७॥

दण्डक ज्वर का लक्षण—जिस ज्वर में अस्थियों की सन्धियों में डण्डा मारने जैसी घोर पीड़ा, समस्त शरीर में उत्पन्न होकर शीघ्र नष्ट हो जाने वाला, सञ्चारी विसर्प और शोथयुक्त सन्धिशूल, कास, कण्ठ में पीड़ा तथा प्रतिश्याय (जुकाम) होता हो और जो ज्वर उतर कर पुनः चढ़ जाता हो, किन्तु ज्वर छूट जाने पर भी सन्धियों में पीड़ा बनी रहती हो उसे दण्डक ज्वर कहते हैं। यह प्रायः करके शहरों में विशेष होता है। यह कफ तथा वात के प्रकोप से उत्पन्न होता है और बालक तथा वृद्धों में प्रायः अधिक कष्टदायक होता है॥ ४–७॥

विमर्श—इसमें प्रायः वातोल्बण त्रिदोष ज्वर के लक्षण मिलते हैं। ज्वर प्रायः तीसरे दिन कम होकर चौथे या पाँचवें दिन पुनः बढ़कर २–३ दिन रहता है। इसी प्रकार इसके २ या ३ वेग होकर प्रायः आठवें दिन रोग शान्त हो जाता है।

अथ कर्णमूलिकज्वरनिदानम्।

पूर्वं भवेदेकतरे हि पार्श्वे कर्णस्य शोथो ज्वरकृद्रुजावान्।
ततो द्वितीयेऽनुपदं भिषग्वरैर्गदः स उक्तो भुवि कर्णमूलिकः॥ १॥
अस्मिन् रोगे कर्णमूलस्थिता वा जिह्वाऽधःस्था ग्रन्थयोऽधोहनुस्थाः।
नूनं शूयन्ते ततः पञ्चभिर्वा षड्भिर्घस्त्रैरेव शान्तिं प्रयाति॥ २॥
पुंसो भूयो मुष्कयोर्वै रुजाऽथो शोथो जायेत क्वचित् योषितस्तु।
योनौ वक्षोजातयोस्तौ दशाहात् प्रायः शाम्यन्त्यत्र सर्वे विकाराः॥ ३॥
अयं ज्वरो वातकफोद्भवस्तथा विशेषतो जानपदः प्रदृश्यते।
प्रवर्त्तते प्रायश एव यूनां किंवा शिशूनां ननु कर्णमूलिकः॥ ४॥

इस ज्वर में प्रथम किसी भी पार्श्व में कर्णमूल में पीडायुक्त शोथ होता है पुनः दूसरी ओर के कर्णमूल में भी शोथ होता है। इसी से इसको वैद्यलोग 'कर्णमूलिक ज्वर' कहते हैं। इस रोग में कर्णमूल या जिह्वा के नीचे अथवा अधोहनु के नीचे होने वाली लाला ग्रन्थियों में शोथ उत्पन्न होता है। यह ज्वर ५–६ दिन में ही शान्त हो जाता है। पश्चात् कभी कभी पुरुषों के अण्डकोश तथा स्त्रियों की योनि (भगनासा) तथा स्तनों में पीडा तथा शोथ हो जाता है। इस रोग में प्रायः १० दिन के अन्दर सभी विकार दूर हो जाते हैं। यह कर्णमूलिक ज्वर वात तथा कफ दोष से उत्पन्न होता है। शहरों में रहने वालों को विशेषतः होता है। प्रायः युवा तथा बच्चों में यह रोग पाया जाता है॥ १–४॥

शीर्षकलायामपि च क्लोम्नि शोथश्चार्दितमप्यध्वनि।
ज्वरे कर्णमूलिकपदवाचि सद्भिरुपद्रव एषोऽवाचि॥ ५॥

कर्णमूलिक ज्वर के उपद्रव—कर्णमूलिक ज्वर में उपद्रव रूप में शीर्षावरण शोथ, क्लोमशोथ, और अर्दित (वातरोग) होते हैं, ऐसा वैद्यों ने कहा है॥ ५॥

विमर्श—प्राचीन आचार्यों ने इसे पाषाणगर्दभ कहा है। (देखिए उत्तरार्ध पृष्ठ १९६) यह संक्रामक रोग है। इसे अंग्रेजी में मम्प्स (mumps) कहते हैं।

अथ माल्टाज्वरनिदानम्

माल्टाज्वरस्य परिचयः—

ज्वरः प्रागयं माल्टाद्वीपमध्ये निवासं प्रकुर्वत्सु मर्त्येषु नूनम्।
अभूल्लब्धनैजोद्भवस्तेन चास्य प्रसिद्धिर्भवे माल्टासंज्ञयैव ॥ १ ॥

यह ज्वर सर्वप्रथम माल्टा द्वीप में रहने वालों को हुआ था, अतः 'माल्टाज्वर' नाम से इसकी प्रसिद्धि हुई ॥ १ ॥

तस्य निदानम्—

गदस्यास्य कीटाणवो विन्दुतुल्याकृतिं धारयन्तो रुजाऽऽर्त्तास्वजासु।
पयस्यालयं स्वे प्रकुर्वन्त एते विदध्युर्गदार्त्तान् सदा तत्प्रसक्तान् ॥ २ ॥
क्वचिच्चाजमस्येक्ष्यते सन्निमित्तं मलं वाऽथ मूत्रं च रक्तं हि पित्तम्।
तथाऽऽबालवृद्धेभ्य एषोऽत्र नूनं समानां प्रवृत्तिं विधत्तेऽप्यनूनम् ॥ ३ ॥

इसके उत्पादक जीवाणु विन्दु के आकार वाले होते हैं और रोगिणी बकरी के दूध में पाये जाते हैं और उस दूध के पीने से ही मनुष्यों को यह रोग होता है। ये जीवाणु बकरियों के मल-मूत्र, रक्त और पित्त में भी रहते हैं। इनके संपर्क से भी यह रोग हो जाता है, यह रोग बाल, वृद्ध आदि सभी में समान रूप से पाया जाता है ॥ २–३ ॥

तस्य संप्राप्तिः—

अजादुग्धपानादिना रोगकीटाणवस्त्वन्नमार्गेण चान्त्रं प्रविष्टाः।
ततः शोणितं चोपगम्यातिदुष्टं समुत्पादयन्ति ज्वरं वै विशिष्टम् ॥ ४ ॥
ततश्चोदरस्थां कलामास्थितास्तौंल्लसीकासमुत्पादने सिद्धहस्तान्।
अपि ग्रन्थिराशीनशेषानवश्यं स्वयं शूनयन्ति प्रसह्य प्रशस्यम् ॥ ५ ॥

बकरी के दूध आदि पीने से रोग के कीटाणु अन्नमार्ग से अन्त्र में प्रविष्ट होकर वहाँ से रक्त में प्राप्त होकर उसे दूषित कर उदरस्थित कला की लसीकोत्पादक ग्रन्थियों को शोथयुक्त माल्टा ज्वर उत्पन्न करते हैं ॥ ४–५ ॥

माल्टाज्वरस्य रूपम्—

गदे माल्टानामके नाम नूनं सदाऽऽरोहते स्वैरमुग्रो ज्वरोऽपि।
शिरोरुक् तथैवाङ्गमर्दो वमिश्चाप्यथोत्क्लेश उत्पद्यते रोगिवर्गे ॥ ६ ॥
कदाचिद् भवेत्कण्ठदाहः क्वचिच्च प्रतिश्यायकासप्रकाशोऽप्यवश्यम्।
प्रवृत्तिः परं स्वेदराशेर्ज्वरस्यावरोहे सशोथा रुजा सन्धिदेशे ॥ ७ ॥
अपि प्लीहवृद्धिस्तथा कोष्ठजाता महाबद्धता स्याद्धि माल्टाज्वरेऽस्मिन्।
प्रभेदाश्चतुःसंख्यकाश्चास्य सद्भिर्निदानैकविद्भिर्भिषग्भिः प्रदिष्टाः ॥ ८ ॥
तत्र प्रभेदो मृदुराद्य उक्तः साधारणः स्यात्तदनु द्वितीयः।
ततस्तृतीयो विषमश्चतुर्थो ज्ञेयः सदा दारुण इत्थमेव ॥ ९ ॥
प्लीहाऽभिवृद्धिरुदिता तु मृदौ ज्वरेऽस्मिन् साधारणे निखिललक्ष्मसमुद्भवः स्यात्।
किंचास्य मध्यसमयोऽथ तदैधतेऽद्धा भेदे भवेद्धि विषमे विषमोऽपि वेगः ॥ १० ॥
येन ज्वरस्य हि दशोषसि शान्तरूपा मध्ये दिनस्य च भवेदिह सोग्ररूपा।
तेनैव तस्य नियतं ननु तापमानं संलक्ष्यते गदिनि पञ्चषयुक् छतं वै ॥ ११ ॥
सायं ज्वरस्तु सहसा बहुशो जनानां प्रस्वेदनिर्गमनतो विलयं प्रयाति।

एवंविधा ज्वरदशा विषमाऽत्र भेदे स्यात् सर्वसंधिषु विशेषरुजाऽपि नूनम् ॥ १२ ॥
उग्रे ज्वरो भवति चोग्रतमः शरीरे भूरिप्रचण्डपिडकापरिदर्शनं स्यात्।
दाहोऽपि फुफ्फुसकलागत एव चातीसारो विपद्यत इहाशु गदी दशायाम् ॥ १३ ॥

माल्टा नामक ज्वर धीरे-धीरे उग्ररूप होता है। इसमें सिर में पीड़ा, अङ्गमर्द, वमन, उत्क्लेश, कण्ठ में दाह, जुकाम तथा खाँसी होती है। ज्वर के उतार पर खूब पसीना होता है और सन्धि-देश में शोथ के साथ पीड़ा, प्लीहा की वृद्धि तथा कोष्ठबद्धता भी होती है। इस ज्वर के चार भेद वैद्यों ने बतलाया है। उसमें पहला भेद मृदु, दूसरा साधारण, तीसरा विषम और चौथा दारुण होता है। मृदु ज्वर में प्लीहा की वृद्धि होती है, साधारण में पूर्वोक्त सभी लक्षण प्रकट होते हैं और इसका मध्यकाल बढ़ जाता है। विषम में ज्वर का वेग विषम रहता है जिससे ज्वर की दशा प्रातः उषाकाल में शान्त रूप और दोपहर में उग्र रूप हो जाती है। इसमें ज्वर का ताप-मान प्रायः १०५-१०६ डिग्री तक हो जाता है और सन्धियों में विशेष पीड़ा होती है। शाम को पसीना निकल कर ज्वर उतर जाता है। दारुण ज्वर में अत्यन्त उग्र रूप का ज्वर होता है और बहुत सी प्रचण्ड पिड़काएँ शरीर में निकल आती हैं। एवं फुफ्फुसकला का दाह तथा अतिसार होता है। इस दशा में रोगी शीघ्र मर जाता है ॥ ६-१३ ॥

विमर्श—यह रोग भारतवर्ष में बहुत कम मिलता है और प्राचीन आचार्यों ने इसका समा-वेश जीर्ण ज्वर में किया है। (देखिए पृ० १३३ पू०)

अथ कालज्वरनिदानम्[1]

तस्य निदानम्—

आनूपदेशेषु महीजवाष्पात् प्रायेण नृणां कृमिकारणाच्च।
कालज्वरः कालसमः किलायं जायेत तल्लक्षणमुच्यतेऽग्रे ॥ १ ॥

प्रायः करके आनूप देशों में पृथ्वी के बाष्प से और कृमियों के कारण काल के समान काल-ज्वर उत्पन्न होता है, जिसका लक्षण आगे कहा जाता है ॥ १ ॥

विमर्श—इस रोग का प्रधान कारण 'लीश्मनिया डोनोवनी (Lieshmania donovani) नामक एक पराश्रयी कीटाणु है। इसका संक्रमण एक विशिष्ट प्रकार की मक्खी (Phlebotomus argentipes) के दंश द्वारा होती है।

तस्य संप्राप्तिः—

जीवाणवस्त्वस्य गदस्य नूनं मज्जान्त्रयोर्मुष्कजकोशमध्ये।
अध्यन्त्रभित्त्यस्थ्न्यधिफुफ्फुसं वै प्रायो यकृत्प्लीहगता वसन्ति ॥ २ ॥
प्लीहा यकृच्चैधत एव नूनमनारतं ते क्षुभिते विशेषात्।
स्यातां च ते सौत्रिकतन्तुयुक्ते ज्वरामयेऽस्मिन्ननु कालसंज्ञे ॥ ३ ॥

इस रोग के जीवाणु प्रायः मज्जा, अन्त्र, अण्डकोश, अन्त्र की भित्ति, हड्डी, फुफ्फुस तथा यकृत् और प्लीहा के अन्तर्गत पाये जाते हैं। इसमें प्लीहा और यकृत् की वृद्धि होती है और वे दोनों विशेष रूप से क्षुभित होकर सौत्रिक तन्तुमय हो जाते हैं ॥ २-३ ॥

तस्य रूपम्—

गदेऽस्मिन्ज्वरः पूर्वमेवाविसर्गी प्रवर्त्तेत यावत्त्रिसप्ताहमद्धा।
क्वचिद्रोगिमध्येऽधिकं वा ततो वै सदाऽऽरोहसत्ताऽवरोहैः स्थितः स्यात् ॥ ४ ॥
विमुच्य कालं किल कंचिदेवमावर्त्तते रोगिजनेषु भूयः।

---

१. Kala azar.

पूर्वोदितैर्लक्षणभिरन्वितः सन् प्रायेण कालज्वर आमयोऽयम् ॥ ५ ॥
एवं द्विवारागमनेन नृणां रक्ताल्पतां प्रत्यहमाचरेच्च ।
स्वेदस्य बाहुल्यमथाङ्गमध्ये प्रायेण हस्ताङ्घ्रिणि च प्रपीडनम् ॥ ६ ॥
ज्वरस्तु मन्दत्वमुपागतस्तदा–भवेत्स्थिरो रोगितनौ सुनिश्चितम् ।
विपाण्डुताऽपि ग्रहणी च कामला प्रजायते चोर्ध्वगरक्तपित्तम् ॥ ७ ॥
तथा क्वचित्स्यादपि रोमकूपिकं कराङ्घ्रिवक्त्रेऽपि च शोथसंभवः ।
ध्रुवं हि सद्यःफलदं चिकित्सितं विनाऽमयोऽयं बहुकष्टसाध्यः ॥ ८ ॥

इसमें सर्वप्रथम ज्वर अविसर्गी (नहीं उतरने वाला) होता है जो ३ सप्ताह या इससे भी अधिक दिन तक कुछ चढ़ाव, स्थिति तथा उतार के साथ बना रहता है। फिर ३-४ सप्ताह व्यतीत होने पर कुछ काल के लिये यह ज्वर उतर जाता और पुनः पूर्वोक्त लक्षणों से युक्त होकर चढ़ जाता है। इस प्रकार से दुबारा ज्वर उत्पन्न होने से रोगी में प्रतिदिन रक्ताल्पता होने लगती है और शरीर से पसीना अधिक निकलता है, हाथ–पैरों में अधिक पीड़ा होती है। इस प्रकार से ज्वर मन्दरूप को धारण कर रोगी के शरीर में स्थिर हो जाता है। और अन्त में पाण्डुता, ग्रहणी, कामला, ऊर्ध्वग रक्तपित्त तथा कभी-कभी रोमकूपों से निकलने वाला रक्तपित्त और हाथ, पैर तथा मुख में शोथ हो जाता है। इस रोग की सद्यः फल देने वाली चिकित्सा यदि न की जाय तो यह अत्यन्त कष्टसाध्य हो जाता है ॥ ४–८ ॥

विमर्श—इस रोग में ज्वर कभी-कभी आरम्भ से ही सततक या अन्येद्युष्क स्वरूप का अथवा कभी-कभी राजयक्ष्मा के समान मन्द रूप में रहता है। दिन में २–३ बार बढ़ना और घटना, पाण्डुता से अधिक कृशता, क्षुधाधिक्य, बालों में भंगुरता, त्वचा पर काले धब्बे उत्पन्न होना और नासा-रक्तपित्त के साथ प्लीहा एवं यकृत् की वृद्धि (जो ज्वर न रहने पर भी बढ़े रहते हैं) इस रोग के प्रधान लक्षण हैं। प्राचीन आचार्यों ने इसका समावेश जीर्ण ज्वर में ही किया है। अञ्जन (Antimony) इस रोग की परमौषध है। सुश्रुतोक्त पाण्डुरोग के भेद 'लाघरक' के बहुत से लक्षणों में समता होने और उसमें भी अञ्जन (Antimony) के प्रयोग का विधान होने से कुछ विद्वान् 'कालाजार' को 'लाघरक' में समाविष्ट मानते हैं। जलोदर, रक्तपित्त और रक्तप्रवाहिका इस रोग में घातक उपद्रव होते हैं।

कालज्वरस्यासाध्यता—

अरोचकच्छर्दियुतं मनुष्यं क्षीणेन्द्रियं क्षीणबलं तथैव ।
क्षीणामिषं फुफ्फुसदाहयुक्तं समन्वितं यक्ष्मजलक्ष्मजातैः ॥ ९ ॥
प्रवाहिकापीडितमप्यतीसाराक्रान्तमेवंविधमेव वैद्यः ।
कालज्वरेणार्दितमन्तकस्याध्वगं विदित्वा न च तं चिकित्सेत् ॥ १० ॥

अरुचि, वमन, इन्द्रियों की क्षीणता, मांसक्षीणता, फुफ्फुस में दाह, यक्ष्मा के सभी लक्षण, प्रवाहिका, अतिसार आदि उपद्रव कालज्वर के रोगी में दिखाई पड़ें तो वैद्य असाध्य समझ कर उसकी चिकित्सा करना छोड़ देवे ॥ ९–१० ।

अथाह्निकज्वरनिदानम्

नासापुटाभ्यन्तरगात्परक्तवर्णो भवेद् यत्र गदे तु शोथः ।
तथा ज्वरो गात्ररुजासमेतः स आह्निकः श्लेष्मकृतो ज्वरः स्यात् ॥ १ ॥

जिस रोग में नासिका के भीतर किञ्चित् रक्तवर्ण का शोथ हो और ज्वर भी हो एवं अङ्गों में पीड़ा जोरों से हो वह कफ से उत्पन्न होने वाला 'आह्निक ज्वर' कहलाता है ॥ १ ॥

अथ श्लैपदिकज्वरनिदानम्

शाखासु मुष्कद्वितयेऽपि रागं शोथं रुजां चाधिकमेव तन्वन् ।
पक्षान्तभावी बहुशो ज्वरो यो वैद्यैरिह श्लैपदिकः स्मृतः सः ॥ १ ॥

हाथ-पैर तथा अण्डकोषों में रक्तिमा, शोथ तथा अधिक पीड़ा करने वाला और प्रायः पक्ष के अन्त (अमा या पूर्णिमा) के आसपास के दिनों में होने वाला ज्वर 'श्लैपदिक' ज्वर कहलाता है।

विमर्श—श्लीपद रोग का विस्तृत वर्णन उत्तरार्ध पृष्ठ ७७ पर देखें।

अथ औपद्रविकज्वरनिदानम्

प्रायेण जीर्णेषु गदेषु सर्वेष्वपि ग्रहण्यादिषु वै विशेषात् ।
यः संनिपातप्रभवो ज्वरः स्याद् विद्यात्तमौपद्रविकाभिधं हि ॥ १ ॥

प्रायः करके सभी पुराने रोगों में विशेष करके ग्रहणी आदि में प्रायः संनिपात (त्रिदोष) से उपद्रव स्वरूप में उत्पन्न होने वाले ज्वर को 'औपद्रविक ज्वर' कहते हैं ॥ १ ॥

अथ ग्रन्थिकज्वरनिदानम्

तस्य परिचयः—

ग्रीवाकक्षावङ्क्षणाद्ये लसीकाग्रन्थिव्राते शोथरुक्कृज्ज्वरो यः ।
जातो घोरो देशविध्वंसकारी वैद्यैर्नूनं ग्रन्थिकाख्यः स्मृतः सः ॥ १ ॥
दण्डाकारास्तस्य कीटाणवो वै मूलं प्रोक्तं मूषकोत्था भिषग्भिः ।
तद्भेदास्तु ग्रन्थिकः कीटरक्तः संदृश्यन्ते फुफ्फुसस्य प्रदाही ॥ २ ॥

ग्रीवा, कक्षा तथा वङ्क्षण आदि प्रदेश में स्थित लसीका-ग्रन्थियों में शोथ तथा तीव्र पीड़ायुक्त देश को विध्वंस करने वाले घोर ज्वर को ग्रन्थिक ज्वर कहते हैं। इसके मूल कारण चूहों से उत्पन्न, फैलने वाले, दण्डाकार कीटाणु होते हैं। इसके तीन भेद होते हैं।* १—ग्रन्थिक, २—कीटरक्त (कीटशोणित या सेप्टीसिमियक), ३—फुफ्फुसप्रदाही (फुफ्फुसप्रदाहिक) ॥ १-२ ॥

तस्य निदानम्

भूम्ना रोगार्त्ताखुभी रोगयुक्तस्थाने श्वासोच्छ्वासतः स्पर्शतोऽपि ।
सञ्चारेण प्रायशो जगनपद्भयां संक्रामन्त्येते जातु पुंसः पुमांसम् ॥ ३ ॥
यदा मूषकस्थायिकीटः कथञ्चिन्नरं संदशत्यत्र दंशात्तदानीम् ।
विनिःसृत्य कीटाणवस्तल्लसीकावहासु प्रकुर्वन्ति संचारमेव ॥ ४ ॥
यदा ते ततो यान्ति तद्ग्रन्थिमध्ये तदा क्षोभमायान्ति तद्ग्रन्थयोऽपि ।
चिकीर्षन्ति नाशं च कीटाणुजस्य प्रकृत्या विरुद्धस्य नूनं विषस्य ॥ ५ ॥
ग्रन्थीनां वै कार्यवृद्धिप्रभावादस्मिन् कार्ये जायते तत्प्रवृद्धिः ।
किञ्चोत्पद्येत ज्वरस्तद्विषात्संप्राप्तिः प्रोक्ता ग्रन्थिकस्येत्थमस्य ॥ ६ ॥
यदा ग्रन्थिमध्ये कदाचिन्न कीटाणवस्ते विनाशं गता वा भवेयुः ।
तदा कीटरक्तत्वमेव ध्रुवं स्यादवस्थेयमुग्रा भृशं दारुणाऽपि ॥ ७ ॥
न शूनाः स्युरत्र क्वचिद् ग्रन्थयोऽङ्गविशेषस्थिताः किन्तु सर्वाङ्गजाताः ।
मनागुच्छ्वसेयुः समस्ताः स्वतस्ता इयं कीटरक्तस्य सम्प्राप्तिरुक्ता ॥ ८ ॥
कीटाणवः फुफ्फुसदाहका ये श्लेष्मादिभिस्ते बहिरागतास्तु ।
श्वासायनेनान्यनरस्य चान्तर्गत्वा भवेयुर्ननु फुफ्फुसप्लुषः ॥ ९ ॥

---

* Types of plague. (1) Bubonic. (2) Septicaemic. (3) Pneumonic.

इत्थं त्रिविधं फुफ्फुसदाहकस्य ज्वरस्य च ग्रन्थिकनामकस्य।
सम्प्राप्तिरुक्ता भिषगुत्तमैर्या सा कष्टदायिन्यमिता सदोह्या ॥ १० ॥

रोगार्त्त देश के चूहों द्वारा इस रोग का प्रसार होता है। श्वासोच्छ्वास के द्वारा अथवा स्पर्श से किंवा नङ्गे पैर चलने-फिरने से रोग के कीटाणुओं का मनुष्यों में संक्रमण होता है और उसके संसर्ग से अन्यों को भी ग्रन्थिक ज्वर हो जाता है। जिस समय रोगयुक्त चूहों में रहने वाले पिस्सू नामक दृश्य कीट दैवात् मनुष्य को काट लेते हैं तो उसके काटने के साथ ही बहुत से दण्डाकार रोगोत्पादक कीटाणु मनुष्यों की लसीकाओं में प्रविष्ट होकर संचार करते हैं और जब वे लसीका ग्रन्थियों में पहुँचते हैं तब उनसे उनमें क्षोभ उत्पन्न होता है क्योंकि उस समय कीटाणुजन्य विष का नाश करने में उक्त ग्रन्थियाँ प्रवृत्त हो जाती हैं जिससे उनका कार्यक्षेत्र बढ़ जाता है और ग्रन्थियाँ भी बढ़ जाती हैं। उक्त कीटाणुजन्य विष के प्रभाव से भयङ्कर ज्वर उत्पन्न हो जाता है। यदि उन कीटाणुओं का लसीका-ग्रन्थियों द्वारा विनाश नहीं हो पाता तो वे घूमते हुए लसीका से रक्त में पहुँचते हैं तब उसे कीटरक्त प्रकार का ग्रन्थिक ज्वर कहते हैं। यह अत्यन्त घातक होता है। इसमें किसी एक स्थान में स्थित लसीकाग्रन्थियों में शोथ नहीं होता, बल्कि सर्वाङ्गस्थित सभी ग्रन्थियों में किञ्चिन्मात्र शोथ हो जाता है।

फुफ्फुसप्रदाही ग्रन्थिक ज्वर से पीड़ित रोगों के श्लेष्मा में स्थित कीटाणु श्लेष्मा के साथ बाहर निकल कर श्वासोच्छ्वास द्वारा अन्य व्यक्तियों के फुफ्फुस में पहुँच कर फुफ्फुसप्रदाही नामक ग्रन्थिक ज्वर पैदा कर देते हैं। यह ग्रन्थिक ज्वर की सबसे भयङ्कर कष्टदायिनी अवस्था है ॥३।१०॥

ग्रन्थिकज्वरस्य पूर्वरूपम्—

व्यथा शीर्ष्णि शैथिल्यमङ्गेषु सादो मनोदैन्यमुत्क्लेशभक्तारुची च।
ज्वरोक्तं च सामान्यतः पूर्वरूपं भवेद् ग्रन्थिकाख्ये ज्वरेऽदोऽग्ररूपम् ॥ ११ ॥

ग्रन्थिक ज्वर की पूर्वरूपावस्था में सिर में पीड़ा, अङ्गों में शिथिलता, अवसाद, मानसिक दीनता, उत्क्लेश, अन्न में अरुचि तथा ज्वर के अन्यान्य साधारण लक्षण उत्पन्न हो जाते हैं ॥ ११ ॥

ग्रन्थिकज्वरस्य रूपम्—

तीव्रज्वरो भवति पूर्वमिह क्वचिद्वा मन्दः शिरोरुगरती वमनं भ्रमश्च।
उत्क्लेशगात्रशिथिलत्वतृषाप्रलापा उन्मादमोहधमनीद्रुतगामिताश्च ॥ १२ ॥
मूर्च्छा तथा सततदुर्बलताऽथ निद्रानाशो नृणां नियतमित्यपि लक्ष्मजातम्।
कक्षाऽऽदिकावयवमध्यलसल्लसीकाग्रन्थिव्रजस्य परितापनमप्यवश्यम् ॥ १३ ॥
ततस्तृतीयेऽहनि वा चतुर्थे ग्रन्थिस्तु दुष्टाङ्गसमीपजाता।
सुतीव्रवेगेन विवर्द्धतेऽद्धा स्पर्शं न चेषत् सहते तु तत्र ॥ १४ ॥
तस्यां तु पाकोऽपि च पूयपूर्णता चिरात् प्रजायेत सदैव रोगिषु।
अक्ष्णोस्तथा स्याच्छ्वसोः प्रसुप्तिश्चेष्टां न कांचिद्विदधीत रोगी ॥ १५ ॥
अभिन्यासजातानि लिङ्गानि चान्यान्यपीक्ष्यन्त एवानिशं रोगिवर्गे।
भृशं कर्कशा दग्धतुल्या रसज्ञा भवेत्त्वस्तभावं भजन्ती च नाडी ॥ १६ ॥
द्वित्रैस्तथा पञ्चभिरेव षड्भिर्दिनैः क्वचिद्वा दशभिः कदाचित्।
सद्यः किलासून् विजहाति रोगी चिराच्च सिद्ध्यत्यपि तत्र कश्चित् ॥ १७ ॥
भवेद्बाहुजग्रन्थिजातो हि शोथस्तथा चात्र पाकः शुभोऽवश्यमेव।
इदं ग्रन्थिकाख्यज्वरस्याद्यभेदस्वरूपं यथावद् भिषग्भिः प्रदिष्टम् ॥ १८ ॥

इसमें प्रायः तीव्र ज्वर होता है किन्तु किसी २ को मन्द भी होता है। सिर में पीड़ा,

अरति, वमन, भ्रम, उत्क्लेश, शरीर में शिथिलता, प्यास, प्रलाप, उन्माद, मोह, नाड़ी का द्रुतगामी होना, मूर्च्छा, निरन्तर दुर्बलता, निद्रा का अभाव ये सब लक्षण निश्चित रूप से ग्रन्थिक ज्वर में होते हैं और साथ ही साथ इसमें कक्षा आदि की लसीका-ग्रन्थियों में शोथ तथा पीड़ा बढ़ने लगती है। उसके बाद तीसरे या चौथे दिन जिस स्थान पर इसके रोगोत्पादक कीटों का दंश होता है उसके पास की ग्रन्थि शीघ्र ही तीव्र वेग के साथ बढ़ने लगती है और उसके स्पर्श करने पर असह्य पीड़ा होने लगती है। उन ग्रन्थियों में बहुत देर में पाक तथा पूय की उत्पत्ति होती है, रोगी के आंखों तथा कानों में प्रसुप्ति (अवसाद) आ जाती है वह किसी प्रकार की चेष्टा करने में समर्थ नहीं होता, उसमें अभिन्यास ज्वर के लक्षण भी प्रकट होते हैं, जीभ अत्यन्त कर्कश, जली हुई सी दीख पड़ती तथा नाड़ी शिथिल भाव से चलती है। २, ३, ५, ६ दिन और कभी १० दिन में रोगी प्राण छोड़ देता है; संयोग से ही कोई बच जाता है। यदि इसमें बाहु की लसीका-ग्रन्थियों में शोथ हो और पाक शीघ्र हो जावे तो शुभ लक्षण है अर्थात् रोगी बच जाता है। इस भांति से ग्रन्थिक ज्वर के प्रथम (ब्रध्नीय) भेद का सम्पूर्ण लक्षण वैद्यों ने कहा है ॥ १२-१८ ॥

ग्रन्थिकज्वरस्य द्वितीयभेदस्य कीटरक्तस्य स्वरूपम्—

बहुग्रन्थयः कीटरक्ताख्यभेदे ज्वरे ग्रन्थिके नापि वर्द्धन्त एव।
भवेत्तत्र रक्तस्य दुष्टिस्तथा च ज्वरस्यानिशं तीव्रता वै विशेषात् ॥ १९ ॥
गतिर्नाडिकायाश्च दौर्बल्ययुक्ता गदार्त्तस्य पुंसोऽतितीव्रा सदा स्यात्।
तथाऽन्यानि संज्ञाप्रणाशादिकानि त्रिदोषोद्भवानीह चिह्नान्यपि स्युः ॥ २० ॥
गदी संयुतो लक्षणैरेभिरेव द्रुतं दारुणामप्यवस्थामवाप्य।
दिनैः पञ्चभिः सप्तभिर्वाऽपि नूनं यमस्यालयं याति देहं विहाय ॥ २१ ॥
अतः प्रायशोऽसावसाध्यो भिषग्भिः प्रदिष्टोऽत्र भाग्याद्विमुच्येत कश्चित्।
इदं कीटरक्ताख्यभेदस्य रूपं ज्वरे ग्रन्थिके वर्णितं सर्वदैव ॥ २२ ॥

कीटरक्त नामक ग्रन्थिक ज्वर में ग्रन्थियाँ बहुत नहीं बढ़तीं किन्तु रक्त की दुष्टि विशेषतः होती है और ज्वर की तीव्रता निरन्तर बनी रहती और नाड़ी दुर्बल एवं अति तीव्र चलती है तथा संज्ञानाश आदि संनिपात ज्वर के अन्यान्य लक्षण भी मिलते हैं। रोगी इन लक्षणों से युक्त हो दारुण अवस्था को प्राप्त कर ५-७ दिनों में शरीर छोड़ देता है। इसमें कोई-कोई भाग्य से ही बच जाता है। इस रोग को वैद्यों ने असाध्य कहा है ॥ १९-२२ ॥

ग्रन्थिकज्वरस्यान्तिमभेदस्य फुफ्फुसप्लुषस्य रूपम्—

फुफ्फुसप्लुषनामके निर्ग्रन्थिके भेदे भृशं, श्वासमार्गं नूनमस्मिन्नेव संक्रमते विषम्।
शीतपूर्वकदारुणज्वर आशु संजायेत हि, शिरसि शूलमथाङ्गमर्दो भ्रमश्चोत्क्लेशोऽधिमहि ॥
उरोरुक्कसनादिजान्यन्यानि लिङ्गानि त्विह, स्युश्च फुफ्फुसकूजनं श्वासस्य तीव्रतया सह।
कर्करायनमथ घनत्वं फुफ्फुसे परिदृश्यते, रक्तनिष्ठीवनमिहेदं लक्ष्मजातं लक्ष्यते ॥ २४ ॥
वैद्यवर्यैरप्यसाध्योऽसौ सदा संभाषितः, कश्चिदेव हि दैवयोगाज्जीवतीह चिकित्सितः।
इत्थमत्र हि भेदयुक्तग्रन्थिकज्वरलक्षणं, सर्वमेव निरूपितं प्रविधाय शास्त्रनिरीक्षणम् ॥२५॥

फुफ्फुसप्लुष नामक ग्रन्थिक रोग में ग्रन्थियाँ नहीं बढ़ती हैं, कीटाणु या उनका विष श्वास-मार्ग से संक्रमण करता है। इसमें जाड़ा देकर दारुण रूप का ज्वर होता है और सिर में शूल, अङ्गमर्द, भ्रम, उत्क्लेश, छाती में दर्द, खाँसी आदि अन्य लक्षण भी होते हैं। फुफ्फुस का कूजन तथा श्वास की तीव्रता, फुफ्फुस में घनता तथा कर्करायन उत्पन्न हो जाता है एवं थूक के साथ रक्त निकलने लगता है। ये सब लक्षण इस रोग में प्रकट होते हैं। इसको वैद्यों ने असाध्य कहा है।

कोई-कोई रोगी उत्तम चिकित्सा होने से दैवात् बच भी जाता है। इस प्रकार से ग्रन्थिक ज्वर के तीनों भेदों के सम्पूर्ण लक्षण शास्त्रानुसार कहे गये हैं॥ २३–२५॥

ग्रन्थिकरोगस्योपद्रवाः—

कासोऽतिसारोऽप्यथ रक्तपित्तं मूत्रावरोधो वमनं तथैव।
उपद्रवा ग्रन्थिकनामकेऽस्मिन् ज्वरे त्वमी वैद्यजनैः प्रदिष्टाः॥ २६॥

कास, अतीसार, रक्तपित्त, मूत्र बन्द होना, वमन ये सब ग्रन्थिक ज्वर के उपद्रव वैद्यों ने कहा है॥ २६॥

ग्रन्थिकज्वरस्य साध्यलक्षणम्—

अनेका यदि ग्रन्थयः स्युः प्रजाता भवेदाशुपाकित्वमद्धाऽपि तासाम्।
अथो बालको वा जरन् ग्रन्थिकाख्यज्वरार्त्तस्तदा स्याद् गदोऽयं सुसाध्यः॥ २७॥

यदि ग्रन्थियाँ अनेक स्थानों पर हों या जल्दी पक जायें, किंवा बालक या वृद्ध में हुई हों तो ग्रन्थिक ज्वर सुसाध्य समझना चाहिये॥ २७॥

ग्रन्थिकज्वरस्यारिष्टलक्षणानि—

सर्वेन्द्रियाणां मनसोऽप्यशेषव्यापारनाशो यदि वाऽतिसारः।
अत्युल्वणः स्यात्तु तदा सुवैद्योऽरिष्टं वदेद् ग्रन्थिकपीडितस्य॥ २८॥
ष्ठीवेत् सुसिन्दूरसमोज्ज्वलं चेद् रक्तं कफेनानुगतं तु रोगी।
श्वासार्दितः फुफ्फुसदाहयुक्तस्तदाऽत्यसाध्यो नियतं स ना स्यात्॥ २९॥
अग्रन्थिके ग्रन्थिकयोग्यलिङ्गसमुद्भवः स्याद् यदि रोगमध्ये।
तदा तु तस्यान्तकसद्मयात्राऽवश्यं भवेदित्यपि वेदितव्यम्॥ ३०॥
ग्रन्थिकज्वरमिमं तु केचन प्रायशः सुभिषगादृता जनाः।
क्षुद्ररोगपठिताग्निरोहिणीनामकामयमुदाहरन्ति वै॥ ३१॥

सभी इन्द्रियों एवं मन के देखना, सुनना, विचारना आदि व्यापार नष्ट हो जायें, और अतिसार उग्ररूप से हो तो ग्रन्थिकज्वर रोगी का अरिष्ट होता है अर्थात् रोगी मर जाता है। यदि फुफ्फुस प्रदाही नामक ग्रन्थिक ज्वर में रोगी सिन्दूर के समान थूके और कफ के साथ रक्त आता हो तथा श्वास रोग उत्पन्न हो गया हो तो निश्चित असाध्य होता है। यदि अग्रन्थिक ग्रन्थिक ज्वर में ग्रन्थिक प्रकार के लक्षण प्रकट हो जायँ तो भी असाध्य समझना चाहिये, ऐसी स्थिति में रोगी अवश्य मर जाता है। इस ग्रन्थिक ज्वर को कोई वैद्य 'अग्निरोहिणी' मानकर उसी नाम से पुकारते हैं॥ २८–३१॥

विमर्श—ग्रन्थिक ज्वर और अग्निरोहिणी का विवेचन उत्तरार्ध पृष्ठ १९९ में देखें। भेलसंहिता में इससे बहुत कुछ मिलते हुए लक्षणों वाले 'वातालिका' नामक एक जनपदोद्ध्वंसक (Epidemic) रोग का वर्णन मिलता है। उसका मूषक के साथ सम्बन्ध, हेतु, लक्षण आदि वहीं देखें।

अथ वातश्लैष्मिकज्वरनिदानम्

तत्र वातश्लैष्मिकज्वरस्य परिचयः—

यतः श्लेष्मजोपद्रवाः प्रायशोऽत्रोद्भवन्ति त्रिदोषोत्थचिह्नैः सहाद्धा।
भवेन्मुख्यता मारुतस्य स्मृतोऽसौ ज्वरः श्लेष्मको देशविध्वंसकारी॥ १॥
अयमागन्तुकरोगः पूर्वं पश्चाद्विवर्द्धते दोषैः।
वातश्लेष्माधिक्याद् वातश्लैष्मिक उदीरितः क्वापि॥ २॥

वातश्लैष्मिक ज्वर (Influenza इन्फ्लुयेञ्जा) में प्रायः त्रिदोषज लक्षणों के साथ कफजन्य उपद्रव उत्पन्न होते हैं और वात की प्रधानता होती है। यह देश को विध्वंस करने वाला

संक्रामक रोग है। यह प्रथम आगन्तुक रूप में उत्पन्न होता है। पश्चात् इसमें दोषों का संबन्ध होता है। वात तथा श्लेष्मा की अधिकता होने से इसका नाम 'वातश्लैष्मिक' पड़ा है ॥ १-२ ॥

विमर्श—भेल संहिता में इसका वर्णन 'सामान्य प्रतिश्याय' नाम से जनपदोद्ध्वंसक रोगों में किया गया है। यथा—

'असात्म्यं गन्धमादाय वातो यत्राऽतिरिच्यते । तत्र मर्त्येषु सामान्यः प्रतिश्यायः प्रजायते ॥

वातश्लैष्मिकज्वरस्य भेदानाह—

साधारणश्वसनकान्त्रिकवातिकाख्यभेदाच्चतुर्विध उदीरित एष रोगः ॥ ३ ॥

इस रोग के ४ भेद होते हैं जिनमें प्रथम साधारण, द्वितीय श्वसनक, तृतीय आन्त्रिक और चतुर्थ वातिक होता है ॥ ३ ॥

तस्य निदानम्—

कीटाणवोऽस्य हि गदस्य मरुत्प्रवाह-विस्तारिता जगति मर्त्यसमूहमध्ये ।
श्वासायनेन लघुनृन्ननु संक्रमन्ते स्यादन्नमार्गत इमे क्वचनाशनाद्यात् ॥
एवं क्वचिच्च पटमाल्यमुखैः प्रकारैरेषां भवेदपि हि संक्रमणं कथंचिद् ॥ ४ ॥
पाश्चात्यवैद्यविसरैरणुवीक्षणेन यन्त्रेण चातिनिपुणं बहुशो निरीक्ष्य ।
निर्द्धारितं सततमस्य गदस्य कीटाणोर्दण्डवच्चियतरूपमतीव विज्ञैः ॥ ५ ॥
यदा श्वाससमार्गेण कीटाणवोऽस्य प्रवेशं प्रकुर्युस्तदा ते गलं च ।
प्रणालीं तु वायोः परं दूषयन्तो व्रजेयुर्ध्रुवं फुफ्फुसौ सर्वदैव ॥ ६ ॥
तथा येऽन्नमार्गेण दैवाद्विशेयुः समस्तं च ते सर्वथा तं रुजेयुः ।
क्वचिद्धातवो दूषितास्तैर्भवेयुस्ततो रोगमेनं समुत्पादयेयुः ॥ ७ ॥
ततो धातुजातं समस्तं विषाक्तं प्रकुर्वन्त एते नरान्मारयन्ति ।
मरुच्छ्लेष्ममुख्यं ज्वरं संनिपातं ससंप्राप्ति चेत्थं सुवैद्या वदन्ति ॥ ८ ॥

इस रोग के कीटाणु हवा से फैलकर जनसमुदाय में रोग पैदा करते हैं। ये कीटाणु श्वासमार्ग से, कभी-कभी भोजन आदि के साथ अन्नमार्ग से और कभी-कभी वस्त्र-माला आदि के द्वारा भी मनुष्यों में संक्रान्त होते हैं। पाश्चात्त्य चिकित्सकों ने अणुवीक्षण यन्त्र द्वारा भली भाँति निरीक्षण करके इस रोग के उत्पादक दण्डाकार जीवाणुओं का पता लगाया है। जो कीटाणु श्वासमार्ग से प्रवेश करते हैं वे गले और श्वासप्रणाली को अत्यन्त दूषित करते हुए फुफ्फुस में पहुँच जाते हैं और जो कीटाणु अन्न के साथ प्रविष्ट होते हैं सम्पूर्ण अन्नमार्ग को रुग्ण कर देते हैं और कभी-कभी समस्त धातुसमूह को विषाक्त करके मनुष्यों को मार डालते हैं ॥ ४-८ ॥

शिरःशूलमङ्गेषु मर्दोऽथ कम्पः कटीपृष्ठवक्षःस्थलेऽप्युग्रपीडा ।
प्रतिश्यायशैत्यावसादज्वराश्च गलैकग्रहोऽल्पैर्दिनैर्भूरि कार्श्यम् ॥ ९ ॥
बलस्यापि हानिर्भृशं नाडिकाया गतेर्नातिचाञ्चल्यमाभाति चात्र ।
समन्ताच्च रक्ताऽतिमालिन्ययुक्ता रसज्ञाऽपि चोच्छूनतामाश्रिताऽद्धा ॥ १० ॥
मरुच्छ्लैष्मिकस्य प्रभेदे तु साधारणे चिह्नमेतत् समस्तं मयेत्थम् ।
अभिज्ञैर्भिषग्भिर्यथैवोपदिष्टं तथैवात्र हृद्यैः स्वपद्यैः प्रदिष्टम् ॥ ११ ॥

शिर में शूल, अङ्गमर्द, कम्प, कटि, पृष्ठ तथा वक्षःस्थल में अत्युग्र पीड़ा, जुकाम, शीतबोध होना, अवसाद, ज्वर, गलग्रह, थोड़े ही दिनों में अत्यधिक कृशता, अत्यन्त बल की हानि, ज्वर की अपेक्षा नाड़ी की गति में चञ्चलता (तीव्रता) का अभाव, जीभ के चारों तरफ किनारों पर लालिमा, अधिक मलिनता तथा उच्छूनता (फुलाव) ये सब लक्षण वातश्लैष्मिक ज्वर के साधारण भेद में प्रकट होते हैं ॥ ९-११ ॥

तत्र श्वसनकस्य रूपम्—

भेदे तथा श्वसनके सकलैः पुरोक्तैः रूपैः सहोद्भवति तीव्रतमोऽपि कासः।
निष्ठीवनं कफविमिश्रितशोणितस्य श्वासप्रलापबहुशोणितवर्णताश्च ॥ १२ ॥
दशेयं ज्वरस्यास्य विश्वस्तवैद्यैः समस्तैर्भृशं दारुणोदीरिताऽपि।
अतः सावधानेन सर्वोत्तमेन चिकित्साप्रकारेण रक्ष्योऽत्र रोगी ॥ १३ ॥

इसमें पूर्वोक्त सभी लक्षणों के साथ-साथ अत्यन्त तीव्र कास, थूकने पर कफ के साथ निश्चित रक्त, श्वास, प्रलाप और शरीर का रक्तवर्ण होना ये लक्षण अधिक प्रकट होते हैं। यह दशा प्रामाणिक वैद्यों ने अत्यन्त दारुण बताई है। अतः इसमें अत्यन्त उत्तम चिकित्सा द्वारा रोगी की सावधानी से रक्षा करनी चाहिये ॥ १२–१३ ॥

आन्त्रिकस्य रूपम्—

भवेदुद्भवोऽथान्त्रिकाख्यप्रभेदे वमेर्वाऽतिसारस्य किंवा द्वयोश्च।
तथोत्क्लेशशूलामयौ कामलाऽपि क्वचिन्नूनमेवोद्भवेयुर्विशिष्य ॥ १४ ॥

वातश्लैष्मिक ज्वर के आन्त्रिक प्रकार में वमन वा अतीसार अथवा दोनों एक साथ, उत्क्लेश, शूल और कभी-कभी कामला आदि लक्षण विशेष रूप से प्रकट होते हैं ॥ १४ ॥

वातिकस्य रूपम्—

अथो वातिकाख्यप्रभेदे विशेषात् प्रतिश्यायकासज्वरक्षीणताश्च।
प्रलापो मनोऽस्थैर्यनिद्रा विनाशौ क्वचित् पक्षघातः प्रजायेत दैवात् ॥ १५ ॥
शीर्षावरणकदाहः कृतसंनाहः क्वचिच्चैव। अवलोक्यत इह साधारणचिह्नैर्युत आमयान्वितेषु ॥

वातश्लैष्मिक ज्वर के वातिक प्रकार में प्रतिश्याय (जुकाम), कास, ज्वर, क्षीणता, प्रलाप, मन की अस्थिरता, निद्रानाश और कहीं-कहीं पर पक्षाघात तथा कभी-कभी तीव्र शीर्षावरणप्रदाह भी होता है। इन सभी भेदों में साधारण वातश्लैष्मिक ज्वर के भी लक्षण रहते हैं ॥ १५–१६ ॥

वातश्लैष्मिकज्वरस्योपद्रवाः—

पक्षाभिघातो हृदयावसादः पुनः पुनश्चाक्रमणं गदस्य।
तथा प्रदाहो ननु फुस्फुसे स्युर्ज्ञेया इमे श्लेष्मकजा उपद्रवाः ॥ १७ ॥

पक्षाघात, हृदय में अवसाद और बारबार रोग का आक्रमण, फुफ्फुस में प्रदाह ये सब वातश्लैष्मिक ज्वर के उपद्रव रूप में होते हैं ॥ १७ ॥

अथ सन्धिकज्वरनिदानम्

तत्रादौ संधिकज्वरस्य परिचयः—

भवेज्ज्वरो यो व्रणशोथतुल्यैः शोथैर्भृशं सन्धिगणं प्रपीडयन्।
घोरोऽपि हृद्रोगयुतः स वैद्यैरुदीरितः सन्धिकनामकोऽत्र ॥ १ ॥

जिस ज्वर में व्रणशोथ के समान सन्धियों में शोथ और पीड़ा तथा हृद्रोग भी होता हो उसे सन्धिक ज्वर (Rheumatic fever रीयुमैटिक फीवर) कहते हैं ॥ १ ॥

तस्य संप्राप्तिः—

हेमन्तवर्षाशिशिरर्तुमध्ये तथा वसन्तेऽपि च शीतकाले।
क्लिन्नोष्णभूमिष्वविशङ्कमद्धाऽजस्रं जनानां भ्रमतामवश्यम् ॥ २ ॥
तथैव बाल्ये नवयौवनेऽपि प्रायेण जातेऽपचये बलस्य।
भवेज्ज्वरो योषिदपेक्षयाऽयं पुंसां च तत्रापि विशिष्य यूनाम् ॥ ३ ॥
लोके तु बिन्द्वाकृतिशालिनैजकीटाणुहेतोर्जननं सुसिद्धम्।
तथा गदस्यास्य हि सन्धिकाख्यज्वरेति नामापि सदा प्रसिद्धम् ॥ ४ ॥

हेमन्त, वर्षा, शिशिर तथा वसन्त और शीतकाल में एवं आर्द्र तथा उष्ण भूभागों में निःशङ्क होकर निरन्तर भ्रमण करने वालों को प्रायः बाल्य तथा युवावस्था में तथा बल के क्षीण होने पर यह ज्वर होता है। यह स्त्रियों की अपेक्षा पुरुषों को उसमें भी जवानों की विशेष रूप से होता है। इसके कीटाणु विन्दु में आकार के होते हैं। इस रोग का नाम 'सन्धिक ज्वर' है ॥ २-४ ॥

विमर्श—इस रोग के कारण के सम्बन्ध में विद्वानों में मतभेद है। कुछ लोग बिन्दुवत् माला-गोलाणु, कुछ एक प्रकार के युग्मगोलाणु, कुछ अनूर्जता और अधिकसंख्यक विद्वान् एक प्रकार के निस्यन्दनातीत विषाणु (Virus) को इस रोग का प्रधान कारण मानते हैं। प्राचीन आचार्यों ने आमदोषयुक्त वातज्वर या वातोल्बण त्रिदोष ज्वर में ही इसका समावेश किया है।

तस्य संप्राप्तेः सविस्तरमवतरणम्—

गदस्यास्य कीटाणवो दैवयोगाद्गलग्रन्थितो धातुमध्ये प्रविष्टाः।
ध्रुवं वातपित्तोल्बणं सन्निपातं शरीरे भृशं सर्वथोदीरयन्ति ॥ ५ ॥
ततोऽतिशोथं व्रणशोथतुल्यं कुर्वन्ति जान्वादिषु भूयशो नृणाम्।
विदन्ति चेत्थं भिषजस्तु केचन स्वबुद्धितः सन्धिकजातिरीदृशी ॥ ६ ॥
अथापरे तु ब्रुवते सुवैद्या इदं शृणुध्वं ननु वक्ष्यमाणम्।
विषं ही कीटाणुसमुत्थितं नृणां गलाच्छरीरस्थितधातुमध्ये ॥ ७ ॥
कृतप्रसारं किल वातपित्तोल्बणं त्रिदोषं समुदीरयत् सत्।
सुघोरमेव व्रणशोथतुल्यं करोति सन्धीन् परितः प्रसह्य ॥ ८ ॥
मतद्वयं संप्रति सन्धिकस्यागताविदं चेत्थमिह प्रदर्शितम्।
परन्तु तत्रादिमपक्षमुत्तमं समाश्रयन् वक्ष्यहमग्र एतद् ॥ ९ ॥
अथोपरिप्रोक्तनिमित्तजातैः सन्धौ प्रयाते बहुशूनतां च।
या श्लैष्मिकी सन्धिगता कला सा प्रजायत शोथयुताऽम्बुपूर्णा ॥ १० ॥
तद्धेतुतः स्यात्तरुणास्थिमूर्द्धसु तथाऽस्थिबन्धेष्वखिलेषु शोथः।
सन्धेरथाभ्यन्तर एधमानो विदह्यते पूर्णतया बलासः ॥ ११ ॥
विषप्रभावत्त्दपि शोणिताणवः क्षीणा भवन्तीह विशेषतस्तु।
न्यूनत्वमस्त्रस्य ततश्च हेतोः श्वेताणुवृन्दोपचयोऽधिकं स्यात् ॥ १२ ॥
हृदन्तिकस्थायिकलापुटेऽपां भवेद् भृशं सञ्चय एव शीघ्रम्।
तथा विकारा व्रणशोथजा हृदि कपाटमध्ये हृदयस्य वा स्युः ॥ १३ ॥
स्याच्छ्वासयन्त्रीयकलास्थशोथः सव्ये हि पार्श्वे बहुशो गदेऽस्मिन्।
लिङ्गैश्च कासश्वसनादिभिः सहाक्रान्तं भवेत्फुफ्फुसमप्यवश्यम् ॥ १४ ॥

इस रोग के कीटाणु गले की ग्रन्थियों द्वारा धातुओं में प्रविष्ट होकर वात-पित्तोल्बण संनिपात-ज्वर को शरीर में उत्पन्न करते हैं। उसके बाद रोगी की सन्धियों में घोर व्रणशोथ के समान शोथ उत्पन्न कर देते हैं। ऐसा कुछ वैद्य मानते हैं, और कोई २ यह मानते हैं कि कीटाणुओं का विष ही मनुष्यों के गले की ग्रन्थियों से धातुओं में फैलकर वातपित्तोल्बण संनिपात ज्वर को उत्पन्न करता हुआ सन्धियों विशेषतः जानु आदि में अत्यन्त घोर शोथ उत्पन्न करता है। यहाँ प्रथम मत का ही मुख्य रूप से आश्रय लेकर आगे वर्णन करता हूँ। जब उपर्युक्त कारणों से सन्धियों में अधिक शोथ हो जाने पर सन्धिस्थित श्लेष्मिक कला भी शोथ युक्त होकर जलपूर्ण हो जाती है तब उसके कारण तरुणास्थियों के शिरोभाग पर तथा अस्थियों के बन्धनों में भी शोथ हो जाता है और इसके बाद सन्धियों के भीतर वृद्धि को प्राप्त हुआ कफ पूर्ण रूप से विदग्ध हो जाता है तथा विष के प्रभाव से इस रोग में रक्तकण विशेष रूप से क्षीण हो जाते हैं और श्वेत कणों की अधिक वृद्धि हो

जाती है। हृदय के समीपस्थित कलापुट (हृदयावरण) में शीघ्रता से जल का संचय हो जाता है और हृदय या हृदय-कपाट के मध्य में व्रणशोथ से उत्पन्न होने वाले विकार उत्पन्न हो जाते हैं। इस रोग में वाम पार्श्व के फुफ्फुसावरण कला में शोथ हो जाता है और कास, श्वास आदि लक्षणों के साथ फुफ्फुस भी विष से आक्रान्त हो जाता है ॥ ५-१४ ॥

तस्य रूपम्—

गदे ज्वरः स्यात् सहसेह साधारणः स शीतेन निवर्द्धतेऽद्धा।
अथाङ्गमर्दोऽपि च कण्ठदाहो हृदि व्यथा स्वेदकृतं बहुत्वम् ॥ १५ ॥
ग्रीवास्तम्भोऽथो गलग्रन्थिमध्ये शूनत्वं स्यादल्पमूत्रत्वमेव।
गुल्फे किंवा जानुदेशे कफोण्यां नृणां प्रायेणैव बन्धे मणेर्वा ॥ १६ ॥
रक्तः शोथो रौद्रलिङ्गाभ्युपेतः स्पर्शं सोढुं चाक्षमोऽप्यत्र रोगी।
देहे पीडा दुःसहा सन्धयोऽन्ये पर्यायेणात्राभिभूयन्त एव ॥ १७ ॥
पूर्वप्रोक्तैर्लक्षणैः सार्द्धमस्मिन् रोगे वृद्धिर्जायते च ज्वरस्य।
आषट्सप्ताहं गदस्यास्य कालः प्रोक्तो वैद्यैः संप्रशाम्येत्तदन्ते ॥ १८ ॥

इस रोग में सहसा शीत के साथ साधारण ज्वर चढ़ जाता है और अङ्गमर्द, कण्ठ में दाह, हृदय में व्यथा, स्वेद की अधिकता, ग्रीवा में स्तब्धता, गलग्रन्थि में शोथ, एवं मूत्र की अल्पता होती है और रोगी के गुल्फ, जानु, कोहनी तथा कलाई में रक्तवर्ण का शोथ भयङ्कर लक्षणों के साथ उत्पन्न होता है जिससे सन्धियों को छूना भी रोगी सहन नहीं कर सकता है। देह में दुःसह पीडा होती है और पर्याय से अन्य सन्धियों में भी इसी भाँति रक्तवर्ण का शोथ हो जाया करता है और पूर्वोक्त लक्षणों के साथ २ इस रोग में ज्वर की वृद्धि हो जाती है। ६ ठें सप्ताह के अन्त में इस रोग की शान्ति हो जाती है ॥ १५-१८ ॥

तस्य साध्यासाध्यत्वम्—

यत्र त्रिदोषभवलक्षणमध्यगानां केषांचन क्वचन दर्शनमस्तु रोगे।
किंवा हृदामयसमुद्भव एव तत्र प्राणान्तकः स तु भवेदनुपक्रमाच्च ॥ १९ ॥

पूर्वोक्त सांनिपातिक ज्वरों के किसी एक के भी लक्षण का जिसमें दर्शन होता है किंवा हृद्रोग की उत्पत्ति होती है वह ज्वर उचित चिकित्सा न होने से असाध्य हो जाता है ॥ १९ ॥

विमर्श—यहाँ त्रिदोष ज्वर से विकृतिविषमसमवेत पूर्वोक्त उग्ररूप के त्रिदोष ज्वर का ग्रहण करना चाहिए क्योंकि यह रोग तो आरम्भ से ही त्रिदोषजनित होता है।

कथंचिज्ज्वरमुक्तावपि हृद्रोगित्वम्—

कीटाणुसंभवविषस्य तथा चिकित्सा नैपुण्यतो यदि हि संधिकरोगयुक्तः।
जीवेत्परं ननु चतुर्दशवासरेभ्यः किंवैकविंशतिदिनेभ्य इह स्वपुण्यैः ॥ २० ॥
तत्रापि रोगमुक्तः सन् हृदामययुतः पुमान्। भवेदेवेति विज्ञेयं वैद्यवर्यैरशान्तिमान् ॥ २१ ॥

कीटाणुजन्य विष की स्वल्पता से या उत्तम चिकित्सा द्वारा सन्धिक ज्वर से युक्त रोगी २-३ सप्ताह के बाद रोग से मुक्त होने पर भी हृद्रोग से युक्त हो जाता है ऐसा वैद्यों को जानना चाहिये ॥ २०-२१ ॥

हृद्रोगस्य परिणामः—

सर्वैर्हृदामयसमागतदुःखजातं प्रायोऽनुभूयत इह प्रसभं मनुष्यैः।
शोथश्रमश्वसनकादिभिरर्द्यमानैस्त्यज्यन्त आशु किल तैरसवो विशेषात् ॥ २२ ॥

सन्धिक के प्रायः सभी रोगी हृद्रोगसंबन्धी दुःख का अनुभव करते हैं और शोथ, श्रम, श्वास आदि से पीड़ित होते हुए अन्त में प्राण त्याग देते हैं ॥ २२ ॥

अत्र वैशिष्ट्यम्—

प्रायो ज्वरे भवति सन्धिकनामकेऽस्मिन् यूनां तु सन्धिषु विशिष्य विकारवृन्दम् ।
तद्वन्नृणां हि हृदि बाल्यवयःस्थितानां वैशिष्ट्यमित्यपि विबोध्यमुदारवैद्यैः ॥ २३ ॥

प्रायः करके सन्धिक नामक ज्वर में युवा पुरुषों की सन्धियों में और बालकों के हृदय में विशेष रूप से विकार उत्पन्न होते हैं ॥ २३ ॥

सन्धिकज्वरस्योपद्रवाः—

शोथाः सदा हृदयफुफ्फुसशीर्षकण्ठमध्यस्थिता अथ च तीव्रतरो ज्वरोऽपि ।
नूनं निदानविधिविज्ञवरैः सुवैद्यैः ख्याता उपद्रवतयेति गदा इहैव ॥ २४ ॥

हृदय, फुफ्फुस, सिर और कण्ठ में शोथ तथा तीव्रतम ज्वर इस ज्वर के उपद्रव-स्वरूप होते हैं ॥ २४ ॥

विमर्श—सन्धिक-ज्वर का ही दूसरा नाम 'आमवातिक' है। पूर्वार्ध पृ. ४०९ से ४११ तक भी देखें।

अथ श्वसनकज्वरनिदानम्

तस्य परिचयः—

लाक्षारसप्रतिमरक्तयुतं कफं यः ष्ठीवेज्ज्वरेण बहुशः श्वसनेन युक्तः ।
स्त्यानो भवेदपि च कश्चन फुफ्फुसीयो भागस्तु यस्य कथितः श्वसनज्वरी सः ॥ १ ॥

जो रोगी लाक्षारस के समान रक्त-मिश्रित कफ निरन्तर थूकता हो, ज्वर के साथ-साथ श्वास से युक्त हो और जिसके फुफ्फुस का कोई भाग घन हो उसे श्वसनक ज्वर (Pneumonia न्यूमोनिया) युक्त समझना चाहिये ॥ १ ॥

तस्य निदानम्—

ये चान्नवस्त्ररहिता अपि दुर्बलाः स्युः श्रान्ताश्च दुःखितहृदो मनुजास्तु दीनाः ।
ये चाप्यजीर्णगदिनो बहुमद्यपा वा वृक्कस्य चापि यकृतो ननु शोथिनो वा ॥ २ ॥
मिथ्याऽऽहारान् वा विहारानजस्रं ये वा कुर्युर्नूनमेव प्रमादात् ।
तेषां प्रायः शीतवर्षाऽऽदिबाधाहेतोः किंवा पूतिगन्धैकयोगात् ॥ ३ ॥
किंवाऽभीघातात् क्वचिद्व्याधिनाऽनेनार्त्तस्यापि प्रत्यहं संगमाद्वा ।
सर्वेष्वेवर्त्तुष्वसावुद्भवेच्च प्रायः काले शैशिरे वा वसन्ते ॥ ४ ॥
किंवा वर्षासु ज्वरः प्रोक्तलिङ्गो वैद्यैः प्रोक्तं नाम कीटाणवोऽस्य ।
नूनं मूलं जन्मनो नैकरूपा ज्ञेयाश्चत्वारस्तु तत्र प्रधानम् ॥ ५ ॥
तत्राभिज्ञैर्दारुणास्तु त्रयोऽथो तेष्वप्यन्त्यो दारुणोऽत्यर्थमुक्तः ।
इत्थं सर्वं प्राच्यपाश्चात्यरीत्या सम्यङ् निर्दिष्टं निदानं किलास्य ॥ ६ ॥

अन्न-वस्त्र से रहित, दुर्बल, थके हुये, दुःखित हृदय एवं दीन, अजीर्ण के रोगी, बहुत मद्य पीने वाले या वृक्क अथवा यकृत् में शोथयुक्त व्यक्ति, या प्रमादवश जो नित्य मिथ्या आहार-विहार करते हैं, उन लोगों को प्रायः शीत तथा वर्ण आदि से पीड़ित होने से किंवा पूतिगन्ध के सूँघने से या चोट लगने से अथवा क्वचित् श्वसनक रोगी का संसर्ग होने से सभी ऋतुओं में यह ज्वर उत्पन्न हो जाता है। यह रोग प्रायः करके शिशिर, वसन्त या वर्षा ऋतु में अधिकतर होता है। इस ज्वर के प्रधान कारण (जुर्म) कीटाणु ही हैं जो बहुत प्रकार के होते हैं। उनके अभिज्ञों ने प्रधानरूप से ४ प्रकार कहे हैं। उनमें प्रथम तीन दारुण और चौथा अत्यन्त दारुण होता है ॥ २-६ ॥

तस्य भेदौ—

द्विविधः श्वसनकसंज्ञो गदितो वैद्यैर्ज्वरस्तत्र।
खण्डीयस्तु प्रथमस्तथा द्वितीयः प्रणालिकः प्रोक्तः ॥ ७ ॥
अत्रैतच्च ज्ञेयं द्वावपि फुफ्फुसप्रदाहसंयुक्तौ।
तत्रादिमस्य भेदा विज्ञैः पञ्चैव संप्रोक्ताः ॥ ८ ॥
तत्र प्रथमः साधारण उत्क्रामकसंज्ञको द्वितीयः।
अपि केन्द्रिकस्तृतीयस्तदनु चतुर्थो बृहन्नामा ॥ ९ ॥

फुफ्फुसावरणप्रदाहः पञ्चमः परिभाषितः, स्युः प्रभेदा आदिमस्यापि प्रबोध्या बुद्धितः।
तदनु द्वितीयस्यापि भेदौ मुख्यगौणविभेदतः कथ्यते तेपामथो जातिश्च रूपमशेषतः ॥१०॥

श्वसनक ज्वर के दो भेद हैं, 'खण्डीय' और 'प्रणालिक'। इन दोनों में फुफ्फुसप्रदाह होता है। 'खण्डीय' के भी ५ भेद होते हैं। प्रथम 'साधारण' द्वितीय 'उत्क्रामक', तृतीय 'केन्द्रिक', चतुर्थ बृहत् और पञ्चम फुफ्फुसावरणप्रदाह-संज्ञक कहा गया है। 'प्रणालिक' के भी दो भेद होते हैं। 'मुख्य' और 'गौण'। उन सबों की संप्राप्ति तथा लक्षण का वर्णन पूर्णरूप से नीचे किया जा रहा है ॥ ७–१० ॥

तस्य संप्राप्तेरवतरणम्—

आस्यतो गलतोऽणवोऽस्य श्वासपथतो रोगदाः, फुफ्फुसस्यान्तःप्रकोष्ठेषूपयाता वै यदा।
वातप्रणालीष्वपि विपस्य प्रभावमापाद्य हि तदा, शोणिते विदधति घनत्वं सर्वदा ते दुःखदाः॥
शोणिते घनतामिते वामेऽथवा वामेतरे, फुफ्फुसे किंवा द्वयोरपि जायते शोथो ज्वरे।
वक्ष्यते संप्रति विशेषश्चात्र शृणु यदि कोष्ठगः, शोथ आख्यातस्तदा खण्डीयनामविभेदगः ॥
वातप्रणालीगामिशोथश्चेत्ततः स प्रणालिकः, कथ्यते फुफ्फुसप्रदाहः सद्भिरत्र श्वसनकः।
ज्वरः पीडाश्वासकृच्छ्त्वं च तत्र तु जायते, नूनमुभयोरपि भिषग्भिश्चेति नियतं कथ्यते ॥

जब रोगी के मुख, गले तथा श्वासमार्ग से इस रोग के उत्पादक जीवाणु फुफ्फुस के अन्तःप्रकोष्ठ में अथवा वायु की सूक्ष्म प्रणालियों में प्राप्त होते हैं तब विषैले प्रभाव को उत्पन्न करके रक्त (रक्तजनित फुफ्फुसगत स्राव) को गाढ़ा बना देते हैं, रोगी के बायें या दाहिने किंवा दोनों फुफ्फुसों में शोथ उत्पन्न हो जाता है। यदि इस ज्वर में कोष्ठों (वायुकोषों) में शोथ हो तो 'खण्डीय' फुफ्फुसप्रदाह (Lobar pneumonia) और वायु प्रणालियों में शोथ हो तो 'प्रणालिक' फुफ्फुसप्रदाह (Broncho pneumonia) समझना चाहिये। इन दोनों प्रकार के श्वसनक ज्वरों में ज्वर, पीडा और श्वास में कृच्छ्रता उत्पन्न होती है ॥ ११–१३ ॥

श्वसनकज्वरस्य पूर्वरूपम्—

प्रायो ज्वरे श्वसनके ननु पार्श्वपीडा श्वासोऽवसादकसने अपि कम्पनं च।
संदृश्यमानमितिलक्षणमग्ररूपं सर्वे गदन्ति भिषजो गदरूपविज्ञाः ॥ १४ ॥

प्रायः करके श्वसनक ज्वर की पूर्वरूपावस्था में पार्श्वों में पीड़ा, श्वास, अवसाद, खांसी और कम्प ये लक्षण होते हैं ॥ १४ ॥

श्वसनकज्वरस्य स्वरूपम्—

ज्वरोऽतितीव्रः सहसैव शीतेन संप्रवर्त्तेत ततोऽतितृष्णा।
अन्नारुचिः श्वाससमृद्धिरेधेत पार्श्वशूलं कसनं क्रमेण ॥ १५ ॥

---

१. Types of pneumonia (1) Lobar pneumonia (a) Apical (b) Creeping (c) Central (b) Double (e) Massive. (2) Broncho-pneumonia (a) Primary (b) Secondary.

लाक्षारसाभं रुधिरं तु सान्द्रं कासात्प्रवर्त्तेत मुहुः कफाढ्यम् ।
श्वासेन संस्फूर्जत एव नासापुटौ सदा श्वासगतिस्तु तीव्रा ॥ १६ ॥
कपोलभागेऽपि च रक्तिमा स्यात्स्वेदो ललाटे परिदृश्यतेऽद्धा ।
स्विन्नानि गात्राणि भृशं भवेयुर्निरन्तरं दुर्वलता प्रमोहः ॥ १७ ॥
सिद्धार्थकाभाः पिडकास्तनौ संदृश्यन्त एवापि च कण्ठकूजनम् ।
सादः प्रलापः परुषाऽपि जिह्वा कार्कश्ययुक्ता मलिना भृशं च ॥ १८ ॥
द्वैगुण्यमद्धाऽऽश्रयते गतौ तु स्यात् कोमला स्थूलचला च नाडी ।
यावज्ज्वरं भाति दशेयमस्या ज्वरादिमुक्तावपि दुर्वलत्वम् ॥ १९ ॥
प्रायेण सा संभजते मृदुत्वं विनिश्चितं चेति विशेषतोऽत्र ॥ २० ॥
संख्या न चास्या परिगण्यते गतेररिष्टकाले किल केनचित् क्वचित् ।
तान्येव लिङ्गानि भवन्ति प्रायः प्रणालिकेत्याह्वयभेदमध्ये ॥ २१ ॥

शीत लग कर सहसा अत्यन्त तीव्र ज्वर होना, अत्यन्त प्यास लगना, अन्न में अरुचि, श्वास की अधिक वृद्धि, पार्श्वशूल, खाँसी, खाँसी आने पर कफ से लिपटा हुआ लाक्षा रस के समान गाढ़ा रक्त निकलना, श्वास-वेग से नासापुट सदा फूलते रहना, और श्वास की गति तीव्र होना, कपोल भाग पर रक्तिमा, ललाट पर स्वेद आना, सारा शरीर सर्वदा गीला सा रहना, दुर्वलता, प्रमोह, शरीर में सफेद सरसो की बरावर पिडिकायें, कण्ठ में कूजन, अवसाद, प्रलाप, जिह्वा कर्कशता से युक्त अत्यन्त मलिन और नाड़ी की गति (अनुपात में श्वास से) दुगुनी, कोमल, स्थूल (भरी हुई) एवं चञ्चल होती है। जव तक ज्वर रहता है तव तक उक्त दशा बनी रहती है और ज्वर के छूट जाने पर भी नाड़ी में दुर्वलता तथा मृदुता वनी रहती है और विशेषतः अरिष्टकाल में नाड़ी की गति इतनी तीव्र हो जाती है कि गिनी नहीं जा सकती। प्रायः करके ये ही लक्षण प्रणालिक फुफ्फुसावरण प्रदाह में भी पाये जाते हैं ॥ १५–२१ ॥

धातुमलपाकानुसारं तीव्रातीव्रलक्षणानुसारं वाऽस्य मुक्तिः—

सप्तमे दिवसेऽष्टमे वा प्रायशो नवमे क्वचिद् दृश्यते दशमेऽत्र सहसा ज्वरविमुक्तिःकुत्रचित्।
रोगिणो देहे तदैव स्वेदनिचयस्योद्गमः स्याच्च तेन हि रोगमुक्तिर्जातु वाऽसुविनिर्गमः ॥२२॥

सातवें, आठवें, नवें या दशवें दिन सहसा ज्वर की विमुक्ति (उतर जाना) हो जाती है। उस समय रोगी के शरीर से अत्यधिक स्वेद निकलता है जिससे योग्य चिकित्सा होने पर ही रोगी बच पाता है अन्यथा मर जाता है ॥ २२ ॥

श्वसनकज्वरस्य साध्यासाध्यत्वम्—

एकस्मिन्नधिफुफ्फुसं विधिवशाद् दुष्टे च मन्दे ज्वरे
देहे साधुतया स्थिते ननु बले पादत्रयेऽप्युत्तमे ।
ज्ञातव्या सुखसाध्यता श्वसनकेनार्त्तस्य नुः सर्वदा
स्वेदो यद्यधिको ज्वरोऽपि च भवेत्तीव्रोऽथ वृद्धो गदी ॥ २३ ॥
किंवा क्षीणतमस्तदा तु भिषजि द्रव्येऽथ भृत्ये शुभे
शास्त्रप्रोक्तगुणान्विते सति कथंचिद्दैवयोगात् क्वचित् ।
जीवेत् कश्चिदिहामयाविषु नरः सत्पुण्यपुञ्जान्वितः
प्रायेणान्तकमन्दिरान्तिकगतिं प्राप्नोति चात्रान्यथा ॥ २४ ॥

दैवात् एक ही फुफ्फुस के दूषित होने पर तथा ज्वर की मन्दता एवं बल की स्थिरता तथा औषध, उपचारक और वैद्य इन तीनों की उत्तमता रहने पर इस रोग को सुखसाध्य समझना चाहिये। यदि स्वेद अधिक हो और ज्वर अधिक तीव्र हो, रोगी वृद्ध किंवा अत्यन्त क्षीण हो तो

उपर्युक्त चिकित्सा के साधन रहने पर भी दैवयोग से कदाचित् कोई पुण्यात्मा रोगी बच जाता है अन्यथा प्रायः करके मर ही जाता है ॥ २३–२४ ॥

श्वसनकज्वरस्यारिष्टानि—

यस्याक्रान्तौ फुफ्फुसौ स्तः कदाचित् किंवाऽप्येकः फुफ्फुसोऽशेषतः स्यात्।
नासामध्ये श्वासशब्दो विशेषः स्वेदोऽत्यर्थं जीवने तस्य शङ्का ॥ २५ ॥
स्वेदस्नातो यः प्रलापेन मन्देनोपेतः सन् पूरुषः प्रायशः स्यात्।
वेपेते वा यस्य हस्तौ च पादौ नूनं प्राप्नोत्यत्र मृत्युं स रोगी ॥ २६ ॥
यो दुर्वारेणातिसारेण पूर्णमाक्रान्तः सन् क्षीण एवाधिकः स्यात्।
कीनाशागारं यियासुं नरं तं विद्याद्वैद्यः स्वल्पकालादवश्यम् ॥ २७ ॥

जिसके दोनों फुफ्फुस किंवा एक ही फुफ्फुस पूर्णतया आक्रान्त हों और नासा में विशेषरूप से श्वास का शब्द हो एवं अत्यन्त स्वेद निकलता हो तो उसके जीवन में आशंका हो जाती है। जिसका शरीर पसीने से नहाया हुआ तथा मन्द प्रलाप से युक्त हो और हाथ-पैर कांपता हो वह अवश्य मर जाता है। जो दुःसाध्य अतीसार से पूर्णतया आक्रान्त हो और अधिक क्षीण हो गया हो उसे थोड़े ही काल में मर जाने वाला समझना चाहिये ॥ २५–२७ ॥

श्वसनकज्वरस्योपद्रवाः—

निद्रानाशोऽपि प्रलापोऽथ कम्पस्तीव्रस्तापोऽत्यर्थमेवातुरस्य।
संज्ञाहानिः कार्यरोधो हृदोऽस्मिन्ज्ञेया एते सर्वदोपद्रवा वै ॥ २८ ॥

निद्रानाश, प्रलाप, कम्प, तीव्र ताप, संज्ञानाश, हृदय के कार्य का अवरोध हो जाना ये सब श्वसनक ज्वर के उपद्रव समझने चाहिये ॥ २८ ॥

विमर्श—इस रोग के उपद्रवस्वरूप फुफ्फुसावरण शोथ, पूयोरस्कता (Empyema) फुफ्फुसगत विद्रधि या कोथ (Abscessor Gangrene) भी हो सकते हैं।

अथ क्लोमरोगनिदानम्[1]

तत्रादौ क्लोमस्वरूपम्—

अग्न्याशयः संप्रति यः स वैद्यैः क्लोमेतिनाम्नाऽऽधुनिकैर्निगद्यते।
कुत्रास्ति प्राचीनभिषक्प्रदिष्टं क्लोमेति नाद्याप्यवधारितं हि ॥ १ ॥
निरूप्यतेऽद्धाऽऽधुनिकानुसारि क्लोमस्वरूपं सविशेषरूपम्।
भागे तु दक्षे हृदयादधः स्यात् क्लोम्नो निवासो विदुषां मतेन ॥ २ ॥
इदं तु नूनं सलिलप्रवाहि सिरैकमूलं लपितं विशेषात्।
तृष्णासमुत्पादनशालि चायुर्वेदज्ञवृन्दैर्बहुशो निरीक्ष्य ॥ ३ ॥

आज कल जिसे वैद्य लोग अग्न्याशय कहते हैं उसी को आधुनिक चिकित्सक 'क्लोम' (Pancreas) नाम से पुकारते हैं। प्राचीन वैद्यों द्वारा बताया हुआ 'क्लोम' कहाँ पर है इसका निर्णय अभीतक नहीं हो पाया है अतः आधुनिक मतानुसार वर्णित 'क्लोम' का विशेष रूप से विवेचन करते हैं। दक्षिण भाग में हृदय के नीचे 'क्लोम' का निवास है। इसे जलवाही सिरा का प्रधान मूल कहा गया है। क्योंकि यह पिपासा को उत्पन्न करने वाला है ऐसा आयुर्वेदज्ञजनों का निरीक्षण पूर्वक कथन है ॥ १–३ ॥

क्लोमरोगनिदानम्—

क्लोम्नोऽभिवृद्धिर्मृदुताऽथवाऽन्नैः स्निग्धैर्भृशं वा गुरुभिः सुसेवितैः।

---

१. Diseases of pancreas.

किंवाऽभिघातादिभिरेव नूनं संजायते मानवदेहमध्ये ॥ ४ ॥
किंचापि संघात इहास्रजातः प्रदृश्यते विद्रधिराश्ववश्यम् ।
एवंविधा नैकविधास्तथाऽन्ये रोगा भवेयुर्भृशदारुणाश्च ॥ ५ ॥

क्लोम की अभिवृद्धि वा मृदुता–अधिक स्निग्ध एवं गुरु पदार्थों के सेवन से किंवा चोट लगने से हो जाती है कभी कभी इसमें गाढा रक्त जम जाता है, या विद्रधि हो जाती है और इसी प्रकार के अन्यान्य अत्यन्त दारुण रोग भी उत्पन्न हो जाते हैं ॥ ४–५ ॥

क्लोमरोगलक्षणम्—

अग्नेर्मान्द्यं पाण्डुता चापि कार्श्यं भ्रान्तिः सादः स्यादथोर्ध्वोदरे तु ।
औष्ण्यं काठिन्यं तथोत्क्लेशवान्ती क्लोमस्थायिन्यामये कामलाऽपि ॥ ६ ॥
प्रजाते विकारे सदा विद्रधेस्तु भवेदत्र शूलं तथाऽऽध्मानमेव ।
तृषा चाधिकाऽप्यश्मरीतुल्यरूपाऽतिघोरा शिला कष्टदायिन्यवश्यम् ॥ ७ ॥

क्लोम रोग में अग्नि की मन्दता, पाण्डुता, कृशता, भ्रान्ति, अवसाद, उदर के ऊर्ध्वभाग में उष्णता तथा कठिनता की प्रतीति उत्क्लेश, वमन और कामला हो जाती है विद्रधि हो जाने पर शूल, आध्मान, एवं अधिक प्यास ये लक्षण होते हैं तथा अश्मरी होने पर अन्य अश्मरियों के समान घोर कष्ट होता है ॥ ६–७ ॥

विमर्श—क्लोम का विवेचन पूर्वार्ध पृष्ठ ३२० में देखें।

अथौपसर्गिकविसूचीनिदानम्[1]

तस्याः परिचयः—

अयं लोकमध्ये तु मारीस्वरूपेण सर्वत्र रोगः प्रसारं व्रजेद्धि ।
प्रदृश्येत संक्रामकश्चाथ च त्वतिसारो वमर्नूनमत्यर्थमेव ॥ १ ॥

यह रोग लोक में महामारी के रूप में फैलता है और संक्रामक होता है। इसमें अतीसार और वमन अधिक रूप से होता है ॥ १–२ ॥

विमर्श—इस रोग का विशद वर्णन पूर्वार्ध के पृष्ठ ३०९–३११ पर भी देखें।

अस्य निदानम्—

दण्डाकारास्त्वस्य कीटाणवः संप्रोक्ता नूनं मूलभूता भिषग्भिः ।
तेषां वासः प्रायशो रोगिणां स्यादन्त्रे मूत्रे वा मले भाग्यदोषात् ॥ ३ ॥
अधिपित्ताशयमथवोदरककलायां कदाचिदखिलासु ।
उद्भूतासु लसीकोत्पादनकुशलासु हि ग्रन्थिषु ॥ ४ ॥
प्रसरन्त्यस्य गदस्य हि कीटाणव आन्त्रिकज्वरवत् ।
यान्ति विशेषाद् ग्रीष्मे प्रावृषि पयसाऽपि ते प्रसारमत्र ॥ ५ ॥
इत्थं चायं रोगो वस्त्रैर्भोज्यैर्विशेषतो मलिनैः ।
वस्तुभिरथ च स्थानैर्नूनं यायाद्धि संक्रमणम् ॥ ६ ॥

इसके रोगोत्पादक कीटाणु दण्डाकार होते हैं। कीटाणुओं का निवास प्रायः रोगी के अन्त्र, मूत्र तथा मल में होता है। कभी-कभी पित्ताशय अथवा उदरकला में होने वाली लसीकोत्पादक ग्रन्थियों में भी होता है। इस रोग के कीटाणु आन्त्रिक ज्वर के जीवाणु की भांति फैलते हैं और ग्रीष्म तथा प्रावृट् ऋतुओं में एवं जल के द्वारा विशेषतः इनका प्रसार होता है। इस प्रकार से यह रोग, वस्त्र, भोज्य पदार्थ, विशेषतः मलिन वस्तु तथा स्थान के द्वारा संक्रमण करता है ॥ ३–६ ॥

---

१. Cholera.

तस्य संप्राप्तेरवतारः—

कीटाणवस्त्वन्नपथेन गत्वा क्षुद्रान्त्रमध्ये समनुप्रविष्टाः।
चेत्तत्र वृद्धिं बहुशो ह्यवाप्य प्रसारयेयुर्विषमस्रमध्ये ॥ ६ ॥
तदा प्रजायेत विसूचिकेयं भिषग्वरैरित्थमिहोपदिष्टम्।
केचित्तु वैद्या गदहेतुविज्ञा वदन्ति यत्त्वत्र शृणुष्व तत्त्वम् ॥ ७ ॥
क्षुद्रान्त्रमध्येऽनिशमेव तिष्ठद्विषं विसूचीं जनयत्यवश्यम्।
इत्थं विसूच्या भवतीह जन्मोपसर्गजाया अतिदुःखदायाः ॥ ८ ॥
क्षुद्रान्त्रमध्ये तु ततः स्थितासु ग्रन्थिष्वपि स्यान्ननु शोथजन्म।
किञ्चोदरस्थायिकुलालसीका-ग्रन्थिष्ववश्यं हि भवेत्तदैव ॥ ९ ॥
ततो वमेरप्यतिसारतः स्याद्विनिर्गमो वै तरलस्य तेन।
घनत्वमात्यन्तिकमस्रमध्ये जायेत रोगेऽत्र विसूच्यभिख्ये ॥ १० ॥
ततो निमित्तेन तदा त्वनेन विषप्रभावादपि वृक्कयुग्मे।
मूत्रस्य निर्माणविधेर्निरोधः संजायते रोगिजनेष्वजस्रम् ॥ ११ ॥
मूत्रप्रवृत्तिस्तत एव नात्र संदृश्यते जातुचिदामयेऽद्धा।
अन्तस्तु तापोऽथ बहिर्हि शैत्यं न्यूनत्वतः स्यात्तरलास्त्रयोश्च ॥ १२ ॥

इसके कीटाणु अन्न मार्ग से क्षुद्रान्त्र में प्रविष्ट होकर जब रक्त में विष फैलाते हैं तब विसूचिका होती है। यहाँ किसी का मत है कि क्षुद्रान्त्र में निरन्तर स्थित विष ही विसूची को पैदा करता है और वह औपसर्गिक विसूची अन्यत दुःखप्रद होती है। रोगी के क्षुद्रान्त्र में स्थित ग्रन्थियों में भी शोथ हो जाता है और वमन तथा अतिसार से तरल भाग के निकल जाने से रक्त अत्यन्त गाढ़ा हो जाता है। इसी कारण से तथा विष के प्रभाव से दोनों वृक्कों में मूत्र के निर्माण-विधि का अवरोध होने पर रोगियों को मूत्रस्राव होना बन्द हो जाता है। इससे भीतर ताप और बाहर शीत रहता है। यह सब तरल तथा रक्त की कमी हो जाने से होता है ॥ ६–१२ ॥

विसूच्याः पूर्वरूपम्—

आदौ नाशश्चेत्क्षुधायास्तु तृष्णाऽऽधिक्यं हृल्लासो बलस्यापि हानिः।
ओजोनाशश्चारतिः स्यात्तदा तु ज्ञेयं नूनं पूर्वरूपं विसूच्याः ॥ १३ ॥

आरम्भ में बुभुक्षा का नाश, तृष्णा की अधिकता, हृल्लास, बल की हानि, ओजोनाश, अरति ये सब लक्षण विसूचिका होने के पूर्व प्रकट होते हैं ॥ १३ ॥

विसूच्या रूपम्—

क्वचिच्चातिसारो वमिः स्याद् गदेऽस्मिन् क्वचित् केवला वा वमिर्दृश्यतेऽपि।
तथाऽन्यत्र सामान्यमुक्तं विसूच्याः समस्तं बुधैर्लक्षणं ज्ञेयमत्र ॥ १४ ॥
स्वरूपं च साध्यस्य किंवाऽप्यसाध्यस्य बोध्यं बुधैर्दोषजाया विसूच्याः।
यथा भाषितं वैद्यवर्यैस्तथैवोपसर्गोद्भवायाश्च कृत्स्नं विशेषात् ॥ १५ ॥
गदे दारुणे चेदृशे तु प्रजाते म्रियन्ते नरा रोगिणोऽद्धाऽप्यसंख्याः।
अनुग्रेऽपि रूपे क्वचिद् यान्ति भीत्या गदे पञ्चतामत्र नूनं मनुष्याः ॥ १६ ॥

इसमें कभी पतला दस्त और वमन और कभी केवल वमन होता है। दोषज विसूची के साध्यासाध्यता आदि के जो-जो लक्षण, अन्यत्र कहे हुए हैं वे सभी इस औपसर्गिक विसूची में भी होते हैं। इस भयङ्कर औपसर्गिक विसूची के महामारी रूप में होने पर असंख्य रोगी मर जाते हैं। इसकी अनुग्रावस्था में भी आतङ्कवश भयभीत होकर अनेक रोगी मर जाते हैं ॥ १४–१६ ॥

विमर्श—दोषजा विसूची के लक्षण आदि पूर्वार्ध पृष्ठ ३०८-३१७ में देखें।

उपसर्गजविसूचिकायाः पूर्वावस्था—

हृच्छूलमादौ तु भवेद्गदेऽस्मिंस्ततो वमिश्चाप्यतिसार एव।
तत्रापि पूर्वं सरणं मलस्य भुक्तस्य च च्छर्दनतस्तथैव॥ १७॥
तत्पश्चादतिसारस्याथ वमेः स्याच्च पीतवर्णत्वम्।
तदनु तयोरपि तण्डुलजलसन्निभता भिषग्भिरिह कथिता॥ १८॥

प्रथमावस्था में हृदय में शूल उसके बाद वमन तत्पश्चात् अतीसार, जिसमें पहिले मल का अतिसरण और खाये हुए अन्न का वमन होता है। उसके बाद अतीसार तथा वमन का रंग पीला और बाद में दोनों का रंग चावल के धोवन की भाँति हो जाता है॥ १७-१८॥

द्वितीयावस्था—

चिह्नानि यानीह पुरोदितानि भवेयुरद्धा द्विगुणानि तानि।
आक्षेपतृष्णाऽरतयश्च तीव्रा भुक्तं तथाऽन्नं न पचेच्च किञ्चित्॥ १९॥

जो चिह्न प्रथमावस्था के कहे हुए हैं वे ही द्वितीयावस्था में द्विगुणित प्रकट होते हैं और आक्षेप, प्यास तथा अरति ये सब तीव्र रूप से प्रकट होते हैं। खाया हुआ कुछ भी नहीं पचता॥ १९॥

तृतीयावस्था—

द्रवातिसाराद् बहुशोऽत्र रक्तं गाढं भवेद् देहभवं तु नूनम्।
क्षीणेन्द्रियः क्षीणतनुप्रभोऽतिदीनो नरो हीनबलः सदैव॥ २०॥
स्याच्छीतदेहोऽपि च नेत्रमन्तर्गतं स्थिरं तस्य च शीर्णवाक्त्वम्।
नीलौष्ठताऽन्यैरपि घोररूपैश्चिह्नैर्युतस्त्वं यमसद्मपान्थता॥ २१॥

द्रव भाग अधिक निकल जाने से तृतीयावस्था में रक्त गाढ़ा हो जाता है और रोगी क्षीणेन्द्रिय तथा क्षीणकान्ति वाला, दीन तथा हीनबल वाला हो जाता है। शरीर ठण्ढा पड़ जाता है। नेत्र भीतर धँस कर स्थिर हो जाते हैं। वाणी में लड़खड़ाहट आ जाती है और ओठ नीले पड़ जाते हैं इस प्रकार अन्यान्य भी भयङ्कर चिह्नों से युक्त होकर रोगी मर जाता है॥ २०-२१॥

विमर्श—इसके असाध्यता-निदर्शक लक्षण दोषजा विसूची के समान ही होते हैं। (देखें पूर्वार्ध पृष्ठ ३१५, ३१६)।

तुर्यावस्था—

यदाऽन्तकग्रासविमुक्तदेहो व्रजेदवस्थां तु गदी तुरीयाम्।
तदाऽस्य पूर्वोक्तसमस्तलिङ्गानि वैपरीत्यं नितरामिहेयुः॥ २२॥
यदा जातुचिद् रोगिदेहे ज्वरः स्यात् तथा च प्रवर्त्तेत मूत्रं हि सम्यक्।
स्थिरत्वं प्रयायाच्च नाडी तदा तूपसर्गप्रजाता विसूचीह साध्या॥ २३॥

जब रोगी इस रोग रूप यमराज के मुख (मृत्यु) से बच जाता है तब चौथी अवस्था उत्पन्न होती है। उस समय पूर्वोक्त लक्षणों के विपरीत लक्षण प्रकट होते हैं अर्थात् वमन आदि शान्त होने लगते हैं। ज्वर हो जाता है, मूत्र की भलीभाँति प्रवृत्ति होने लगते हैं और नाड़ी स्थिरता को प्राप्त हो जाती है और इन लक्षणों को देख कर औपसर्गिक विसूची साध्य समझी जाती हैं॥

अथोरस्तोयनिदानम्[1]

तस्य निदानपूर्विका संप्राप्तिः—

ज्वरादिष्वसावानुबन्ध्येन रोगः प्रजायेत किंवा क्वचिद् गुरुरोगैः।
क्वचिच्चाभिघातादिभिर्वा निमित्तैर्विलोक्येत लोके नरेष्वत्र बाह्यैः॥ १॥

---

१. Pleurisy with effusion or hydrothorax.

उरस्तोयनामामये प्रायशोऽस्मिन्नुरस्येकपार्श्वेऽथवा पार्श्वयोर्वे।
भवेत् संचयोऽद्धा जलीयस्य धातोरपि प्राणहृत् पूर्णतो यः प्रदिष्टः ॥ २ ॥

यह रोग ज्वरादिकों में अनुबन्ध-रूप से और क्वचित् गुप्त रोगों से, क्वचित् अभिघात आदि कारणों से वा अन्य बाह्य कारणों से उत्पन्न होता है। उरस्तोय रोग में प्रायः करके छाती के एक पार्श्व में अथवा दोनों पार्श्वों में जलीय धातु का सञ्चय हो जाता है जो पूर्णरूप से प्राणघातक कहा गया है ॥ १-२ ॥

विमर्श—इस रोग में जलीय धातु का संचय फुफ्फुसावरणीकला के दोनों स्तरों के मध्य में होता है।

उरस्तोयस्य रूपम्—

श्वासस्य कृच्छ्रत्वमथो कफस्यास्रावः पिपासाऽङ्घ्रिगतश्च शोथः।
नीलत्वमास्ये रदनच्छदेऽधो मूत्रप्रवृत्तिर्बहुमन्दवेगात् ॥ ३ ॥
कृच्छ्राच्च मात्राऽल्पतया विशेषादत्यन्तसूक्ष्मा द्रुतगामिनी स्यात्।
नाडी नितान्तं विषमा नरस्य ध्रुवं शयानस्य न सौख्यलेशः ॥ ४ ॥
आसीन एवापि सुखी कथञ्चिद्भवेद्गदी तेन नितान्तकृच्छ्रः ॥ ५ ॥

श्वासकृच्छ्रता, कफ का स्राव, पिपासा, पैरों में शोथ, मुख तथा अधरों पर नीलिमा, बहुत मन्द वेग से मूत्र की प्रवृत्ति, मूत्रकृच्छ्रता, एवं मूत्राल्पता होती है और नाड़ी अत्यन्त सूक्ष्म, द्रुत गति से एवं विषम रूप से चलती है। रोगी को लेटने पर किंचित् भी सुख नहीं मिलता किसी प्रकार बैठे रहने पर ही कथञ्चित् सुख प्राप्त करता है ॥ ३-५ ॥

विमर्श—वस्तुतः यह रोग वक्ष्यमाण फुफ्फुसावरण प्रदाह की वृद्धावस्था में उत्पन्न होता है और इसे आर्द्र या सद्रव फुफ्फुसावरण प्रदाह (Pleurisy with effusion) कहते हैं। इसमें केवल तरल रस मात्र का सञ्चय होता है। किन्तु कभी इसमें पूय का भी संचय हो जाता है तब इसे उरःपूय (Empyema or pyothorax) कहते हैं। कभी कभी हृदय या वृक्क आदि रोगों में उत्पन्न सर्वाङ्ग शोथ के परिणामस्वरूप भी फुफ्फुसावरण में तरल संचय हो जा सकता है। इस अवस्था में ही इसे उरस्तोय (Hydrothorax) कहना उचित है।

अथ फुफ्फुसावरणप्रदाहनिदानम्[1]

अस्य परिचयः—

उरस्तोयसंज्ञे गदे यन्निमित्तं पुरा ख्यापितं तत्र तेनैव चात्र।
समुत्पादयेयुः प्रदाहं तु कीटाणवः फुफ्फुसाच्छादिकायां कलायाम् ॥ १ ॥
प्रसारं च लब्ध्वाऽत्र तद्वत्तु ते तरलेनैव नूनं कलां फुफ्फुसीयाम्।
सदा पूरयेयुस्ततस्तस्य शोषो द्विधा दृश्यते रोगिमध्ये विशेषात् ॥ २ ॥
भवेत्तत्र चाद्यस्तु संपूर्णशोषी द्वितीयो ह्यसंपूर्णशोषी प्रभेदः ॥ ३ ॥

पूर्व में उरस्तोय के जो निदान कहे गये हैं वे ही इस रोग के भी निदान समझने चाहिये। फुफ्फुसावरण कला में कीटाणु प्रदाह उत्पन्न करते हैं और ये ही फैल कर फुफ्फुसावरण कला को तरल से पूर्ण कर देते हैं। उसके बाद रोगी में उस तरल का शोष दो प्रकार से होता है। और उसी के अनुसार उसे पूर्ण शोषी और अपूर्ण शोषी कहते हैं ॥ १-३ ॥

विमर्श—इस रोग का प्रधान कारण राजयक्ष्मा का जीवाणु माना जाता है। किन्तु श्वसनक ज्वर आदि के जनक विभिन्न पूयोत्पादक जीवाणुओं के उपसर्ग से भी यह रोग हो सकता है।

---

१. Pleurisy.

किसी भी कारण से उत्पन्न इस रोग से आक्रान्त व्यक्ति में यक्ष्मा रोग होने की अत्यधिक सम्भावना रहती है। प्राचीन आचार्यों ने इसका समावेश 'पार्श्वशूल' में किया है (पूर्वार्ध पृ. ४५५ देखें)

अस्य लक्षणम्—

गदेऽस्मिन् भवेत् पार्श्वशूलं च कासो ज्वरोऽन्तः सशोथप्रदेशप्रपीडा।
शयानः सदा रुग्णपार्श्वेन रोगी सुखं सर्वथा संलभेत प्रकामम् ॥ ४ ॥

इस रोग में पार्श्वशूल, कास, ज्वर, भीतर शोथयुक्त स्थान में पीड़ा रोगयुक्त पार्श्व के बल लेटने पर रोगी को सुख की अधिक प्रतीति होना, ये सब लक्षण होते हैं ॥ ४ ॥

अथ स्मरोन्मादनिदानम्

तस्य निदानम्—

यश्चोन्मादः प्रायशः पूरुषस्याप्राप्तेः प्रेयस्याश्च रेतोविकारात्।
किंवोपस्थस्येन्द्रियस्यापि दोषाद् वैगुण्याद्वा मारुतस्यात्र वै स्यात् ॥ १ ॥
अनेन प्रकारेण नार्या यदि स्यादवाप्तेरभावात् प्रियस्यापि पुंसः।
अथोन्माद एभिर्निमित्तैः पुरोक्तैः स एवोदितोऽत्र स्मरोन्मादरोगः ॥ २ ॥

जो उन्माद प्रायः पुरुषों को प्रेयसी स्त्री की प्राप्ति न होने से या शुक्रविकार से या मूत्रेन्द्रिय के दोष से किंवा वायु के कुपित होने से एवं इसी भाँति स्त्रियों को प्रियतम पुरुष की अप्राप्ति होने से जो उन्माद होता है उसे 'स्मरोन्माद' रोग कहते हैं ॥ १-२ ॥

तस्य लक्षणम्—

स्मरोन्मादरोगे भवेत्स्तब्धताऽथ प्रलापस्तथा कम्पनं श्वास एव।
तनौ पाण्डुता रोदनं चाप्यधैर्यं परं चिन्तनं प्रेयसो वा प्रियायाः ॥ ३ ॥

स्मरोन्माद रोग में स्तब्धता, प्रलाप, कम्पन, श्वास, शरीर का पाण्डु वर्ण हो जाना, रोना, अधीरता, प्रेयसी अथवा प्रियतम का चिन्तन ये सब लक्षण होते हैं ॥ ३ ॥

तस्य दश दशाः—

आदौ चक्षुःप्रीतिरुक्ता ततः स्याच्चिन्ताऽऽसक्तिश्चाथ संकल्प एव।
निद्राच्छेदः कार्श्यताऽथो निवृत्तिर्भोगात्सर्वस्मात्सदैवेन्द्रियाणाम् ॥ ४ ॥
लज्जानाशोन्मादमूर्च्छाश्च मृत्युश्चैताः संख्याता दशास्तु स्मरस्य।
आक्राम्यन्ते चाभिरत्यल्पसत्त्वा लोका अस्मिन् दुर्बलात्मान एव ॥ ५ ॥

प्रथमा आँखों द्वारा प्रेम होना, द्वितीया प्रेमी या प्रमिका की ओर चित्त की आसक्ति, तृतीया तद्विषयक नाना प्रकार के संकल्प का उठना, चतुर्थी निद्रा का नाश; पञ्चमी कृशता, षष्ठी प्रत्येक इन्द्रियों का अपने-अपने विषयों के भोग करने से निवृत्ति, सप्तमी लज्जा का नाश, अष्टमी उन्माद, नवमी मूर्च्छा और दशमी मृत्यु, ये १० दशायें स्मरोन्माद की कही हुई हैं। इन दशाओं से वे ही लोग आक्रान्त होते हैं जो हीन सत्त्व तथा दुर्बल चित्त वाले होते हैं ॥ ४-५ ॥

अथ भ्रमोन्मादादिनिदानम्

भ्रमोन्माद एवं जडोन्माद उग्रस्तथा यौवनोन्माद आलोक्यते यः।
नृलोके तु गर्भप्रसूत्यादिजाता इहोन्मादरोगा अनेके च ये स्युः ॥ १ ॥
समेषां भवन्त्येव चिह्नानि तेषामवस्थाऽनुसारेण भिन्नानि यानि।
अतो बुद्धिमद्भिस्तु सद्भिर्भिषग्भिः स्वया प्रज्ञया वेदितव्यानि तानि ॥ २ ॥

भ्रमोन्माद, जडोन्माद, यौवनोन्माद, गर्भ-प्रसवोन्माद आदि अनेक प्रकार के जितने उन्माद संसार में मनुष्यों को होते हैं, उन सबों के अवस्थानुसार भिन्न २ चिह्न होते हैं जिन्हें बुद्धिमान् वैद्यों को अपनी बुद्धि से स्वयं समझ लेना चाहिये ॥ १-२ ॥

अथ तत्त्वोन्मादनिदानम्

पूर्णं भाग्यं सर्वथाऽहो मदीयं प्राप्ता पूर्णा ब्रह्मणो यत् कृपाऽद्य ।
एवंरूपो यो भ्रमोत्थो हि मोहो वैद्यैस्तत्त्वोन्माद इत्युक्त एव ॥ १ ॥
तत्त्वोन्मादो हर्षमौढ्यं च तस्य सर्वत्रैव ब्रह्ममोहो नृलोके ।
नामान्युक्तान्येष सद्भिर्वृथाधीजातो व्याधिर्भाषितो व्याधिविद्भिः ॥ २ ॥

अहो, मेरा सर्वतोभावेन पूर्ण भाग्य है जो ब्रह्म की पूर्ण कृपा मैंने प्राप्त की, इस प्रकार का जो भ्रमवश मोह उत्पन्न हो जाता है उसी को 'तत्त्वोन्माद' कहते हैं। तत्त्वोन्माद, हर्षमौढ्य, ब्रह्ममोह ये सब पर्यायवाची शब्द हैं। रोगवेत्ताओं ने इस रोग को वृथा बुद्धि से उत्पन्न बताया है ॥ २ ॥

तत्त्वेन चोन्माद्यति यस्तु तत्त्वोन्मादस्ततस्तस्य गदोऽयमुक्तः ।
प्रायः स दुर्बुद्धिमतां च नीचात्मनां कदाचिन्महतामपि स्यात् ॥ ३ ॥

इस रोग में रोगी इस प्रकार के तात्त्विक विचार रखने से उन्मत्त की भाँति आचरण करता है अतः यह रोग 'तत्त्वोन्माद' नाम से कहा गया है। प्रायः दुर्बुद्धि और नीचात्मा को ही यह रोग होता है, महान् आत्मा वालों में कदाचित् ही देखा जाता है ॥ ३ ॥

तत्त्वोन्मादनिदानम्—

अतिप्रगाढान्ननु चेतसोऽसौ धर्मादिमध्येषु वृथाग्रहाच्च ।
मरुत्प्रकोपादनिशं तु तत्त्वोन्मादः प्रजायेत गदो विचित्रः ॥ ४ ॥

चित्त के अत्यन्त कठोर होने से तथा धर्मादिक में वृथा आग्रह रखने से और वायु के प्रकोप से विचित्र 'तत्त्वोन्माद' नामक रोग उत्पन्न होता है ॥ ४ ॥

तत्त्वोन्मादस्य लक्षणम्—

प्रमूढताऽतिस्थिरता तथाऽस्मिन्नस्पन्दता स्याच्च कनीनिकायाम् ।
उन्मीलितं चक्षुरतो निरन्तरं ह्युन्निद्रताऽथो बहुवाग्मिताऽद्धा ॥ ५ ॥
दम्भोग्रभावावपि चातिहासो विक्षेप उन्माद उदाररोदनम् ।
एवंविधानि स्युरिमानि तत्त्वोन्मादे तु चिह्नान्यखिलानि नूनम् ॥ ६ ॥

प्रमेह, अत्यन्त स्थिरचित्तता, कनीनिका की स्थिरता (एक टक से देखना), निरन्तर आँखें खुली रहना, निद्रा का अभाव, बहुत अधिक बात करना, दम्भ की अधिकता, उग्रभाव, अत्यन्त हंसना, विक्षेप, उन्माद, अधिक रोना, इस प्रकार के संपूर्ण लक्षण 'तत्त्वोन्माद' रोग में प्रकट होते हैं ॥

अथ महागदनिदानम्

अस्य पर्यायः—

अतत्त्वाभिनिवेशोऽस्मिन्नपदार्थगदस्तथा । विक्षिप्तता गदोद्वेगो महागद उदीरितः ॥ १ ॥
सदा गदोद्वेगत एव भिन्नो महागदोऽयं बहुभिस्तु मन्यते ।
परन्तु भेदोऽत्र हि सूक्ष्मदृष्ट्याऽवलोकनात्कश्चन न प्रदृश्यते ॥ २ ॥
यतो गदोद्वेगवदत्र बुद्धिर्महागदे स्याद्विषमा विशेषतः ।
स्यादप्यभिव्याप्त इहामये महागदे गदोद्वेग इति प्रबोध्यम् ॥ ३ ॥

अतत्त्वाभिनिवेश, अपदार्थगद, विक्षिप्तता, गदोद्वेग और महागद ये सब समानार्थक पर्यायवाची हैं। बहुत से लोग इसे गदोद्वेग से भिन्न रोग मानते हैं किन्तु सूक्ष्म दृष्टि से देखने पर भी इसमें साधारणतः कोई भेद नहीं प्रतीत होता। क्योंकि गदोद्वेग में जैसी विषम बुद्धि विशेषतः होती है वैसी ही इसमें भी होती है। प्रत्युत महागद के अन्दर गदोद्वेग के लक्षण व्याप्त रहते हैं ॥१-३॥

तत्रादौ महागदस्य वर्णनम्—

निरन्तरं नुर्मलिनान्नभोजिनो निगृह्णतः प्राप्तसमस्तवेगान् ।

स्निग्धैश्च रूक्षैरपि चोष्णशीतादिकैर्निमित्तैरतिमात्रसेवितैः ॥ ४ ॥
दोषाः प्रदुष्टा हृदयं समाश्रिताः सिरा मनोबुद्धिवहाः प्रदूष्य ।
तिष्ठन्ति पश्चाद्रजसाऽथ मोहेनैवावृते चात्मनि सत्यवश्यम् ॥ ५ ॥
तथा च बुद्धौ मनसि प्रवृद्धरजस्तमोभ्यामतिमात्रमावृते ।
दोषैरथ व्याकुलिते हृदि स्यान्नरो विमूढो बहुशोऽल्पचेतनः ॥ ६ ॥
करोति बुद्धिं विषमां च नित्यानित्ये पदार्थेऽपि हिताहिते तु ।
चिह्नैरमीभिर्नियतं महागदं वैद्या अतत्त्वाभिनिवेशमाहुः ॥ ७ ॥

निरन्तर मलिन अन्न के भोजन करने से, मल-मूत्रादि के वेगों को रोकने से और स्निग्ध, रूक्ष, उष्ण, शीत का अधिक मात्रा में सेवन करने से वातादिक दोष कुपित होकर हृदय में स्थित मन तथा बुद्धि को वहन करने वाली सिराओं को दूषित कर देते हैं। पीछे रजोगुण तथा मोह से आत्मा के आवृत होने से बुद्धि तथा मन के प्रवृद्ध रजोगुण तथा तमोगुण से अधिक आवृत होने पर दोषों से हृदय का व्याकुल होने से मनुष्य अत्यन्त विमूढ़ और अल्प चेतना वाला होकर नित्य-अनित्य पदार्थ तथा हिताहित के विषय में बुद्धि धारण करता है, इन चिह्नों से वैद्य लोग महागद अथवा अतत्त्वाभिनिवेश रोग कहते हैं ॥ ४-७ ॥

गदोद्वेगस्य वर्णनम्—

अत्यन्तदुर्बलतया मनसोऽथ मस्तिष्कस्यातिसंभ्रमवशान्ननु मानवानाम् ।
नूनं वृथा विविधकल्पनयैकजातः ख्यातः स आमय इहाद्य शृणुष्व तं त्वम् ॥ ८ ॥
उपर्युक्तहेतुप्रजातामयो वै गदोद्वेगसंज्ञो भिषग्भिः प्रदिष्टः ।
विना व्याधिना व्याधिशङ्का यदि स्यात्तदा तं गदोद्वेगमेवात्र विद्यात् ।
पदार्थस्य राहित्यतः सर्वथा सोऽपदार्थो गदो भाषितः संज्ञयाऽद्धा ॥ ९ ॥

वमन के अत्यन्त दुर्बल होने पर मस्तिष्क में अत्यन्त भ्रम हो जाने से मनुष्यों को एक मात्र विविध मिथ्या कल्पना द्वारा उत्पन्न रोग को वैद्य लोग 'गदोद्वेग' कहते हैं और यदि विना व्याधि के व्याधिशंका हो तो उसे भी 'गदोद्वेग' समझना चाहिये। जिस पदार्थ का रोगी को ज्ञान होता है उसकी वस्तुतः सत्ता न रहने से इस रोग को अपदार्थगद भी कहते हैं ॥ ८-९ ॥

गदोद्वेगस्य निदानम्—

शारीरिकश्रमवशान्मनसः श्रमाद्वा नैराश्यतोऽपि च शुचो बलहानितो वा ।
मानस्य हानित उदारभयाच्च सत्त्वहानेस्तथैव विधिबीजसमुत्थदोषात् ।
गदोद्वेगसंज्ञो गदो जायतेऽसौ निदानं त्विति प्रोक्तमत्रार्यवैद्यैः ॥ १० ॥

शारीरिक या मानसिक श्रम से अथवा नैराश्य (हताश), शोक, बल अथवा मान की हानि किंवा अधिक भय या सत्त्व की हानि होने से विधिवशात् 'गदोद्वेग' संज्ञक रोग हो जाता है ॥१०॥

गदेऽस्मिन् भवेद् यस्य रोगस्य चिन्ताऽनुभूतिर्भवेल्लक्षणस्यैव तस्य ।
गदी कोऽपि मन्येत नैजोदरेऽत्र प्रविष्टं कथंचिद् ध्रुवं गूढपादम् ॥ ११ ॥
भ्रमन्तं च तं खाद्यमानं हि तेन स जानाति सर्वं प्रभुक्तं स्वमन्नम् ।
निरस्यत्ययं किं कथं वा पथाऽथो विनङ्क्ष्यत्युपायेन केनेह नूनम् ॥ १२ ॥
न जाने करिष्यत्ययं किं विधातर्भवेयं न दृष्टः कदाचिच्च तेन ।
मदीयोदरस्थस्य चास्य प्रणाशः प्रयत्नेन केन ध्रुवं संभवेद्वा ॥ १३ ॥
निमित्तेन चानेन मृत्युर्मदीयो भविष्यत्यवश्यं च दुर्दैवयोगात् ।
सदा तर्कयन्नित्थमेवात्मनि स्वे गदार्तोऽश्नुते दुःखमत्यर्थमत्र ॥ १४ ॥

प्रजानाति कश्चित्स्वमस्तिष्कमध्ये प्रविष्टं च कश्चित्कथञ्चिद्धि भेकम् ।
स भित्त्वा मदीयं च मस्तिष्कमाशु हनिष्यत्यवश्यं नु मामित्यजस्रम् ॥ १५ ॥
तनुं मन्यते काचरूपां च कश्चित् स्वकीयामतस्तस्य रक्षार्थमेव ।
प्रकामं करोति प्रयत्नं स नूनं मुधाऽनेकरूपाभिरेवंविधाभिः ॥ १६ ॥
सदैवाकुलः प्रायशो भूरिचिन्ताभिरार्त्तो गदोद्वेगरोगेण भीतः ।
सुखं चाप्नुवन्नैव किञ्चित् क्वचिद्वै प्रशुष्येद्दिवारात्रिमध्ये विशेषात् ॥ १७ ॥
न शक्नोति स प्रायशः सान्त्ववाक्यैर्भृशं सन्वितोऽभीक्ष्णमप्यात्मचित्तात् ।
निराकर्त्तुमद्धा भ्रमं पूर्वमुक्तं सुयुक्त्याऽपि दूरीकृतं वा कदाचित् ॥ १८ ॥
तव भ्रान्तिरेषेति योऽस्मै गदेद्वा स तस्मै सदा द्रुह्यति भ्रान्तचित्तः ।
य एतद्विचारानुसारेण रोगानुमोदी स तस्मै ध्रुवं रोचतेऽपि ॥ १९ ॥
रुजा चातिकष्टप्रदा तस्य पक्वाशये लक्ष्यते श्लेष्मणा सन्ततं हि ।
प्रलिप्ता रसज्ञा तथा श्वासमध्ये भवेत् पूतिगन्धो गदेऽस्मिन् विशेषात् ॥ २० ॥
वमिः स्यादथोत्क्लेश एतत्तु सर्वं ध्रुवं लक्षणं जीर्णतायाश्च बोध्यम् ।
अथ स्पर्शशक्तेश्च तीक्ष्णत्वमत्रानुभूयेत केनापि रोगार्दितेन ॥ २१ ॥

रोगी जिस रोग की चिन्ता करता है उसी रोग के लक्षणों का अनुभव करता है। इसमें कोई रोगी ऐसा समझता है कि मेरे उदर में कोई सर्प घुस गया है और घूमता हुआ खाये हुए अन्न को खा जाता है और यह सर्प किस मार्ग से कैसे निकलेगा और किस उपाय से नष्ट होगा? हे विधाता! न जाने यह (सर्प) क्या अनिष्ट करेगा और कहीं यह मुझे डस न ले? मेरे उदर में स्थित इसका अब कौन से प्रयत्न से नाश होगा। दर्दैववश इसी निमित्त से सदा अपने मन में विचार करता हुआ रोगी अत्यन्त दुःख प्राप्त करता है। कोई रोगी यह समझता है कि मेरे मस्तिष्क के अन्दर कोई मेंढक किसी प्रकार से घुस गया है और यह मेरे मस्तिष्क का भेदन अवश्य करेगा और कोई रोगी अपने शरीर को काच का बना हुआ मानता है अतः वह उसे टूटने से बचने का अनेक प्रकार व्यर्थ प्रयत्न करता है। इस प्रकार वह अधिक चिन्ता से दुःखी होकर गदोद्वेग रोग से डरा हुआ कभी सुख का अनुभव नहीं करता और दिन रात विशेष रूप से सूखता जाता है निरन्तर सान्त्वनायुक्त वाक्यों से सान्त्वना पहुँचाने पर या युक्ति से दूर करने पर भी अपने चित्त से उक्त भ्रमों को कभी दूर नहीं कर पाता और भ्रान्तचित्त होने से वह जो कोई उससे कहे कि तुम्हारा यह सब केवल भ्रम है तो उससे सदा द्रोह रखने लगता है और जो उसके विचारों का उसी के अनुसार अनुमोदन करता है उससे यह खूब प्रसन्न रहता है। इस रोग में रोगी के पक्वाशय में अत्यन्त कष्टप्रद पीड़ा बनी रहती है और जिह्वा कफ से लिपटी रहती है। श्वास के मध्य में पूतिगन्ध होता है। एवं वमन तथा उत्क्लेश होता रहता है। ये सब लक्षण निश्चित रूप से रोग की जीर्णता के द्योतक होते हैं। कोई रोगी स्पर्शशक्ति की तीक्ष्णता का अनुभव करता है ॥ ११-२१ ॥

जलोदरादेरुदरामयस्य वा विपाण्डुताया हृदये निरन्तरम् ।
साङ्घातिकस्यापि गदस्य कश्चित् करोत्यतीवानुभवं गदीह ॥ २२ ॥

कोई रोगी जलोदरादि उदर-रोग वा पाण्डुता किंवा किसी सांघातिक रोग का हृदय में सदा अनुभव करता है ॥ २२ ॥

क्वचित्पुरुपताचयो भवति रोगिणि प्रायशः क्वचिच्च सततज्वरोदय उदारदुःखप्रदः ।
क्वचिच्च किल कम्पनादिकमलं गदोद्वेगिनि स्विति प्रकृतितोऽप्यनेकपरिकल्पनासम्भवाः ॥
भवन्ति बहुशोऽनिशं भ्रममयाश्च ये स्वामया निरस्ततमसस्त्ववस्स्वपि विशिष्टमूर्खेष्विह ।

न केनचन भाषितुं निखिलरूपतस्तान् क्वचित् क्रमेण ननु भूयते तत उदारवैद्यैः स्वयम् ॥
तदीयपवनप्रभृत्यखिलदोषरूपानुसारिलक्षणनिरीक्षणात् सततमेव बोध्याश्च ते ।
गदोऽप्ययमुपजायते क्वचन नैव कैशोरके न वा जरसि वै निमित्तमिह भाति चेतोगतिः ॥

किसी रोगी में पुरुषत्व का क्षय होता है, किसी में दुःखप्रद निरन्तर बना रहने वाला ज्वर होता है और किसी में अत्यन्त कम्प एवं इसी प्रकार से प्रकृतिवश अन्यान्य कल्पनाओं के करने की संभावना होती है। जिस रोगी में सत्त्व की अत्यन्त कमी होती है। तथा जो विशिष्ट मूर्ख है उन लोगों में ही इस प्रकार के जितने भ्रमस्वरूप रोग होते हैं उन सबों को संपूर्णतः कहने के लिए कोई कभी समर्थ नहीं हो सकता, अतः श्रेष्ठ वैद्यों को स्वयम् उनके वातादिक दोषानुरूप लक्षणों को देखकर समझना चाहिए। यह रोग किशोरावस्था या वृद्धावस्था में प्रायः नहीं होता ॥

रजःप्रसेकात्प्रतिमासमद्धा स्त्रिया विशुद्ध्यत्यथ धातुवृन्दम् ।
अतो नहि प्रायश एव तस्यां मनोगदस्यास्य समुद्भवः स्यात् ॥ ३० ॥

प्रतिमास रजःस्राव होते रहने से स्त्रियों की समस्त धातुएं विशुद्ध होती रहती हैं। प्रायः उनमें इस मनोरोग (गदोद्वेग) की उत्पत्ति नहीं होती ॥ ३० ॥

अथ योषाऽपस्मारनिदानम्[1]

तत्रादौ योषाऽपरस्मारविषये भिषजां विचारः—

संबन्धो मानसक्षेत्रस्य साक्षाद् यत्र नश्यति । गतिसंवेदनाक्षेत्रद्वयेन हि कथंचन ॥ १ ॥
भवेयुर्यत्र चिह्नानि विचित्राण्यमितान्यपि । यं गदं मनसा ध्यायेदाक्रान्ता तेन सा भवेत् ॥
किन्तु वास्तविको कस्यचिद्गदस्यात्र न स्थितिः । ईदृशोऽसौ गदो योषाऽपस्मार इति कथ्यते ॥
कैश्चिद् भिषग्भिः क्रियते गणनाऽस्यापतन्त्रके । योषासु बहुधोत्पत्त्या योषाऽपस्मार उच्यते ॥
किन्तु ये प्रमदातुल्याः कोमलां प्रकृतिं श्रिताः । असहिष्णवस्तेष्वपि प्रेक्ष्यतेऽयं गदः क्वचित् ॥

इस 'योषापस्मार' रोग में गति तथा सांवेदनिक क्षेत्र का मानस क्षेत्र के साथ साक्षात् सम्बन्ध टूट जाता है जिससे विचित्र प्रकार के अनेकों लक्षण प्रकट होते हैं। इस रोग से आक्रान्त स्त्री जिस रोग का मन से ध्यान करती है उसे भ्रमवश वही रोग हुआ प्रतीत होता है। कोई-कोई वैद्य इसकी गणना 'अपतन्त्रक' रोग (पू. पृ. ४१२) में कहते हैं और योषा (स्त्री) में अधिकतर होने से इसे 'योषापस्मार' कहते हैं। किन्तु स्त्रियों की भाँति कोमल प्रकृति वाले तथा क्लेशादि न सहन कर सकने वाले पुरुषों में भी यह रोग दिखाई पड़ता है ॥ १–५ ॥

योषाऽपस्मारकारणम्—

रक्तक्षयाद्वा बहुशोऽप्यजीर्णादुद्वेगतः कोष्ठविबन्धतो वा ।
शोकाच्च भग्नान्मनसो जरायौ विकारतोऽथो रजसो विनाशात् ॥ ६ ॥
कुटुम्बिनां निष्ठुरभावतो वा दौर्बल्यतोऽपि प्रकृतेः कदाचित् ।
पत्युश्च निःस्नेहतया तरुण्या वैधव्यशोकादथवा विशेषात् ॥ ७ ॥
योषित्सु रोगो यत एष कष्टदः प्रजायते मानसदेहतापनः ।
चिह्नैरपस्मारसमैः समन्वितः सुदारुणो वै भिषगुत्तमैः सदा ॥ ८ ॥
प्रकाशितो भूमितले तु योषाऽपस्मारनाम्ना बहुशो गदोऽसौ ।
यावत्प्रवृत्ती रजसः स्त्रियां स्यात् तावद् गदस्यास्य मतो हि कालः ॥ ९ ॥

रक्त का अधिक क्षय, अजीर्ण, उद्वेग, विबन्ध (मलबद्धता), शोक, निराशा, जरायु की विकृति, रजःक्षय, कुटुम्बियों के निष्ठुर व्यवहार, प्रकृति की दुर्बलता, पति का स्नेह रहित व्यवहार और

1. Hysteria.

युवावस्था में विधवा हो जाने से एवं अत्यधिक शोक से स्त्रियों में यह कष्टप्रद रोग उत्पन्न होता है। इसमें अपस्मार के समान लक्षण मिलते हैं। यह 'योषापस्मार' रोग अत्यन्त दारुण होता है। जब तक स्त्रियों को रजःस्राव होता रहता है (प्रायः १२ से ५० वर्ष की आयु) तभी तक इस रोग के उत्पन्न होने की सम्भावना रहती है॥ ६-९॥

योषाऽपस्मारसंप्राप्तिवर्णनम्—

पूर्वोदितैर्हेतुभिरेव तावत् क्षेत्रे भवेद्धै मनसो विकारः।
तथैव सांवेदनिकात्तथा गतेः क्षेत्राच्च्युतिर्मानसिकस्य जायते॥ १०॥
क्षेत्रस्य योगस्य ततः क्रमेण प्राग्रूपरूपोद्भव एव लोके।
संप्राप्तिरूपेण विशिष्य योषाऽपस्माररोगस्य विलोक्यते जनैः॥ ११॥

पूर्वोक्त कारणों से पहले मानसिक क्षेत्र में विकार होता है तत्पश्चात् सांवेदनिक क्षेत्र एवं गतिक्षेत्र का मानसिक क्षेत्र के साथ सम्बन्ध टूट जाता है। उसके बाद क्रम से पूर्वरूप तथा रूप के लक्षण प्रकट होते हैं। इस प्रकार से योषापस्मार रोग की विशेष रूप से संप्राप्ति का दर्शन होता है॥ १०-११॥

योषाऽपस्मारपूर्वरूपम्—

हृत्पीडनं जृम्भणमङ्गचित्तयोः सदाऽवसादो भवतीह योषिताम्।
अव्यक्तरूपं गदितं तु योषाऽपस्मारसंज्ञे हि गदे भिषग्भिः॥ १२॥

हृदय में पीड़ा, जँभाई और अङ्ग तथा चित्त में सदा अवसाद बना रहना ये सब योषापस्मार के पूर्वरूप में लक्षण होते हैं॥ १२॥

योषाऽपस्मारलक्षणम्—

चिह्नान्यनेकानि विचित्ररूपाण्यपि प्रजायन्त इहेत्यवेहि।
ध्यानं भवेद्यस्य गदस्य यत्र स्यात्तत्र तस्याक्रमणं विशेषात्॥ १३॥
किंवा क्वचिद्रोगिणि यानि चिह्नान्याकर्णितान्यप्यवलोकितानि।
सर्वाणि तानि स्युरिहापि योषाऽपस्मारसंज्ञे हि महागदे वै॥ १४॥
तथाऽपि चिह्नानि विशेषतोऽस्मिन् स्युर्यानि दृष्टान्यखिलानि तानि।
विविच्य सौकर्यकृते चिकित्साविधावहं वच्मि भिषग्जनानाम्॥ १५॥
वैचित्र्यमाक्रन्दनरोदने च भ्रान्तिः प्रलापो मतिविभ्रमश्च।
द्वेषः सदा ज्योतिषि चोद्धता स्यादाक्रोश उच्चैर्हसनं च कण्ठे॥ १६॥
श्लेष्माशये पीडनमङ्गमध्ये सदाऽनुभूतिः क्वचन व्यथायाः।
स्पर्शोत्थशक्तेरपि वृद्धिभावः श्वासस्य कृच्छ्रत्वमथोदराच्च॥ १७॥
यावद्गलं चानृतगुल्मरोगोत्पत्तिस्तु मूर्च्छाऽत्र मतिप्रणाशः।
योषित्सु जायन्त इमानि चिह्नान्यनारतं प्रायश एव लोके॥ १८॥

इस रोग में अनेक प्रकार के विचित्र लक्षण प्रकट होते हैं अर्थात् जिस रोग का ध्यान रोगी करता है उस रोग का, किंवा रोगी किसी अन्य रोगी में जिन लक्षणों को सुने या देखे रहता है वे सभी लक्षण स्मरण करने पर प्रकट हो जाते हैं। निम्न लक्षण तो इस रोग में होते ही हैं। यथा—मोह, आक्रन्दन (करुण विलाप), रोना, भ्रान्ति, प्रलाप, बुद्धिभ्रम, प्रकाश से द्वेष, उद्धतता, आक्रोश (चिल्लाना या गाली बकना), उच्च रूप से हँसना, कण्ठ, श्लेष्माशय या अन्य अङ्गों में पीड़ा, स्पर्शशक्ति की वृद्धि, श्वासकृच्छ्रता, उदर से लेकर गले तक के अन्दर मिथ्या गुल्म की प्रतीति, मूर्च्छा और बुद्धिभ्रंश ये सब लक्षण प्रायः स्त्रियों में उत्पन्न होते हैं॥ १३-१८॥

योषाऽपस्मारस्य परिणतिः—

यैः कारणैरेष गदः प्रजायते प्रयाति शान्तिं विरतेषु तेषु ।
अतः परिस्थित्यनुसारतोऽस्य स्याल्लोकमध्ये परिणाम एव ॥ १९ ॥
दैवात् कदाचिद् यदि कारणानां स्थितिर्भवेत्तर्हि गदप्रवृद्धिः ।
एवं निवृत्तेऽपि च हेतुवृन्दे रोगस्य शान्तिर्नियता प्रदृश्यते ॥ २० ॥
काचिन्न नारी मृतिमेति रोगे वयोविवृद्धौ स्वत एष शाम्यति ।
विपर्ययोऽपि प्रकृतेः कदाचिज्जायेत नार्या इति यन्न दृश्यते ॥ २१ ॥
ततो गदस्यास्य भवेन्मुहुर्मुहुः प्रायः सदैवाक्रमणं नृलोके ।
इत्थं यथामत्यधुना तु योषाऽपस्माररोगस्य निदानमुक्तम् ॥ २२ ॥

जिन कारणों से यह रोग उत्पन्न होता है उन्हीं कारणों के दूर होने पर शान्त भी हो जाता है । अतः लोक में परिस्थिति के अनुसार ही इस रोग का परिणाम दृष्टिगोचर होता है । इस रोग में कभी भी स्त्री की मृत्यु नहीं होती, अवस्था ढल जाने पर स्वतः ही यह रोग निवृत्त हो जाता है । स्त्री की प्रकृति का कभी विपर्यय नहीं दिखाई देता, अतः इस रोग का आक्रमण भी बार-बार होता रहता है ॥ १९–२२ ॥

विमर्श—स्मरोन्माद प्रभृति रोग पूर्वोक्त उन्माद रोग (पूर्वार्ध पृष्ठ ३७३) के प्रकार ही हैं । योषापस्मार में अपस्मार (पू. पृ. ३८९) के लक्षण अधिक होते हैं । इनमें रोगी द्वारा वर्णित लक्षणों से सम्बद्ध किसी शारीरिक विकृति का अभाव रहता है अतः ये मानस रोग कहलाते हैं । इनमें प्रायः वातिक लक्षणों की अधिकता रहती है अतः आधुनिक विद्वान इसे मानस 'वातव्याधि' (Psychoneuroses) कहते हैं । इनके कारणों की सम्प्राप्ति एवं लक्षणों का सोपपत्तिक वर्णन उन्माद एवं अपस्मार रोगाध्याय में देखें ।

अथागन्तुजपक्षवधनिदानम्

तत्रादौ संख्यासम्प्राप्तिमाह—

भिषग्भिर्गदितो दोषाऽऽगन्तुकारणतो द्विधा । विशेषतः पक्षवधस्तत्राद्यो दोषजः पुरा ॥१॥
वातव्याधौ विनिर्दिष्टोऽधुनाऽऽगन्तुज उच्यते । सोऽपि कारणभेदेन प्रोक्तो वैद्यैश्चतुर्विधः ॥
तत्राद्यो रससंजातो द्वितीयो नागजः स्मृतः । इन्द्रियोत्थविकारोत्थस्तृतीयस्तु ततो मतः ॥
व्यापारिकविकारोत्थश्चतुर्थः परिकीर्त्तितः ॥ ३ ॥

'माधवनिदान' के वातव्याधि प्रकरण में पक्षवध रोग का वर्णन किया गया है, वैद्यों ने उसके विशेषतः दो भेद बताये हैं । जिनमें पहला दोषज और दूसरा आगन्तुज है । इसमें दोषज का वर्णन हो चुका है अब इस समय आगन्तुज पक्षवध का वर्णन कर रहे हैं । यह कारण भेद से ४ प्रकार का होता है, इसमें पहला रसज, दूसरा नागज, तीसरा इन्द्रियविकारोत्थ और चौथा व्यापारिकविकारोत्थ होता है ॥ १–३ ॥

रसहेतुजपक्षवधनिदानमाह—

अनारतं यत्र भवेद् रसस्य स्पर्शोऽधिकस्तद्गतधूमसेवनम् ।
तत्रोद्गमः पक्षवधस्य चेत् स्यात् तदा स वैद्यै रसहेतुजः स्मृतः ॥ ४ ॥

जहाँ पर रस (पारा) का अधिक स्पर्श होता रहता है और उसके धूम का सेवन होता रहता है वहाँ पर (कार्य करने वाले व्यक्ति में) पक्षवध का प्रादुर्भाव होता है । इसी को वैद्य लोग 'रस हेतुज' (रसज) पक्षवध कहते हैं ॥ ४ ॥

रसहेतुजपक्षवधमाह—

बलप्रणाशो भुजयोस्तु पूर्वं ततः प्रकम्पोऽथ च सक्थिमध्ये ।

स्याद्वेपनं नूनमतः परं तु प्रकम्पनं सर्वशरीरवर्त्ति ॥ ४ ॥
द्रव्यं ततो नैव दृढं ग्रहीतुं किञ्चित् क्वचिद्रोगिजनः क्षमेत ।
न व्यक्तरूपेण हि वक्तुमीषन्न चर्वितुं च प्रभवेत् कदाचित् ॥ ५ ॥
नृत्यं प्रकुर्वन्निव च प्रगच्छेन्निद्रालुता तस्य ततः प्रकम्पः ।
बलप्रणाशोऽनलमन्दता चोत्क्लेशोऽपि लालासरणं रदच्युतिः ॥ ६ ॥
एतानि चिह्नानि भिषङ्मतानि स्युः पक्षनाशे रसहेतुजाते ।
संधारितेऽङ्गेऽत्र करादिभिः स्यात्कम्पस्य शान्तिर्गदिनोऽपि नूनम् ॥ ७ ॥

सर्वप्रथम बाहुओं में बल का नाश, तत्पश्चात् दोनों पैरों में कम्प, इसके बाद सारे शरीर में कम्प हो जाता है जिससे रोगी कोई वस्तु दृढ़ रूप से धारण करने में समर्थ नहीं होता है और व्यक्त रूप से भाषण करने में तथा कुछ भी चबाने में भी असमर्थ रहता है और नाचता हुआ चलता है, उसे नींद घेरे रहती है तथा कम्प, बलनाश, अग्निमन्दता, उत्क्लेश, लालास्राव, दाँत गिरना ये सब लक्षण रसहेतुज पक्षवध में होते हैं। हाथ आदि से अङ्गों के पकड़ लेने पर कम्प की शान्ति होती है ॥ ४–७ ॥

नागहेतुजपक्षाघातनिदानमाह—

चित्रादिकर्माणि सदैव नागैः कुर्वन्ति ये शिल्पिजना अगत्या ।
किंवा भवेत्सीसकसंनिबद्धा वृत्तिर्यदीया प्रतिवासरं हि ॥ ८ ॥
ये चापि मोहादथवा कुवैद्यैरशुद्धनागोद्भवभस्म दत्तम् ।
अदन्ति दैवादिह तेषु नूनं प्रजायते नागजपक्षघातः ॥ ९ ॥

जो शिल्पी लोग नाग (सीसा) द्वारा चित्रादि कर्म करते रहते हैं या जो सीसा (नाग) से सम्बद्ध व्यापार में प्रतिदिन लगे रहते हैं अथवा जो कुवैद्यों द्वारा दी हुई अशुद्ध नागभस्म का सेवन करते हैं उन्हें 'नागज पक्षघात' रोग होता है ॥ ८–९ ॥

तस्य लक्षणमाह—

आदौ समारभ्य नुरङ्गुलीभ्यो व्याप्नोति नूनं मणिबन्धमेषः ।
उक्तो गदानामतिदारुणोऽपि प्रायेण नागैकनिमित्तजातः ॥ १० ॥
जायेत दौर्बल्यमतीव तत्र प्राधान्यतो लक्ष्म तथांऽसदेशे ।
प्रकोष्ठमध्येऽपि च तोद एव स्यात्स्रंसनं बाहुयुगेऽप्यवश्यम् ।
शूलश्च नीलत्वमपीह दन्तवेष्टे भवेन्नागजपक्षघाते ॥ ११ ॥

यह पहले मनुष्यों की अङ्गुलियों से शुरू होकर मणिबन्ध (कलाई) तक व्याप्त हो जाता है। यह 'नागज पक्षाघात रोग' अत्यन्त दारुण होता है। इसमें दुर्बलता अधिक होती है और प्रधान रूप से स्कन्ध प्रदेश और प्रकोष्ठ में सूई चुभोने की सी पीड़ा होती है। दोनों बाहुओं में शिथिलता, शूल और मसूड़ों में नीलापन होना ये सब लक्षण नागज पक्षघात में होते हैं ॥ १०–११ ॥

इन्द्रियोत्थविकारोत्पन्नपक्षाघातनिदानमाह—

मस्तिष्कस्य गतिक्षेत्रे सुषुम्णाशीर्षकेऽथवा ॥ १२ ॥
शोथोऽर्बुदं तथा रक्तस्रुतिः क्षीणत्वमेव च । अथवा तत्समीपस्थावयवस्य च शूनता ॥१३॥
स्याच्चेत्तेन गतिक्षेत्रतन्तूनां त्रुटनं भवेत् । किंवाऽवरोधस्तस्मात्तु गत्यभावोऽभिजायते ॥
ततः पक्षवधो जायेतेन्द्रियोत्थविकारजः । पूर्वोक्तान्येव लिङ्गानि ज्ञातव्यानीह सूरिभिः ॥

मस्तिष्क के गति क्षेत्र (Motor Area) में अथवा सुषुम्णाशीर्षक में शोथ, अर्बुद तथा रक्तस्राव, क्षीणता अथवा उन सबों के समीपस्थ अवयव में शोथ आदि होने से यदि गतिक्षेत्र की तन्तुयें टूट

जायें किंवा उनमें अवरोध हो जाय तो गति का अभाव हो जाता है और उससे इन्द्रियोत्थ विकारज पक्षवध होता है इसके अतिरिक्त और पूर्वोक्त (दोषज पक्षवध) के लक्षण समझने चाहिये ॥१२-१५॥

विमर्श—इस प्रकार के ही पक्षवध का वर्णन मूल ग्रन्थ में किया गया है। अर्वाचीन दृष्टि या उसके विविध भेदों का वर्णन भी वहीं विमर्श में है। (पूर्वार्ध ४१८)

व्यापारिकविकृतिजपक्षाघातमाह—

व्यापारिकविकारोत्थपक्षाघाताभिधे गदे । गतिक्षेत्रे न विकृतिः परिदृश्येत काचन ॥१६॥
किन्तु मानसिकक्षेत्रे सैवालोक्येत केवला । गत्यर्थं मनसाऽऽज्ञप्तं गतिक्षेत्रं क्षमं यतः ॥१७॥
ततो मानसिकक्षेत्रे विकृते तद्ददाति नो। गतितन्तुभ्य आज्ञां वै यस्माद्भवति किंचन ॥१८॥
कार्यं नहि शरीरेऽस्मिन्नत एव प्रजायते। शैथिल्यं मांसपेशीनां पक्षाघातामयप्रदम् ॥१९॥
एवं च पक्षाघातीयलक्ष्मसङ्घातसंभवः। स्यादतोऽयं गदः कष्टप्रदः प्रोक्तो हि मानसः ॥२०॥

व्यापारिक विकारोत्थ पक्षाघात में गतिक्षेत्र में तो कोई विकृति नहीं दिखाई पड़ती किन्तु मानसिक क्षेत्र में अवश्य यह (विकृति) दिखाई पड़ती है और मन के द्वारा आज्ञा पाने पर गतिक्षेत्र कार्य करने में समर्थ होता है। इससे मानसिक क्षेत्र के विकृत होने पर मन गतितन्तुओं को आज्ञा नहीं दे सकता। अतः इस शरीर में कुछ भी कार्य नहीं होता और उसीसे मांसपेशियों की शिथिलता होती है जिसके फलस्वरूप पक्षाघात रोग होता है। इस प्रकार से पक्षाघातसम्बन्धी लक्षणसमूह की उत्पत्ति होती है। इसीसे यह रोग कष्टप्रद तथा मानस कहा गया है ॥ १६-२० ॥

अथ स्नायुशूलनिदानम्

तत्रादौ तस्य परिचयः—

स्नायुष्वथवा शश्वत् तच्छाखासूपजायते घोरा। पीडा प्राणपीडनी गदिता सा स्नायुशूलाह्वा ॥

स्नायुओं में अथवा उनकी शाखाओं में प्राण को कष्ट देनेवाली जो निरन्तर घोर पीड़ा होती हैं उसे स्नायुशूल कहते हैं ॥ १ ॥

विमर्श—स्नायु शब्द का प्रयोग प्राचीन आचार्यों ने बन्धन कार्य में प्रयुक्त सौत्रिक तन्तु (Ligaments) एवं संज्ञा और चेष्टावह नाड़ीतन्तु दोनों अर्थों में किया है। प्रस्तुत विषय में स्नायु शब्द नाडीतन्तु का ही वाचक मानना चाहिये। (पूर्वार्ध पृ० ४०८ भी देखें)

व्याधेः स्थानम्—

सदा मस्तकस्याथ बाह्वोश्च सक्थ्नोस्तथाऽन्यस्य चाङ्गस्य नूनं जनानाम् ।
त्वचानिम्नभागस्थितस्नायुमध्ये गदोऽयं भवेत् स्नायुशूलाह्वयोऽत्र ॥ २ ॥
प्रजायेत वै प्रायशोऽङ्गेषु सर्वेष्वयं तीव्रप्राणप्रपीडाप्रदायी ।
विशिष्टाङ्गजातस्य चास्याभिधेयान्यपि स्युर्विशिष्टानि शिष्टोदितानि ॥ ३ ॥
क्रमादूर्ध्वभेदस्तथैवार्धभेदो ह्यधोभेद एवामयानां समेषाम् ।
नृणां मुण्डमुण्डार्धकस्फिग्भवानां भवेयुर्भवेऽमूनि नामानि नूनम् ॥ ४ ॥

मनुष्यों के मस्तक (सिर), दोनों बाहुओं, दोनों पैरों तथा अन्य अङ्गों में त्वचा के निम्न भाग में स्थित स्नायु (नाड़ी-तन्तु) में स्नायुशूल नामक यह रोग होता है। यह तीव्र कष्ट देने वाला रोग प्रायः सभी अङ्गों में उत्पन्न हो सकता है और विशिष्ट २ अङ्गों में होने से इसके विशिष्ट २ नाम शिष्ट वैद्यों ने कहे हैं। मनुष्यों के सिर और सिर का अर्धभाग, स्फिक् (चूतर) में उत्पन्न इस रोग के क्रम से ऊर्ध्वभेद, अर्धभेद ये नाम भी होते हैं ॥ २-४ ॥

ऊर्ध्वभेदस्य निदानम्—

वक्रक्षीणतातोऽथ रक्तक्षयाद्वा नृणां वृक्कमस्तिष्कयोर्दोषतोऽपि ।

अजीर्णाच्च दन्तामयादूर्ध्वभेदाभिधः स्नायुशूलो गदो जायतेऽत्र ॥ ५ ॥

मनुष्यों को बलक्षीणता, रक्तक्षय, वृक्क तथा मस्तिष्क का दोष, अजीर्ण, दन्त-रोग इन सबों से ऊर्ध्वभेद नामक स्नायुशूल रोग होता है ॥ ५ ॥

तस्य लक्षणम्—

ललाटे पुटेऽक्ष्णोऽप्यधोभागमध्ये तथैवाधिगण्डं च दन्तच्छदे वा।
रदे वाऽधरे शूलवद्दाहवद् रसनापार्श्वमध्ये भवेद् वेदना या ॥ ६ ॥
सुघोरा भविष्णुर्भृशं चैकपार्श्वे क्रमेणैधिनी चास्य संबन्धिभागे।
सदैवोर्ध्वभेदाभिधोदीरिता साऽगदङ्कारर‍त्नैरनूनैर्विविच्य ॥ ७ ॥

ललाट, नेत्रपुटक तथा उसके अधोभाग के मध्य में तथा गण्डस्थल, ओष्ठ, दाँत, अधर और जिह्वा के पार्श्वभाग में शूल और दाह के समान जो घोर पीड़ा होती है और जो एक पार्श्व में होकर क्रमशः बढ़ती हुई मुख के दूसरे भागों में भी होती है उसे ऊर्ध्वभेदसंज्ञक स्नायुशूल कहते हैं ॥ ६–७ ॥

अस्यानुपशयः—

भृशं स्पर्शनाच्चातिशीतस्य वायोर्विवर्द्धेत देहप्रकम्पाच्च नूनम्।
विकारात्तथा स्नायुभेदस्य रोगः सदैवोर्ध्वभेदो विशेषान्नृदेहे ॥ ८ ॥

अत्यन्त शीतल वायु का अधिक स्पर्श होने से, देह में प्रकम्प होने से, स्नायुभेद-सम्बन्ध विकार से यह बढ़ता है ॥ ८ ॥

विमर्श—प्राचीन ग्रन्थों के अनुसार मूल ग्रन्थ में इसका समावेश शिरोरोग के वातिक या अनन्तवात भेद में किया गया है (देखिए उत्त० पृ० ३३२ और ३४२)

अर्द्धभेदस्य निदानम्—

सदैवार्द्रभूमिस्थितेश्चातिशीताभिसंबन्धतो वा बलक्षीणतातः।
प्रजायेत दुष्टस्य वातस्य नीरस्य वा सेवनादर्द्धभेदो गदोऽयम् ॥ ९ ॥

सदैव आर्द्र भूमि में निवास करने से या अत्यन्त शीत का सम्बन्ध होने से वा बल की क्षीणता से अथवा दूषित वायु तथा जल के सेवन करने से यह अर्द्धभेद नामक रोग उत्पन्न होता है ॥ ९ ॥

तस्य लक्षणम्—

भवेद् वेदना व्याप्य याऽर्द्धं मुखस्यानिशं मण्डले तीव्ररूपा जनानाम्।
अपि प्रायशो वामपार्श्वे प्रजाताऽर्द्धभेदो गदः सा प्रकीर्त्त्येत वैद्यैः ॥ १० ॥
व्यथेताशुगेनेव विद्धं शिरोऽद्धा नृणां दारुणं तीव्ररूपेण पूर्णम्।
कदाचित् क्रमं चावलम्ब्य प्रशस्तं विरामो महान् वा प्रजायेत चात्र ॥ ११ ॥
अपि प्रायशो योषितामेष रोगो वपुष्येव जातः प्रदृश्येत लोके।
वयःस्थेऽथ वै यौवने वाऽस्य भूम्ना भवेदुद्भवोऽप्यामयस्य स्वभावात् ॥ १२ ॥

जो तीव्र पीड़ा मुखमण्डल के अर्धभाग में होती है और जो प्रायः वाम ही पार्श्व में होती है उसे वैद्य लोग 'अर्द्धभेद' संज्ञक स्नायुशूल कहते हैं। इसमें मनुष्यों का सिर तीव्र बाण से पूर्ण विद्ध हुआ सा पीड़ायुक्त प्रतीत होता है वह पीड़ा कभी शान्त होती है और कभी बढ़ जाती है। यह रोग प्रायः करके स्त्रियों में अधिक होता है। इस रोग की उत्पत्ति स्वभावतः वृद्धावस्था तथा युवावस्था में होती है ॥ १०–१२ ॥

विमर्श—मूलग्रन्थ में इसका समावेश 'अर्धावभेद' नामक शिरोरोग में किया गया है।
(देखिए उत्तरार्ध पृ० ३४२)

अधोभेदस्य निदानम्—

सदा विड्विबन्धाच्छ्रमाच्छीतयोगात्तथा वाऽऽमवाताच्च दौर्बल्यतोऽद्धा।

अथार्द्रस्थलावस्थितेर्गर्भदोषादधोभेदनामोपजायेत रोगः ॥ १३ ॥

सदा मल का विबन्ध होने से, श्रम से, शीत का सम्बन्ध होने से, आमवात से, दुर्बलता से, आर्द्र स्थल में रहने से अधोभेद स्नायु-रोग उत्पन्न होता है ॥ १३ ॥

तस्य लक्षणम्—

अधिस्फिक् तथा चोरुजानुस्थसन्ध्योः पदे पश्चिमे वा क्वचिच्चाधिजङ्घम् ।
प्रजायेत यच्छूलमुच्येत वैद्यैरधोभेदनामा गदो वै तदेव ॥ १४ ॥
भवेत्प्रायशः सक्थ्नि सर्वत्र चैकतरे रात्रिमध्ये वली शूल एषः ।
अपि प्रौढ एव प्रजायेत भूम्ना वयस्यामयः स्नाय्वधोभेदनामा ॥ १५ ॥

स्फिक् तथा ऊरु और जानु की सन्धियों में, पैर के पिछले भाग और जङ्घा में जो शूल होता है वैद्य लोग उसे अधोभेदसंज्ञक स्नायु शूल कहते हैं। यह शूल प्रायः करके सर्वत्र एक ही पैर में होता है तथा रात्रि में बढ़ता है। यह अधोभेद नामक स्नायुशूल रोग प्रायः प्रौढ़ अवस्था में ही होता है ॥ १४-१५ ॥

विमर्श—इसका अन्तर्भाव मूलग्रन्थ में वर्णित गृद्ध्रसी रोग में हो जाता है (पू. पृ. ४२७) इनके अतिरिक्त भी अनेक स्नायुज शूल (Neuralgia) हो सकते हैं। स्थान के अनुसार उनके नाम भी भिन्न-भिन्न होते हैं। अनुक्तवात रोग (पू. पृ. ४३७) तथा शूल रोग का विमर्श (पू. पृ. ४५३) भी देखें।

अथाचलवातनिदानम्

ययैव संस्थया जनो विमोहमाप्नुयाद्धि चेत् । ततोऽप्यनन्तरं तयैव च स्थितिं लभेत वै ॥
सा क्लेशकारिण्यपि चेत्स्थितिः स्यात्तदा स रोगोऽचलवातनामा ।
निदानविद्भिर्बहुशो भिषग्भिः संकीर्त्तितोऽथापरिवर्त्तकोऽपि ॥ २ ॥
अपि चाचलसंस्थानाह्वयस्तथा तादवस्थ्यगदनामा ।
इत्यभिधानचतुष्टयमुक्तं विज्ञैः क्रियावशतः ॥ ३ ॥
वातागतेश्चापरिवृत्तिहेतोस्तथा समस्थानत एव नूनम् ।
चतुर्विधं नाम च पूर्वभावस्थितेः कृतं वैद्यवरैः सहेतुकम् ॥ ४ ॥

जिस स्थिति में रोगी मूर्च्छित होता है उसी स्थिति को यदि संज्ञा आने पर भी प्राप्त करे और वह स्थिति यदि क्लेशकारिणी हो तो उसे 'अचलवात' रोग कहते हैं। अचल वात के ही अपरिवर्त्तक, अचलसंस्थान, तादवस्थ्यगद ये ४ नाम भी हैं। वात के द्वारा क्रिया न होने से, परिवर्त्तन न होने से, समान अवस्था होने से एवं पूर्व भाव में स्थिति होने से ये चारों नाम सहेतुक हैं ॥ १-४ ॥

अस्य निदानम्—

संचिन्तनाद्धाऽतिभयात्तथा च सङ्क्षीणधातुत्वत एव लोके ।
क्षयाद्धि सत्त्वस्य च बीजदोषादुत्पद्यतेऽद्धाऽचलवातरोगः ॥ ५ ॥

अधिक चिन्ता, अत्यन्त भय, धातुओं की क्षीणता, सत्त्व के क्षय, एवं बीजदोष से अचलवात रोग होता है ॥ ५ ॥

अस्य लक्षणम्—

स्पर्शाज्ञत्वं दृढता पेशीनां स्यादचेष्टितं नियतम् ।
आक्षेपेण विना वै मूर्च्छाऽचलवातसंज्ञके रोगे ॥ ६ ॥
प्राक्संस्थया तु गदिनः स्थितिरित्यस्य विशेषचिह्नमुक्तम् ।
श्वासाधिक्यं जातु क्षुद्रत्वं स्याद्धमन्यां वै ॥ ७ ॥

प्राग् रूपेण विनैव व्याधेः सहसोदयोऽप्यत्र।
ग्रीवास्तम्भः शूलं शिरसि कदाचिच्च चेतसश्चलता ॥ ८ ॥

स्पर्श का ज्ञान न होना, मांसपेशियों की दृढता, नियत रूप से चेष्टा न होना और आक्षेप के विना मूर्च्छा ये सब लक्षण अचलवातसंज्ञक रोग के हैं। रोगी मूर्च्छित होने के पहले जिस स्थिति में था वैसे ही संज्ञा होने पर भी रहे, 'यह इस रोग का विशिष्ट चिह्न तो पहले कहा जा चुका है साथ ही श्वास की अधिकता, नाड़ी में क्षुद्रता, पूर्वरूप के विना ही रोग का सहसा प्रकट हो जाना, ग्रीवा की स्तब्धता, शिर में शूल और कभी चित्त की चञ्चलता ये सब लक्षण होते हैं ॥ ६-८ ॥

अथ [1]ताण्डवरोगनिदानम्

ताण्डवस्य लक्षणम्—

चिरन्तनातङ्कपरानुवन्धतो बलक्षयात्क्रोधमुदोः प्रकर्षतः।
क्रिमेश्चयात् स्वप्ननिरोधहेतुतः प्रकर्षणादप्यतिविड्विवन्धतः ॥ १ ॥
आशाऽतिघातादधिकाभिघातात् स्त्रीणां विशेषेण रजोविकारात्।
अत्युग्रभावान्ननु पृष्ठवंशे कशेरुकाभञ्जनमुद्भवेद् यत् ॥ २ ॥
स देहिनां दुःखकरः परः सदा गदोऽगदङ्कारवरैरुदीरितः।
अकाण्डमेवाङ्गकदम्बताण्डवात्प्रचण्डरीत्या ननु ताण्डवाह्वयः ॥ ३ ॥
कैशोरके वयसि प्रायश एष योषामध्ये विशेषत इहातिजराऽऽतुराणाम्।
नृणां बलापचयतो नितरां प्रजायेतैवामयोऽतिभयदायितया प्रसिद्धः ॥ ४ ॥

अधिक समय तक आतङ्क बना रहने से, बलक्षय से, क्रोध और हर्ष की अधिकता होने से, क्रिमि का संचय होने से, निद्रा को रोकने से, अत्यन्त कर्षण से, अत्यन्त मलबन्ध होने से, आशा का विघात होने से, अधिक आघात (चोट) लगने से और स्त्रियों का अत्युग्र रजोदोष होने से, यह रोग होता है। कभी-कभी इस रोग में पृष्ठवंश की कशेरुकायें टूट सकती हैं। यह रोग अत्यन्त कष्ट देने वाला है। इस रोग में अकाण्डमें अङ्गसमूह के प्रचण्ड रीति से ताण्डव नृत्य करने से यह रोग 'ताण्डव' नामक रोग कहा जाता है। स्त्रियों को यह रोग प्रायः किशोरावस्था में और पुरुषों को वृद्धावस्था में बल की कमी से होता है ॥ १-४ ॥

ताण्डवस्य स्वरूपम्—

आरभ्य वामभुजतः प्रथमं तु प्रायः संजायते तदनु चापरबाहुमध्ये।
संचाल्य तौ तदनु पादयुगं ततोऽङ्गान्येवं प्रचालयति पाण्डवरोग एषः ॥ ५ ॥
तेनामयी न किमपीह हि मुष्टिमध्ये द्रव्यं निधातुमपि पारयति प्रयत्नैः।
नो वा समर्पयितुमात्ममुखे कदाऽपि भक्ष्यान्नमीषदपि ताण्डवपीडिताङ्गः ॥ ६ ॥
नृत्यन्निव प्रचलति प्रसभं विशेषाद् बीभत्सनैकविधचेष्टितमास्यसंस्थम्।
संदर्शयन्नतिचलः सततं च तिष्ठेन्निद्रादशामनुभवन्न भवेत् सकम्पः ॥ ७ ॥

इस रोग में प्रायः प्रथम बाएँ बाहु से प्रारम्भ होकर दूसरे बाहु में कम्प या आक्षेप उत्पन्न होता है। इसके बाद दोनों पैरों को ताण्डव की भाँति चलायमान कर अन्त में सारे अङ्गों को चलायमान कर देता है। इस रोग में रोगी मुष्टि के अन्दर कोई द्रव्य नहीं धारण कर सकता, और न वह थोड़ा भी ग्रास मुख में स्वयं रख सकता है। रोगी विवश होकर ताण्डव की भाँति नाचता

---

१. Chorea.

हुआ चलता है और मुख की मुद्रा वीभत्स रूप से अनेक प्रकार का दिखाता हुआ अत्यन्त सदा चञ्चल अवस्था में रहता है। निद्रा की दशा में कम्प कभी नहीं होता ॥ ५-७ ॥

विमर्श—यह वातिक संस्थान की विकृति से उत्पन्न एक रोग है। किन्त मस्तिष्क आदि किसी वातसंस्थानीय अंगविशेष या उसके किसी अंश में स्पष्ट कोई विकार नहीं प्रमाणित होता अतः अर्वाचीन ग्रन्थों में इसका वर्णन रचना सम्बन्ध विहीन वातिक रोगों में किया गया है।

अथ हृद्यन्त्ररोगनिदानम्

तत्रादावावरणिकलक्षणम्—

वृक्कस्य दोषादपि चामवातात् तथाऽऽर्द्रशीतस्थलसन्निवासात्।
हृत्कोष्ठसंबन्धिकलाविभागे जायेत रोगो भृशदारुणोऽयम् ॥ १ ॥
रोगेण चानेन कला तु तत्र प्रपीड्यते सत्वरमेव नूनम्।
तेनोष्णता स्यादथ शोथदाहौ कोष्ठव्यथा दुर्बलता च गौरवम् ॥ २ ॥
श्वासस्य कृच्छ्रत्वमतीव पीडा हृत्कोष्ठकम्पः कसनं विशेषात्।
नासापथेनास्त्रमपि स्रवेच्च शाखासु शोथोऽनलमन्दताऽपि ॥ ३ ॥

वृक्क के दोष से, आमवात से और आर्द्र तथा शीत स्थल में निवास करने आदि से हृत्कोष्ठ सम्बन्धी कला भाग में यह दारुण 'आवरणिक' हृद्यन्त्र रोग होता है। इस रोग के होने से वहाँ की कला शीघ्र ही प्रपीडित हो जाती है। इससे उष्णता, शोथ, दाह, कोष्ठव्यथा, दुर्बलता, गौरव, श्वास की कृच्छ्रता, अत्यन्त पीड़ा, हृत्कोष्ठ में कम्प, कास, नासा में रक्तस्राव, हाथ-पैरों में शोथ और अग्नि की मन्दता होती है ॥ १-३ ॥

भवेत्तु विषमा गतिर्यदि हि नाडिकायाः क्वचिद्धृदावरणिकस्तदा निगदितो गदः कोविदैः।
चिकित्स्यत इह द्रुतं स किल जातमात्रः सदाऽन्यथा मरणदो नृणां भणित एव चोपेक्षया ॥

उपर्युक्त लक्षणों के साथ-साथ यदि कहीं नाड़ी की गति विषम हो तो पण्डित लोग इसे 'हृदावरणिक' रोग कहते हैं। इस रोग के उत्पन्न होते ही शीघ्र चिकित्सा प्रारम्भ कर देनी चाहिये, उपेक्षा करने से यह मृत्युदायक हो जाता है ॥ ४ ॥

विमर्श—हृदय को बाहर से अच्छादित करनेवाली कला को हृदयावरण (Pericardium), मांसमय मुख्य उपादान को हृन्मांस (Myocardium) एवं हृत्कोष्ठ के भीतर स्थित कला को अन्तःस्था कला (Endocardium) कहते हैं। इन प्रत्येक अवयवों तथा अन्य सूक्ष्म एवं सूक्ष्मतम अवयवों की विकृति से हृद्रोग के अनेक प्रकार अर्वाचीन ग्रन्थों में वर्णित हैं। उन सबका वर्णन करना यहाँ सम्भव नहीं है। विस्तृत वर्णन के लिए 'हृद्रोग' सम्बन्धी अर्वाचीन ग्रन्थों को ही देखना पड़ेगा। किन्तु प्राचीन आचार्यों ने सूत्ररूप में ही सबका निर्देश दोष-भेद के आधार पर संक्षेप में ही किया है। (पूर्वार्ध पृष्ठ ४८१ से ४८६ तक देखिए)।

कोष्ठयहृद्यन्त्ररोगलक्षणम्—

सदाऽभिघातादथवाऽऽमवातात्तथैव पूर्वोदितकारणाद्धि।
प्रजायते हृद्गतकोष्ठमध्ये यतस्ततः कोष्ठयक एष उच्यते ॥ ५ ॥
अस्मिन् गदे स्यादरुचिर्ज्वरोऽथो वैवर्ण्यमङ्गेऽनलसंचयोऽपि।
श्वासोऽथ कम्पः कसनं च दाहो यक्ष्माधिकोष्ठं ननु पूयसंचयः ॥ ६ ॥
आक्षेपमूर्च्छे अपि च प्रलापो नूनं धमन्या विषमा गतिश्च।
अस्माद्गदाद् घोरतरात्कदाचिद् विमुच्यते कोऽपि गदी तु दैवात् ॥ ७ ॥

अभिघात वा आमवात से हृद्गत कोष्ठ के मध्य में यह होता है अतः 'कोष्ठयक' कहा जाता है। इस रोग में अरुचि, ज्वर, अङ्गों की क्षीणता, श्वास, कम्प, कास, दाह, यक्ष्मा, कोष्ठ में पूय का

सञ्चय, आक्षेप मूर्च्छा, प्रलाप और नाड़ी की विषम गति होती है। इस अत्यन्त घोर रोग से कदाचित् ही कोई रोगी दैवात् बच जाता है ॥ ५-७ ॥

विमर्श—यहाँ कोष्ठ का तात्पर्य हृदय के आभ्यन्तर भाग विशेषतः अन्तःस्था कला और विभिन्न छिद्रों के कपाटों से है। (इनके रोगों का विस्तृत वर्णन किसी अर्वाचीन चिकित्सा-ग्रन्थ के हृद्रोगाध्याय में देखें)

पृथुकहृद्यन्त्ररोगलक्षणम्—

मिथ्यानिजाहारविहारहेतोर्हृत्कोष्ठमध्येऽस्रगतिर्यदैव।
स्याद् व्याहता तर्हि समस्तपेशी हृदः प्रयायात्पृथुतामवश्यम् ॥ ८ ॥
ततश्च रुक्कम्पनदुर्बलत्वान्यपि स्युरद्धा हृदये तथैव।
श्वासस्य कृच्छ्रत्वमथो भ्रमश्चारतिः प्रमोहः पृथुकामये हृदः ॥ ९ ॥

मिथ्या आहार-विहार आदि के कारण हृत्कोष्ठ में जब रक्त की गति में व्याघात पहुँचता है तब हृदय की समस्त पेशियाँ मोटी हो जाती हैं। उसमें पीड़ा, कम्प, दुर्बलता, श्वास की कृच्छ्रता, भ्रम, अरति और प्रमोह ये सब लक्षण हो जाते हैं ॥ ८-९ ॥

विमर्श—जब हृदय को अधिक कार्य करना पड़ता है तो आरम्भ में हृन्मांस उपचित होकर मोटा हो जाता है। इसे हृन्मांसोपचिति (Hypertrophy of the heart) कहते हैं। (विस्तृत वर्णन अर्वाचीन ग्रन्थों में देखें)

आयामिकहृद्यन्त्ररोगलक्षणम्—

स्याद् विस्तृतिर्हृदयकोष्ठगता तु यस्मिन्नायामिकः स गदितो गद आमयज्ञैः।
प्रायेण दारुणतया परिवर्णितेऽस्मिन् मूर्च्छा भ्रमः श्वसनहृद्रुतवेपथू च ॥ १० ॥
शून्यत्वमप्यवयवेष्वनलस्य मान्द्यं हानिर्बलस्य पललस्य परिक्षयोऽपि।
उन्निद्रताऽथ सलिलोदररोगजन्मान्यानि स्युरत्र हृदयामयलक्षणानि ॥ ११ ॥

जिसमें हृदय के कोष्ठ की विस्तृति हो जाती है उसे रोगज्ञ लोगों ने आयामिक हृद्यन्त्र रोग कहा है। प्रायः इस दारुण रोग में मूर्च्छा, भ्रम, श्वास, हृदय-कम्प, अङ्गों में शून्यता, अग्नि की मन्दता, बल की हानि, मांस का क्षय, निद्रा का अभाव, जलोदर तथा अन्यान्य हृद्रोग के लक्षण भी होते हैं ॥ १०-११ ॥

विमर्श—पूर्वोक्त हृन्मांसोपचिति के बाद भी जब उसे विश्राम नहीं मिलता और अधिकाधिक कार्य करना पड़ता है तब हृन्मांस-सूत्र लम्बे और पतले हो जाते हैं। हृदय की भित्ति पतली पड़ जाती है, हृदय बहुत चौड़ा हो जाता है। कभी-कभी दुर्बलताजनक विविध कारणों से आरम्भ से ही यह विकार उत्पन्न होता है। इसे आयामिक हृद्रोग (Dilatation of heart) कहते हैं। (विस्तृत विवेचन अर्वाचीन ग्रन्थों में देखें।)

क्षयाद् यतो जायत एष रोगस्ततोऽतिघोरः कथितः परिक्षयः।
हृत्कोष्ठपेश्या इह संक्षयः स्याद् भ्रमोऽवसादोऽपि च दुर्बलत्वम् ॥ १२ ॥
श्वासोऽग्निमान्द्यं हृदयप्रकम्पः शोथस्य नूनं क्रमिकाभिवृद्धिः।
जायन्त एतानि परिक्षयेऽस्मिंस्तथाऽपरेऽपि स्युरुपद्रवाश्च ॥ १३ ॥

यह अत्यन्त घोर रोग हृन्मांस के क्षय से होता है अतः यह 'परिक्षय हृद्यन्त्र' रोग कहा जाता है। इसमें हृत्कोष्ठपेशी का संक्षय होता है और भ्रम, अवसाद, दुर्बलता, श्वास, अग्नि की मन्दता, हृत्कम्प और क्रमिक शोथ की वृद्धि आदि लक्षणों के साथ-साथ अन्य भी उपद्रव होते हैं ॥१२-१३॥

विमर्श—यह भी हृन्मांस की ही विकृति है। विभिन्न औपसर्गिक ज्वर आदि रोगों के विष या मद्य आदि के प्रभाव से अथवा मधुमेह आदि निज विकारों से हृन्मांस का शोथ होकर वा विना शोथ के ही विनाश होता है। इसी को हृन्मांस-परिक्षय (Myocardial degeneration) कहते हैं। मांससूत्रों में होने वाले परिवर्तनों के अनुसार इसके अनेक प्रकार अर्वाचीन ग्रन्थों में वर्णित हैं; उन्हें वहीं देखें।

मेदःसूत्रहृद्यन्त्ररोगलक्षणम्—

यदा तु हृत्कोष्ठगतेषु मांससूत्रेषु मेदःकणसञ्चयः स्यात्।
तदा गदज्ञानविदा स मेदःसूत्राभिधेयो गदितो गदोऽत्र ॥ १४ ॥
अस्मिन् गदे स्याद्धृदयप्रकम्पो मन्दाऽवलोक्येत गतिश्च नाड्याः।
मूर्च्छाऽवसादो नियतं भ्रमश्च बलक्षयोऽलं किल नाडिकानाम् ॥ १५ ॥
अन्ते हृदोऽप्यावरणस्य नूनं संभेदतः स्यात् सहसैव मृत्युः।
सद्यश्चिकित्स्योऽयमतश्चिकित्साविधानदक्षैरतिदारुणो गदः ॥ १६ ॥

जब हृत्कोष्ठगत मांससूत्रों में मेद के कणों का संचय हो जाता है तब उसे 'मेदःसूत्र' नामक हृद्यन्त्र रोग कहते हैं। इस रोग में हृदय में कम्प, नाडी की गति की मन्दता, मूर्च्छा, अवसाद, भ्रम तथा नाडी की क्षीणता दिखाई देती है और अन्त में हृदय के आवरण (कला) का भेद होने से सहसा मृत्यु हो जाती है। अतः चिकित्सा में चतुर वैद्यों को इस अति दारुण रोग की सद्यः चिकित्सा करनी चाहिये ॥ १४-१६ ॥

विमर्श—विभिन्न कारणों से एवं मेदस्वी व्यक्तियों में हृन्मांससूत्रों के बीच मेद का सञ्चय होकर मांस तन्तुओं का विनाश होता है। इसे आधुनिक विद्वान् Fatty Degeneration of heart कहते हैं।

विक्षेपिकाहृद्यन्त्ररोगलक्षणम्—

हृदाक्षेपिका यत्र पीडा भवेद्वै स विक्षेपिकाख्यो गदः संप्रदिष्टः।
प्रजातेऽत्र रोगेऽतिघोरे नृदेहे त्वधोभागमध्ये ह्युरोऽस्थ्नोऽधिकोष्ठम् ॥ १७ ॥
अथो वामबाहौ तथा वामभागस्थितांसास्थिमध्येऽपि पृष्ठप्रदेशे।
अधिग्रीवमुग्रा भृशं प्राणमर्मप्रपीडिन्यवश्यं प्रजायेत पीडा ॥ १८ ॥
समाकर्षतोदौ तथा भेददाहावभीक्ष्णं च निःश्वासरोधोऽथ मोहः।
भृशं निर्गमः स्वेदराशेरथाध्मानमानाहवैवर्ण्यकार्श्यान्यवश्यम् ॥ १९ ॥
स्युरत्रारुचिश्चेन्द्रियाणां क्रमेण प्रणाशोऽपि मृत्युं लभेताजिताक्षः ॥ २० ॥

जिसमें हृदय में आक्षेप पैदा करने वाली पीड़ा हो उसे विक्षेपिका हृद्यन्त्र रोग कहते हैं। इस अत्यन्त घोर रोग के उत्पन्न होने पर मनुष्यों के शरीर में उरोऽस्थि के अधोभाग के मध्य में, एवं कोष्ठ, वाम बाहु, वाम भाग में स्थित स्कन्ध की अस्थि, पृष्ठदेश तथा ग्रीवा में प्राण तथा मर्म को अत्यन्त पीडित करने वाली पीडा उत्पन्न हो जाती है और आकर्षण (खिंचाव), तोद (सूई चुभोने की सी पीडा), भेद, दाह, श्वासावरोध, मोह, स्वेद का अत्यन्त निकलना, आध्मान, आनाह, विवर्णता, कृशता, अरुचि और इन्द्रियों का क्रमिक नाश ये लक्षण होते हैं। अन्त में इससे अजितेन्द्रिय रोगी की मृत्यु हो जाती है ॥ १७-२० ॥

विमर्श—इसे प्रावेगिक हृच्छूल (Anginapectoris) भी कहते हैं। इसका कुछ वर्णन पूर्वार्ध पृष्ठ ४८३ पर तथा विस्तृत वर्णन अर्वाचीन ग्रन्थों में देखें।

उपसंहारः—

स्युरेवं भृशं हृद्गदा दारुणा वै सुसाध्यास्त एवात्र वैद्यैर्नवा ये।

तथा वर्जिताः सर्वदोपद्रवैर्वा चिकित्साचतुष्पादवाप्तिप्रसङ्गात् ॥ २१ ॥
अतोऽन्ये चिरोत्था निजोपद्रवैर्वा युताः सर्वहेतुप्रजाताश्च ये स्युः ।
क्रमेणैव कृच्छ्रास्तथा ते तु याप्या असाध्या बुधैर्बोधिता नूनमेव ॥ २२ ॥

उक्त हृद्यन्त्र रोग अत्यन्त दारुण होते हैं। वैद्यों के द्वारा वे ही सुसाध्य हैं जो नये हैं और सर्वोपद्रव से रहित तथा चिकित्सापाद चतुष्टय (ओषधि, वैद्य, परिचारक, रोगी) की उत्तमता से युक्त हैं। इससे अन्यथा जो प्राचीन या अपने उपद्रवों से युक्त वा सभी दोषों से उत्पन्न हुए हैं। क्रम से कृच्छ्रसाध्य, याप्य तथा असाध्य हैं ॥ २१-२२ ॥

विमर्श—इनके अतिरिक्त भी अनेक विकार होते हैं, प्राचीन आचार्यों ने इन सभी का समावेश केवल पाँच भेदों में किया है। लक्षणानुसार इन रोगों में दोष की कल्पना कर लेनी चाहिए।

अथ यकृद्रोगनिदानम्

यकृतः परिचयः—

यकृतोऽवस्थितिरनिशं दक्षिणतः स्यादधो हृदयात् ।
तत्र तु विविधा रोगा जायेरन् भूरिदुःखदा नियतम् ॥ १ ॥

हृदय के नीचे दक्षिण भाग में यकृत् (Liver) की अवस्थिति है जिसमें अनेक प्रकार के अत्यन्त दुःख देने वाले रोग उत्पन्न होते हैं ॥ १ ॥

यकृद्रोगनिदानम्—

मद्यातिपानादथ वेगरोधादत्युष्णगुर्वन्ननिषेवणाच्च ।
स्वापाद्दिवा जागरतोऽथ रात्रावतिव्यवायादभिघाततो वा ॥ २ ॥
गुरून् पदार्थान् वहतां नराणां सदैव मार्गक्रमणे रतानाम् ।
तथाऽपरैर्घोरतरैश्च कर्मभिर्भवन्ति नूनं यकृदुत्थिता गदाः ॥ ३ ॥

अत्यन्त मद्यपान करने से, मल-मूत्रादि वेगों का अवरोध होने से, अधिक उष्ण तथा गुरु अन्न भोजन करने से, दिन में सोने से, रात्रि में जागने से, अत्यन्त मैथुन करने से, अभिघात से, तथा भारी बोझ ढोने वाले और अधिक पैदल चलने वाले व्यक्तियों को तथा अन्यान्य और भी घोरतर कर्मों के करने से यकृत्संबन्धी रोग पैदा होते हैं ॥ २-३ ॥

म्लानावस्थायां यकृतो लक्षणम्—

म्लाने यकृत्यथ भवेच्छकृदप्रवृत्तिः पित्ताल्पताऽप्यतितृषाऽऽविलमूत्रता च ।
देहस्य कर्दमसमप्रभताऽथ पाण्डुत्वाध्मानसादवमनान्यनलस्य मान्द्यम् ॥ ४ ॥
प्रातश्च तिक्तमुखता रसना मलाढ्योद्गारो भृशं कठिनता धमनीगता स्यात् ।
आकृष्टिवद्बहुरुजाऽपि वमेश्चिकीर्षालिङ्गान्यमूनि नितरां ननु संभवेयुः ॥ ५ ॥

यकृत् में म्लान होने पर (उसकी क्रिया ठीक न होने से) मल की प्रवृत्ति न होना, पित्त की कमी, अत्यन्त तृषा, मूत्र का आविल रहना, शरीर का वर्ण कीचड़ की भांति हो जाना, पाण्डुता, आध्मान, अवसाद, वमन, अग्नि की मन्दता, प्रातःकाल मुख का कडुआपन, जिह्वा का अधिक मलयुक्त रहना, अत्यन्त उद्गार, नाड़ी की गति कठिन होना, आकर्षण की भाँति अधिक पीड़ा होना, वमन करने की इच्छा होना, ये सब लक्षण प्रकट होते हैं ॥ ४५ ॥

वृद्धिदशायां यकृतो लक्षणम्—

वृद्धिं गते यकृति चोरुरुजाऽप्युरोऽस्थ्नि स्कन्धेऽधिदक्षिणमथापि च दक्षसक्थ्नि ।
जायेत जाड्यमपि दक्षिणबाहुमध्ये वैवर्ण्यमप्यधिशकृत् कसनं ज्वरश्च ॥ ६ ॥
तिक्तास्यताऽप्यरतिलोहितमूत्रते वा हानिर्बलस्य तनुबद्धपुरीषताऽपि ।
पीताक्षताऽथ सततं शयनं तु सव्यपार्श्वेन चात्र गदिनः सुखलिप्सया स्यात् ॥ ७ ॥

निद्रानाशः कामला तोदवेदौ दाहः शोथो जायते चात्र तृष्णा।
प्राणघ्नी स्याद्विद्रधिर्वै यकृत्स्था प्राणी मुच्येतात्र कश्चित् सुभाग्यात् ॥ ८ ॥

यकृत के बढ़ जाने पर छाती की अस्थि, दक्षिण स्कन्ध और दक्षिण पैर में अधिक पीड़ा, दक्षिण बाहु में जड़ता, मल की विवर्णता, खाँसी, ज्वर, मुख में कड़वापन, अरति (बेचैनी), रक्तमूत्रता, बल की हानि, थोड़ी मलबद्धता, आँखों का पीलापन, बायें करवट लेटने से आराम मिलना, निद्रा-नाश, कामला, तोद, भेद, दाह, शोथ और तृष्णा अदि लक्षण होते हैं, कभी-कभी यकृत् में विद्रधि हो जाती है, यह अत्यन्त घातक होती है, भाग्य से ही कोई प्राणी बच जाता है ॥

विमर्शः—यकृत् रोगों को कारण और सम्प्राप्तिभेद से अर्वाचीन ग्रन्थों में अनेक प्रकार का कहा गया है। सभी में प्रायः न्यूनाधिक रूप में पूर्वोक्त लक्षण ही होते हैं। केवल साध्यासाध्यता की दृष्टि से ही प्रधान अन्तर होता है। पूर्वोक्त यकृत् रोगों में पित्ताशय—जो यकृत् का ही एक उपांग है—के रोगों को भी समाविष्ट समझना चाहिए। इनका संक्षिप्त निर्देश अर्श (पू. पृ. १७७), कामला (पू. पृ. २३३) और यकृदाल्युदर (उत्त. पृ. २७) में देखें और विस्तृत विवेचन किसी अर्वाचीन चिकित्सा-ग्रन्थ में देखें।

अथ वृक्करोगनिदानम्[1]

वृक्करोगस्य पूर्वरूपम्—

निद्रानाशो वह्निमान्द्यं च शोथो नेत्रे चास्ये पादयोर्वृक्करोगे।
नाडी स्तब्धा वेगयुक्ताऽथ चोष्णा त्वाचं रौक्ष्यं पूर्वरूपं प्रदिष्टम् ॥ १ ॥

वृक्करोग की पूर्वावस्था में निद्रानाश, अग्नि की मन्दता, नेत्र, मुख और पैरों में शोथ, नाड़ी की स्तब्धता तथा वेग से युक्त एवं उष्ण होना और त्वचा की रूक्षता ये सब लक्षण होते हैं ॥ १ ॥

वृक्करोगस्य लक्षणम्—

रक्तह्रासात्पाण्डुवर्णत्वमास्ये स्वेदाभावस्त्वाचरौक्ष्याग्निमान्द्ये।
पीडा कट्यां चोदरे वृक्कदेशे नाडी नूनं वेगयुक्ता भवेच्च ॥ २ ॥
मूत्रं शश्वद्बिन्दुरूपेण चोष्णं पीडायुक्तं वृक्करोगे स्रवेद्धै।
एवं तीव्रं लक्षणं वृक्कयुग्मे जातु स्यादेवाश्मरीयोगतोऽपि ॥ ३ ॥
शिश्नस्याग्रे जायते चातिपीडा मूत्रं रक्तेतान्वितं स्यात् कदाचित्।
शैत्योपेतं पाणिपादं भवेद्धै दाहश्चाल्पो मूत्रकाले ध्वजाग्रे ॥ ४ ॥
वृक्कद्वन्द्वे कार्यशैथिल्यहेतोर्घोरः स्वैःस्वैर्लक्षणैर्लक्ष्यमाणः।
रोगः प्लीह्नो ह्यकृत्सम्भवो नुर्वृक्कप्रस्तस्येति चिह्नं प्रदिष्टम् ॥ ५ ॥
नादः कर्णे नेत्ररोगो ध्वजोत्थो भङ्गः शाखागौरवं चापि मूर्च्छा।
ग्रीवामूर्ध्नश्चांसदेशेऽपि पीडा मोहो लिङ्गान्येवमेतानि च स्युः ॥ ६ ॥
विशेषतो वृक्करोगो रक्तस्य परिवर्त्तनात्। नराणां जायते देहे भिषजामिति निर्णयः ॥ ७ ॥

रक्त का ह्रास हो जाने से मुख में पाण्डुता, पसीने का न निकलना, त्वचा की रूक्षता, अग्निमान्द्य, कटि, उदर तथा वृक्कदेश में पीड़ा, नाड़ी का वेगयुक्त होना और निरन्तर बूँद-बूँद (थोड़ी मात्रा में) उष्ण तथा पीडायुक्त मूत्र का निकलना, ये सब लणण वृक्करोग में होते हैं। जब वृक्कों में अश्मरी हो जाती है तो उक्त लक्षणों की तीव्रता होती है और शिश्न के अग्रभाग में अत्यन्त पीड़ा होती है तथा मूत्र रक्तयुक्त हो जाता है। हाथ-पैरों में शीतलता तथा मूत्रकाल में शिश्नाग्र में थोड़ा-थोड़ा दाह होता है। दोनों वृक्कों में शिथिलता आ जाने से अपने-अपने लक्षणों से युक्त

1. Kidney diseases.

प्लीहा तथा यकृत् के रोग उत्पन्न हो जाते हैं। साथ ही कर्णनाद, नेत्ररोग, ध्वजभङ्ग, हाथ-पैरों में गुरुता, मूर्च्छा, ग्रीवा, मस्तक तथा स्कन्ध-देश में पीड़ा और मोह ये सब लक्षण भी वृक्क रोग में होते हैं। विशेषतः वृक्क रोग रक्त की परिवृत्ति से होता है, ऐसा वैद्यों का निर्णय है॥ २-७॥

विमर्श—वृक्कों द्वारा ही मूत्र का उत्पादन होता है; अतः इनके विकारों में मूत्र में अनेक परिवर्तन हो सकते हैं। किन्तु मूत्र में न्यूनाधिक मात्रा में शुक्लि (Albomin) नामक एक प्रोभुजिन (Protien) जाति का पदार्थ अवश्य मिलता है। मूत्र में इसकी उपस्थिति—जो कि स्वाभाविक मूत्र में बिल्कुल नहीं होती—को अर्वाचीन विद्वान् ओजोमेह (Albuminurea) कहते हैं। इसका वर्णन आगे किया जायगा।

सामान्य रूप से वृक्क के शोथ को नेफ्राइटिस (Nephritis) कहते हैं और वृक्क के विभिन्न सूक्ष्म अवयवों की विकृति एवं कारणों के अनुसार वृक्क रोग में अनेक भेद अर्वाचीन ग्रन्थों में वर्णित हैं (उन्हें वहीं देखना चाहिये) किन्तु सशोथ (Hydraemic) तथा अशोथ (Azotaemic) तथा तरुण और जीर्ण प्रकार विशेष महत्त्व के हैं। रोग की अवस्था और प्रकार के अनुसार कुछ अन्तर होते हुए भी निम्नलिखित लक्षण वृक्करोग में प्रायः अवश्य होते हैं:—

(१)—शोथ—अक्षिकूट में विशेषतः प्रभातकाल में शोथ होता है जो क्रमशः समस्त शरीर में व्याप्त हो सकता है। (शोथ की उत्पत्ति के कारणों का सोपपत्तिक वर्णन उत्त० पृष्ठ ४८ से देखें)

(२) बहुमूत्रता या स्वल्पमूत्रता (Polyurea or anurea)

(३) मूत्र का आपेक्षिक घनत्व प्रायः कम होना (उदकमेह उत्त. पृ. १० देखें)

(४) मूत्र में शुक्लि और निर्मोक (Casts) एवं कभी-कभी धूम्राभ रक्त की उपस्थिति। (देखें लालामेह और माञ्जिष्ठमेह; उत्तरार्ध पृष्ठ १३ और १५) इनकी अधिकता से मूत्र का आपेक्षिक घनत्व अधिक भी हो सकता है।

(५) रक्तभार की अधिकता (High blood pressure) तथा इसके परिणामस्वरूप उत्पन्न विविध लक्षण।

अथौजोमेहनिदानम्[1]

अथामवातादभिघाततो वाऽजीर्णादिकाज्जाठरवह्निमान्द्यात्।
शोथात्तथा वा विषमज्वराच्च क्षयाच्च कासप्रभृतेर्नराणाम्॥१॥
रक्तस्रोतोविक्रियातोऽस्रदोषात् किंवा वृक्कद्वन्द्वदुष्ट्या विशेषात्।
पूयेनास्रेणाथवा वै लसीकाद्वारा दुष्टे रेतसा वाऽपि मूत्रे॥२॥
क्षारेण किंवा कटुता कषायेण वर्जितैर्गर्भवतीजनस्य।
ओजस्करैर्वा मधुरैः सदैवान्नपानजातैरतिमात्रभक्षितैः॥३॥
गुरोस्तथा पर्युषितस्य चान्नस्य सेवनादप्यतिभोजनाद्वा।
शिशोश्च हंसस्य विशिष्य गोधूमनव्यधान्यप्रभृतेश्च सेवनात्॥४॥
अतीव शीते सलिलेऽपि दुष्टे स्नानेन पानेन च वाऽवगाहनात्।
एभिर्निमित्तैरपरैस्तथौजोमेहो भवेद्वै विकृतादिहौजसः॥५॥

आमवात, अभिघात, अजीर्ण, अग्निमान्द्य, शोथ, क्षय तथा कास आदि से एवं रक्तस्रोत की विक्रिया, रक्तदोष, विशेषतः दोनों वृक्कों की दुष्टि होने पर पूय, रक्त अथवा लसीका द्वारा पुरुषों के वीर्य या मूत्र के दूषित होने पर एवं गर्भवती स्त्री के क्षार, कटु तथा कषाय से रहित मधुर तथा ओजस्कर पदार्थ एवं गुरु तथा पर्युषित अन्न के सेवन, अधिक अन्न-भोजन, हंस के बच्चों का मांस,

---

१. Albuminurea शुक्लिमेह या लालामेह (उत्त. पृ. १२)

विशेषत। गोधूम आदि नवीन धान्य के सेवन, अत्यन्त शीतल एवं दुष्ट जल में स्नान तथा अवगाहन आदि करने से ओज की विकृति होने पर ओजोमेह उत्पन्न होता है १-५॥

आयुर्वलयोर्नितरां कृन्तननिपुणो विशेषतो नृणाम् ।
आमय एष उदारौरायुर्वेदस्य कोविदैरुदितः॥ ६॥

वैद्यों ने इस रोग को मनुष्यों के आयु तथा बल को नाश करने में प्रधान कारण बताया है।

पुनश्च तस्य हेतुपूर्वकरूपवर्णनम्—

शारीरिकश्रमवशादथवाऽपरस्माद्धेतोर्द्रुतं रुधिरसंचरणाज्जनानाम् ।
किंवा विपर्ययवशात्प्रकृतेः किलौजो मूत्रेण सार्द्धमतिदुष्टिमितं स्रवेद्वै ॥ ७॥

शारीरिक श्रमवश अथवा अन्य कारणों से शीघ्र-शीघ्र रुधिर का संचार होने से किंवा वृक्कों की प्रकृति का विपर्यय होने से मनुष्यों की मूत्र के साथ ,ओज निकलने लगता है॥ ७॥

हंसाण्डसंस्थितसमुज्ज्वलभागतुल्यं किंवाऽपि तण्डुलजलप्रतिमं च शुक्लम् ।
ओजःस्थितं भवति रूपमिदं विकृत्या मूत्रेण सार्धमभियाति नहि प्रकृत्या॥ ८॥

हंस आदि के अण्डों में स्थित श्वेत भाग की तरह किंवा चावल के धोवन के सदृश शुक्ल ओज का रंग होता है जो विकृति के कारण मूत्र के साथ निककता है। स्वभावतः मूत्र के साथ नहीं निकलता॥ ८॥

अस्य साध्यादिकम्—

मेदःक्षयो यदि भवेदरुचिर्ज्वरो वा शोथोऽग्निमान्द्यमपि तर्हि न साध्य एषः ।
दुःसाध्य एव कथितोऽत इहान्यथौजोमेहो भिषग्भिरथ न क्वचिदाशु साध्यः॥ ९॥

ओजोमेह यदि मेद का क्षय, अरुचि, ज्वर, शोथ और अग्निमान्द्य हो तो असाध्य होता है और इससे अन्यथा होने पर दुःसाध्य होता है अर्थात् ओजोमेह कभी सुखसाध्य नहीं होता॥ ९॥

अथ लसीकामेहनिदानम्

अनूपदेशोद्भवमीनमांसादिकादनाद्वाऽमितभोजनाद्वा ।
क्लिन्नं सदा पर्युषितं भृशाभिष्यन्दि प्रकामं मधुरं गरीयः॥ १॥
अन्नं विशेषाद्रसनाऽतिलौल्यात् समश्नतामत्र नृणामवश्यम् ।
तथा च शारीरपरिश्रमं वा ह्यकुर्वतां वा मनसोऽधिकश्रमात्॥ २॥
प्रदूषितो हेतुभिरेभिरन्यैः पाकाशयश्चापि यकृन्नितान्तम् ।
वृक्कद्वयेऽथापि च मूत्रकोषे क्षतं समुत्पादयतो विशेषतः॥ ३॥
ततश्च मूत्रं तरलं सरक्तं लसीकया वा सहितं च मेदसा ।
क्वचिद्घनं स्थूलमथापि सूत्रवज्जतूकवारिप्रतिमं प्रवर्त्तते॥ ४॥
वैशिष्ट्यतोऽस्मिन्नपि दोषदूष्ययोर्ह्रासं प्रवृद्धिं च सदैव लक्षयेत् ।
कुर्याच्चिकित्सामवगत्य वैद्यो मूत्रस्थितं वर्णविशेषमेव॥ ५॥

अनूप देशोत्पन्न मत्स्य-मांसादिक भोजन करने से या अमित भोजन करने से रसना की लोलुपता से अत्यन्त क्लिन्न तथा पर्युषित अधिक अभिष्यन्दि, मधुर तथा अत्यन्त गुरु अन्न भोजन करने से और शारीरिक प्ररिश्रम नहीं करने से अथवा मानसिक श्रम अधिक करने से तथा इस प्रकार के अन्यान्य भी हेतुओं से पाकाशय तथा यकृत् नितान्त दूषित होकर वृक्कद्वय और मूत्रकोश में विशेष रूप से क्षत उत्पन्न कर देते हैं। उसके बाद मूत्र तरल, रक्त, लसीका तथा मेद के सहित घन, स्थूल और सूत्रवत् लाक्षारस के समान निकलने लगता है। वैद्य को चाहिये कि वह रोग में दोष तथा दूष्य की ह्रास तथा वृद्धि का लक्ष्य रखते हुये मूत्रस्थित वर्ण की विशेषता को समझ कर चिकित्सा करे॥ १-५॥

वातजस्य तस्य लक्षणम्—

वातोपसृष्टेऽत्र भवेद्धि मूत्रं सशोणितं पूर्णतयाऽम्लगन्धकम् ।
मलावरोधोऽपि च सन्धिवृन्दविश्लेषणं चाप्युपजायतेऽद्धा ॥ ६ ॥
मुहुर्मुहुर्मूत्रमतिप्रवर्त्तते गदे त्वमिक्षाजलसंनिभं सदा ॥ ७ ॥

वातिक लसीका मेह में मूत्र रक्तयुक्त तथा अम्ल गन्धयुक्त होता है और मल का अवरोध तथा सन्धिसमूह का विघटन होने लगता है। बारंवार मूत्र की प्रवृत्ति होती है, जो अमिक्षा (नांस धोने के) जल के समान होता है ॥ ६–७ ॥

पित्तजस्य लक्षणम्—

घनं पूतियुक्तं च दुर्गन्धपूर्णं भवेत् पैत्तिके रोगिमूत्रं च पूर्णम् ।
तथाऽऽस्यस्य वैरस्यमत्यर्थमेव प्रदाहश्च हस्ताङ्घ्रिमध्ये सदैव ॥ ८ ॥

पैत्तिक लसीका मेह में रोगी का मूत्र घन, पूतियुक्त और दुर्गन्धपूर्ण होता है। मुख में विरसता बनी रहती है और हाथ आदि में प्रदाह सदा रहा करता है ॥ ८ ॥

श्लैष्मिकस्य लक्षणम्—

कफेनोपसृष्टेऽत्र शुक्लं तु मूत्रं भवेत्स्वच्छमत्यर्थमद्धाऽधिपात्रम् ।
निशि स्थापितं प्रातरेवोपरिस्थं तदच्छं घनं सर्वथा चाप्यधःस्थम् ॥ ९ ॥
कटौ वङ्क्षणेऽनुक्षणं चापि पीडा प्रजायेत तीव्रोऽन्नविद्वेष एव ।
इदं लक्ष्म सर्वं कफेनोपसृष्टस्य मेहस्य चोक्तं लसीकाऽभिधस्य ॥ १० ॥

कफज लसीका मेह में मूत्र का वर्ण श्वेत तथा अत्यन्त स्वच्छ होता है। पात्र में रात्रि भर मूत्र रहने पर प्रातःकाल ऊपर का भाग स्वच्छ तथा नीचे घन भाग जमा होता है। कटि तथा वङ्क्षण प्रदेश में प्रतिक्षण पीड़ा रहती है तथा तीव्र अन्नविद्वेष बना रहता है ॥ ९–१० ॥

द्वित्रिदोषजयोर्लक्षणम्—

द्विदोषोत्थितेऽथ त्रिदोषोत्थितेऽद्धा यथादोषमूह्यं तयोर्लक्षणं वै ।
पुरा वर्णितं यत् पृथग्दोषरूपं तदेवात्र बोध्यं यथावद्विमिश्रम् ॥ ११ ॥

द्विदोषज तथा त्रिदोषज लसीका मेह में दोषानुसार लक्षणों का ज्ञान करना चाहिये। पूर्व में पृथक् पृथक् दोषों के जो लक्षण कहे गये हैं, वे ही लक्षण यहाँ भी दोषानुसार समझ लेना चाहिये ॥ ११ ॥

साध्यासाध्यलक्षणम्—

लसीकाऽभिधोऽयं तु मेहो हि यूनां बलेनान्वितानां विशेषान्नवोत्थः ।
अपि प्रायशः साध्य एवामयज्ञैर्भिषग्भिर्जनैर्बोधितो बुद्धिमद्भिः ॥ १२ ॥
स एवाथवा दुर्बलानां तु वृद्धात्मनां नैव साध्यः कदाचित् प्रदिष्टः ।
क्वचिच्चामयोऽयं गतः प्रौढभावं प्रशान्तिं प्रयायात् सुपथ्यस्य योगात् ॥ १३ ॥
पुनर्दैवदुर्दृष्टितो रोगयुक्तं स एवाधिगत्योत्थितिं स्वामवश्यम् ।
नयत्येव कालान्तरं चान्तकस्यान्तिके सच्चिकित्सामतिक्रम्य सर्वाम् ॥ १४ ॥

युवा तथा बलवानों में नवीन उत्पन्न हुआ यह लसीका-मेह प्रायः साध्य होता है। किन्तु वही यदि दुर्बल अथवा वृद्धों में उत्पन्न हो तो असाध्य हो जाता है। क्वचित् यह रोग बढ़ जाने पर सुपथ्य करने से एक बार तो शान्ति प्राप्त कर लेता है किन्तु यदि पुनः दुर्भाग्यवश कुपथ्य सेवन से बढ़ जाता है तो निश्चय ही रोगी का प्राण लेता है, चाहे कितनी भी चिकित्सा की जाय सब निष्फल हो जाती है ॥ १२–१४ ॥

विमर्शः—इसे रसमेह (Chyluria) भी कहते हैं। प्राचीन आचार्यों ने इसका समावेश वसामेह और मज्जमेह में किया है। (पृष्ठ १४ उत्तरार्ध देखें)

अथ मूत्रातिसारनिदानम्

तस्य निदानम्—

अभिष्यन्दिगुर्वन्नसंभोजनाद्वा श्रमाभावतोऽथो विलासाद्विशेषात्।
विचारं विना मैथुनाद् मद्यपानाज्जलस्यातिदुष्टस्य संसेवनाद्वा ॥ १ ॥
गुडोत्थस्य वै वस्तुनो भोजनाद्वा यकृद्दुष्टिहेतोश्च मर्माभिघातात्।
विकारादयो नाडिकामण्डलस्याभिचारप्रयोगाद्भयाच्छोकतो वा ॥ २ ॥
सदा मानसस्य प्रवृत्तेर्भृशं विषयेषु स्वकीयेषु वेगावरोधात्।
गराख्यस्य नूनं विषस्यापि योगाद् दिवास्वापतश्चातिनिद्राप्रसङ्गात् ॥ ३ ॥
चिरं रोगिलोकस्य सेवाविधानात् तथा पत्तने सर्वदा संनिवासात्।
अतीवोष्मसंतप्तदेहस्य शैघ्र्यात् सदा शीतसंसेवनादेव नूनम् ॥ ४ ॥
तथा चेदृशैः सेवितैश्चातिमात्रं निमित्तैरिहान्यैर्गदः प्रायशोऽयम्।
प्रजायेत नृणां तनावेव मूत्रातिसाराभिधस्तस्य संप्राप्तिरग्रे ॥ ५ ॥

अभिष्यन्द-कारक और गुरु अन्न का भोजन करने से, श्रम न करने से, विशेष विलासिता के कारण अविचार मैथुन करने से, मद्यपान तथा अति दुष्ट जल का सेवन करने से, गुड़ की बनी वस्तुओं के सेवन करने से, यकृत् की दुष्टि होने से, मर्म में अभिघात होने से, नाडी-मण्डल के विकार से, अभिचार-प्रयोग से, भय से, शोक से, मानसिक विषयों में मन की सदा अधिक प्रवृत्ति रहने से, वेगावरोध से, 'गर' संज्ञक विष का प्रयोग करने से, दिन में या अधिक सोने से, रोगियों की निरन्तर सेवा करने से, घनी आबादी में सदा निवास करने से, अत्यन्त ऊष्मा से शरीर के तप्त रहने पर ही शीघ्रता से शीत का सेवन करने से तथा इसी प्रकार के अन्यान्य कारणों से भी मूत्रातिसार रोग उत्पन्न होता है ॥ १-५ ॥

तस्य संप्राप्तिः—

उपर्युक्तहेतोरतीव प्रसङ्गाद् नृणां सर्वदेहस्थितोऽब्धातुरेव।
गतः क्षोभभावं द्रुतं सोऽतिमात्रं समस्ताङ्गतः प्रस्रवत्याश्ववश्यम् ॥ ६ ॥
ततः प्रच्युतः स्थानतः स्वात्स मूत्रपथं याति तेनातिमात्रं प्रसन्नम्।
सितं शीतलं गन्धशून्यं च पीडा-विहीनं क्वचिन्मन्ददाहं कुगन्धम् ॥ ७ ॥
गदेनार्दितानां स्रवत्येव मूत्रं सदैवेदृशं पूरुषाणां विशेषात्।
मयेत्थं च सद्भिर्भिषग्भिस्तु मूत्रातिसारस्य संप्राप्तिरुक्ता प्रदिष्टा ॥ ८ ॥

उपर्युक्त हेतुओं का अधिक प्रसंग होने पर देह में स्थित जो जल धातु है वह शीघ्र ही क्षोभ को प्राप्त होकर समस्त अङ्ग से अधिक प्रस्रुत होने लगता है और उसके बाद यह अपने स्थान में प्रस्रुत होकर मूत्रमार्ग में पहुँचता है जिससे श्वेत, शीतल, गन्ध और पीड़ा रहित, तथा कभी-कभी मन्द दाह से युक्त एवं कुत्सित गन्धवाला मूत्र निकलने लगता है। यही सद्वैद्यों द्वारा निर्दिष्ट इस रोग की संप्राप्ति है ॥ ६-८ ॥

मूत्रप्रस्रवणमानम्—

अहोरात्रमध्ये चतुःप्रस्थतुल्योन्मितं मूत्रमस्मिञ्जनानां स्रवेद् वै।
निशि स्थापितं प्रातरालोकितं तद् घनं निम्नभागे ह्युपर्यच्छमस्तु ॥ ९ ॥

मूत्रातिसार में पुरुष को दिन रात्रि के अन्दर ४ प्रस्थ परिमाण के लगभग मूत्र निकलता है। उसे रात्रि में पात्र में स्थापित रखने पर प्रातःकाल वह निचले भाग में घना तथा ऊपर स्वच्छ हो जाता है ॥ ९ ॥

मूत्रातिसारलक्षणम्—

भवेन्मूत्रमार्गेऽति कण्डूस्तथा पिडिकोत्पत्तिरद्धाऽथवा दुःक्षतं च।
तथा तत्र चर्मक्षयो येन रोगी भृशं चावसीदेद्रुजा तज्जया तु ॥ १० ॥
अथाङ्गेषु दाहस्तृषा चाधिकाऽपि रसज्ञाऽपि शुष्का चिता कण्टकैश्च।
क्वचित्तीव्रताऽग्नेः क्वचिद्वाऽग्निमान्द्यं प्रजायेत कार्श्यं तथा विड्विबन्धः ॥ ११ ॥
दृशोर्म्लानता रूक्षताधित्वचं पेशिकाः कोमलाश्चातिशैथिल्यभाजः।
शिरोघूर्णनं चालसत्वं च संकोचभावो हृदो मैथुनाशक्तता च ॥ १२ ॥
बलक्षीणतोद्वेग आस्यस्य मालिन्यमेवारतिः स्वीयकर्त्तव्यकृत्ये।
परिक्षीणता मेदसश्चाधिकाऽऽस्ये प्रशोषस्तथा तालुनि स्यादवश्यम् ॥ १३ ॥
इतीमानि चिह्नानि मूत्रातिसारोदितानीह बोध्यानि चाद्धाऽखिलानि।
तनौ चाबलानां गदोऽयं तु सोमक्षयात् सोमनामाऽपि वैद्यैः प्रदिष्टः ॥ १४ ॥
अतीव प्रवृद्धे क्रमेणामयेऽस्मिन् स्रवेन्मूत्रमत्यर्थमेवाप्यभीक्ष्णम्।
अतो रोगमेनं तु वैद्या हि मूत्रातिसारं च रोगानुसारेण प्राहुः ॥ १५ ॥

मूत्रमार्ग में अत्यन्त खुजली तथा पिडकाएँ निकलती हैं अथवा दुष्टक्षत तथा चर्मक्षय हो जाता है जिससे रोगी तज्जन्य पीडा से अत्यन्त अवसन्न हो जाता है। रोगी के अङ्गों में दाह, अधिक तृषा, जिह्वा काँटों से व्याप्त, सूखी, अग्नि की कभी तीव्रता व कभी मन्दता, कृशता, मलबन्ध, आँखों की म्लानता, त्वचा में रूक्षता होती हैं, पेशियाँ कोमल तथा अधिक शिथिल हो जाती हैं एवं शिर का घूमना, आलस्य, हृदय का संकुचित होना, मैथुन-शक्ति का अभाव, बलक्षीणता, उद्वेग, मुख की मलिनता, अपने कार्यों में अरति, मेद की अत्यन्त क्षीणता, मुखशोष तथा तालुशोष होते हैं। स्त्रियों के शरीर में इसी मूत्रातिसार को सोमरोग कहते हैं। इस रोग के अत्यन्त बढ़ जाने पर निरन्तर अत्यन्त मूत्रस्राव होता रहता है ॥ १०–१५ ॥

मूत्रातिसारस्योपद्रवाः—

बलस्यातिनाशस्तृषा चातिघोरा प्रलापोऽपि मूर्च्छाऽथ वीसर्प एव।
क्षतं वा क्षयो दुर्व्रणश्चापि नूनमभिन्न्यासरोगादयोऽस्मिन् गदे तु ॥ १६ ॥
भिषग्भिः प्रदिष्टा विशेषात्तु चोपद्रवा एत एभिस्तु मूत्रातिसारी।
उपेतोऽभ्युपैतीह शीघ्रं विहाय स्वलोकं तु कीनाशलोकं मनुष्यः ॥ १७ ॥

अत्यधिक बल का नाश, घोर तृषा, प्रलाप, मूर्च्छा, वीसर्प, क्षत वा क्षय, दुष्ट व्रण और अभिन्यास आदि रोग उपद्रव स्वरूप में होते हैं। इन सबों से यदि मूत्रातिसारी रोगी युक्त हो तो वह शीघ्र मर जाता है ॥ १६–१७ ॥

अत्रर्त्तुप्रभावः—

निदाघे प्रजायेत रोगो विशेषादयं चापि तत्रैव कुप्येदवश्यम्।
कदाचिच्च कालेऽतिशीते प्रवृत्तिः प्रदृश्येत लोके क्वचिच्चास्य वैद्यैः ॥ १८ ॥
पुरोक्तैरिहैभिर्निमित्तैरथो मधुमेहोऽपि जायेत रोगोऽतिकृच्छ्रः।
समासेन चेत्थं तु मूत्रातिसारोदितं हेतुरूपादिकं सर्वमुक्तम् ॥ १९ ॥

यह रोग विशेषतः ग्रीष्मऋतु में उत्पन्न होकर कुपित होता है। शीतकाल में कदाचित् ही इस की प्रवृत्ति दिखाई देती है। इन्हीं पूर्वोक्त कारणों से अति कृच्छ्रसाध्य मधुमेह भी उत्पन्न हो जाता है।

विमर्श—प्राचीन आचार्यों ने इसका समावेश उदकमेह नामक रोग में किया है और अंग्रेजी में इसे 'डायबीटीज इन्सीपीडस' (Diabeteis insipidus) कहते हैं। (विशेष विवेचन उत्तरार्ध पृष्ठ १२ में देखें)

अथ शुक्रमेहनिदानम्[1]

तत्र शुक्रमेहे हेतुः—

ये हस्तमैथुनमुखातिविगीतरीत्या रेतःक्षयं विदधतीह जना विमूढाः।
तेषामवश्यमतिकामवशं गतानां जायेत दारुणगदः खलु शुक्रमेहः॥ १॥

जो मूर्ख लोग हस्तमैथुन आदि अत्यन्त निन्दित रीति से शुक्रक्षय किया करते हैं उन सबों को दारुण शुक्रमेह रोग होता है॥ १॥

तस्य लक्षणम्—

मलमूत्रमनोजजवाधिकता युवतिस्थविलासदृढस्मृतितः।
पतनं यतनेन विनैव मुहुर्ननु रेतस आशु भवेदनिशम्॥ २॥
अथवा प्रमदाऽङ्गमपि स्पृशतः सहसा तरुणीजनदर्शनतः।
स्वपने रमणीरमणेक्षणतः स्खलनं पुरुषस्य भवेत् क्षणतः॥ ३॥
अधितन्द्रमथाप्यधिवर्त्म यतः शयनं च जनस्य मनोजवतः।
स्मरणादवलोकनतोऽप्यचिराच्च्यवनं प्रमदात् प्रमदाविषयात्॥ ४॥
अहोरात्रमध्ये प्ररूढे गदेऽस्मिन् नरस्य त्रिवारं चतुर्वारमद्धा।
उपर्युक्तहेतोश्च्युती रेतसः स्यात् क्वचिल्लिङ्गशैथिल्यमन्ते नितान्तम्॥ ५॥
ततोऽनेन रोगेण संव्यूढदेहो जनो भामिनीमानभेदेऽप्यशक्तः।
भवत्यङ्गनाऽङ्गस्य संस्पर्शमात्राच्च्युतिं रेतसो नूनमत्राभ्युपैति॥ ६॥
ततोऽतीव लज्जाविषादाभिभूतः पराभूतचेता भृशं कामिनीतः।
विरक्तो भवत्तातु विक्षिप्तगत्या स्वयं मानवो मृत्युमीप्सेदगत्या॥ ७॥

मल-मूत्र तथा काम के वेग की अधिकता एवं युवतीविषयक विलासों की स्मृति मात्र से विना प्रयत्न के बारंबार शुक्र का शीघ्र-शीघ्र पतन हुआ करना अथवा स्त्रियों के अङ्ग का स्पर्श करने, तरुणी स्त्रियों का दर्शन करने और स्वप्न में रमणी के साथ रमण करने से पुरुष का क्षणमात्र में शुक्र का स्खलन हो जाता है। कभी-कभी तन्द्रावस्था में, मार्ग चलते हुये, शय्या पर पड़े कामवासना से स्त्रियों का स्मरण तथा अवलोकन करने मात्र से शीघ्र शुक्र का स्खलन हो जाता है। इस रोग की अधिक वृद्धि होने पर दिन-रात्रि में ३ या ४ बार उपर्युक्त कारणों से शुक्र स्खलन हो जाता है और अन्त में किसी-किसी में लिङ्गशैथिल्य भी हो जाता है। ऐसे रोग से युक्त रोगी यौवनगर्विता स्त्री के मानमर्दन करने में अशक्त होता हुआ अङ्गना के अङ्गों के संस्पर्शमात्र से वीर्यच्युति को प्राप्त करता है। इसके पश्चात् लज्जा और विषाद से युक्त होकर संसार से विरक्त होकर विक्षिप्त हो जाता है और लाचार होकर मर जाने की इच्छा करने लगता है॥ २-७॥

शुक्रमेहस्योपद्रवाः—

वह्नेर्मान्द्यं मूत्रवर्चोऽवरोधो दृष्टेर्ह्रासो नीलिमाऽल्पोऽप्यजीर्णम्।
चातीसारो घूर्णनं मस्तकस्य मेहे शुक्रस्योपसर्गा इमे स्युः॥ ८॥

अग्नि की मन्दता, मूत्र तथा मल का अवरोध, दर्शनशक्ति का ह्रास, आँखों में थोड़ी नीलिमा, अजीर्ण, अतीसार, सिर घूमना ये सब शुक्रमेह के उपद्रव हैं॥ ८॥

१. Spermatorrhoea.

विमर्श—शुक्रमेह का वर्णन उत्तरार्ध पृष्ठ १० और १३ पर भी देखें।

अथ भृशोष्णवातनिदानम्[1]

अस्य परिचयः—

मूत्राध्वना यत्र विनिर्गमः स्यात् पूयस्य पुंसु प्रमदाजनेषु।
योन्यध्वना ह्येष भृशोष्णवातः संसर्गजः पूययुतश्च मेहः ॥ १ ॥

पुरुषों में मूत्रेन्द्रिय और स्त्रियों में योनिमार्ग से यदि पूय निकलता हो तो उसे भृशोष्णवात और औपसर्गिक पूयमेह कहते हैं ॥ १ ॥

औपसर्गिकमेहाख्यो गदो यः स भिषग्वरैः। व्रणमेहः पूयमेहश्चागन्तुमेह उच्यते ॥ २ ॥

औपसर्गिक मेह नामक जो रोग वैद्यवरों ने कहा है उसी को व्रणमेह, पूयमेह, आगन्तुकमेह भी कहते हैं ॥ २ ॥

संप्राप्तिः—

रजस्वलायां बहुभुक्तवत्यां तथाऽऽर्तयोनौ मदनातुरो यः।
प्रयातु मोहाद् यदि कोऽपि तर्हि ध्रुवं गदं दारुणमेतमेतु ॥ ३ ॥
या मूत्रनाड्यन्तरसंस्थिता त्वक् श्लेष्मावहा सा व्रणिता सती तु।
क्लेदं गदेऽत्राहरति प्रकामं ततो भिषग्भिर्व्रणमेह उक्तः ॥ ४ ॥

रजस्वला, अधिक भोजन किये हुई एवं रुग्ण योनि वाली स्त्रियों में कामातुर होकर यदि कोई पुरुष मोहवश गमन करता है तो उसे यह दारुण रोग हो जाता है। मूत्रनाड़ी की श्लैष्मिक कला व्रणयुक्त हो जाती है उससे इस रोग में अत्यन्त क्लेद बना रहता है। इसी से यह व्रणमेह कहा जाता है ॥ ३-४ ॥

कीटाणवो युगलबिन्दुनिभा निदानं त्वस्यामयस्य गदितं गदलक्ष्मविद्भिः।
स्यान्मैथुनेन खलु संक्रमणं सदैतद्रोगार्दितप्रमदया सह पूरुषेषु ॥ ५ ॥
तथा जनन्या गदियोनिमार्गादुत्पद्यमानेषु शिशुष्ववश्यम्।
विलोक्यते संक्रमतोऽक्षिपाको भृशोष्णवातस्य च लोकमध्ये ॥ ६ ॥

इस रोग के कारण दो बिन्दुओं के सदृश आकार वाले कीटाणु (Gonococcus) हैं। रोग से युक्त स्त्री के साथ मैथुन करने से पुरुषों में (या पुरुषों से स्त्रियों में) इस रोग का संक्रमण होता है। रोगयुक्त माता के योनिमार्ग से उत्पन्न शिशुओं में (प्रसवकाल में) इसके संक्रमण से नेत्रपाक दिखाई पड़ता है ॥ ५-६ ॥

तस्य लक्षणम्—

प्रायः स्त्रीसङ्गदिष्टं मुनिमितरजनीकाल आरभ्य रोगो
जायेतायं कदाचिद् विपुलतररुजाव्यञ्जकः पूरुषेषु।
वारं वारं ध्वजस्योत्थितिरपि महती शिश्नमुण्डे च कण्डूः-
किञ्चासह्या भृशार्त्तिर्भवति हि सततं मूत्रकाले गदेऽस्मिन् ॥ ७ ॥

स्त्रीसङ्ग से ७ दिन के बाद यह रोग आरम्भ होता है। इस रोग से शिश्न में अत्यन्त पीड़ा हो जाती है और मूत्र करने के समय असह्य पीड़ा होती है ॥ ७ ॥

प्रदाहो रुजा मूत्रमार्गेऽपि पूयागमः शिश्नमुण्डे च शोथः किल स्यात्।
कटिश्रोणिदेशोत्थिता चापि पीडा ज्वरस्यागमो मूत्रमार्गस्थितायाम् ॥ ८ ॥

---

[1]. Gonorrhoea इस रोग का वर्णन उत्तरार्ध पृष्ठ १४६ में भी देखें।

कलायां च शोथो ध्रुवं श्लेष्मलायामथो मूत्रकृच्छ्रश्च रक्तस्य मेहः।
तथा मूत्ररोधो यदास्याग्रगत्वं ततः पौरुषग्रन्थिमध्येऽपि शोथः ॥ ९ ॥
तथैवाशये रेतसो ग्रन्थिभागे यदोपद्रवैरेभिरासेवितः स्यात्।
जनः काऽप्यवस्था तदा तस्य दुःखप्रदाऽऽविर्भवेन्नो भवेद्रोगशान्तिः ॥ १० ॥
अथो सा कदाचित्कथं चिद् यदि स्यात् तदा सौत्रिकैस्तन्तुभिर्मूत्रमार्गः।
प्रजायेत संकीर्ण आश्वेव तस्मात् प्रदाहादिभिर्दुःखितश्चापि रोगी ॥ ११ ॥
ततो जीवनं नारकौपम्यमेव स्वकीयं स जानाति तद्दुःखतप्तः।
अतः सद्य एवामयस्यास्य वैद्यैः सदाऽरम्भकाले चिकित्सा विधेया ॥ १२ ॥

इसमें मूत्रमार्ग में प्रदाह, पीड़ा, पूयस्राव, शिश्नमुण्ड में शोथ, कटि तथा श्रोणिप्रदेश में पीड़ा, ज्वर, मूत्रमार्ग में स्थित श्लेष्मलकला में शोथ और क्षत होने से मूत्रकृच्छ्र, रक्तमेह और मूत्रावरोध होते हैं। रोग आगे बढ़ने पर पौरुषग्रन्थि में शोथ तथा शुक्राशय और शुक्रग्रन्थियाँ, अण्डकोष भी शोथयुक्त हो जाने से रोगी की दुःखदायिनी अवस्था हो जाती है। रोग की शान्ति नहीं होती; यदि कदाचित् किसी भाँति कुछ शान्ति हो जाती भी है तो सौत्रिक तन्तुओं के कारण मूत्रमार्ग शीघ्र संकीर्ण हो जाता है जिससे प्रदाहादिक से रोगी अत्यन्त दुःखित होकर अपने जीवन को तुच्छ समझने लगता है। इसलिये वैद्यों को सदा इस रोग की आरम्भावस्था में ही चिकित्सा प्रारम्भ कर देनी चाहिये ॥ ८-१२ ॥

डिम्बप्रणाल्यां परिविस्तृतासु कलासु योषित्सु हि योनिमार्गे।
गर्भाशये जायत एष रोगो भिषग्वराणामिह निर्णयोऽयम् ॥ १३ ॥

स्त्रियों को यह रोग योनिमार्ग, गर्भाशय, डिम्बप्रणाली और परिविस्तृत कला में उत्पन्न होता है, ऐसा वैद्यों का निर्णय है ॥ १३ ॥

उपद्रवाः—

शुक्रग्रन्थिष्वाशये रेतसोऽथो शोथोऽवश्यं पौरुषग्रन्थिमध्ये।
मूत्रस्यालं पूर्णता मूत्रधाम्नि प्रादुर्भावो विद्रधीनां विशेषात् ॥ १४ ॥
मूत्राध्वानं, सर्वतोऽथ प्रभिन्नैस्तैरुत्पत्तिश्चोग्रशोथस्य तत्र।
किंवा नाडीसंज्ञकस्य व्रणस्योद्भूतिर्भूयो दुःखदस्यापि नूनम् ॥ १५ ॥
भृशोष्णवाते भृशदुःसहे सदा गदेऽगदङ्कारवरैरुपद्रवाः।
उदीरिता एत उदारबुद्धिभिर्द्रुतं चिकित्सा अपि यत्नपूर्वकम् ॥ १६ ॥

शुक्रग्रन्थि, शुक्राशय तथा पौरुषग्रन्थि में शोथ (मूत्रमार्ग में अवरोध के कारण), मूत्राशय में मूत्र का भरा रहना, मूत्रमार्ग के चारों ओर विद्रधियों की उत्पत्ति, विद्रधि के फट जाने पर उग्र शोथ अथवा अत्यन्त दुःखप्रद नाडीव्रण की उत्पत्ति ये सब उपद्रव दुःखप्रद भृशोष्णवात रोग में होते हैं। अतः शीघ्र ही इनकी चिकित्सा यत्नपूर्वक करनी चाहिये ॥ १४-१६ ॥

विमर्श—प्राचीन आचार्यों ने अवस्था भेद के लक्षणानुसार इस रोग का समावेश रक्तमेह, मज्जामेह या हस्तिमेह (उत्त. पृ. १५ और १६) तथा उष्णवात (पूर्वार्ध पृष्ठ ४९५) में करते हैं।

अथ शुक्रदोषनिदानम्

तत्रादौ शुक्रपरिचयः—

यतो व्यवायेषु विशेषहर्षनिमित्ततो बीजमिदं प्रजायते।
ततो ध्रुवं पौरुषशुक्रमेतद्वदन्ति वैद्या गदतत्त्ववेदिनः ॥ १ ॥
शृणूच्यते तद्विषयेऽधुना मया यथा ह्यकालोदककीटवह्निभिः।
प्रदूषितं रोहति नैव बीजं तथा नृणां शुक्रमपि प्रदुष्टम् ॥ २ ॥

मैथुन में अधिक प्रहर्ष होने से जो गर्भस्थापक शुक्र उत्पन्न होता है उसे 'पौरुष शुक्र' कहते हैं। जैसे जल, जलकीट तथा अग्नि से दूषित 'बीज' नहीं जमता, वैसे ही मनुष्यों का 'शुक्र' भी दूषित होकर उत्पादक शक्ति से शून्य हो जाता है॥ १-२॥

शुक्रदोषस्य निदानपूर्विका संप्राप्तिः—

व्यायामतोऽतीव नितान्तमैथुनात् सदैव चासात्म्यपदार्थसेवनात्।
अकालमध्येऽप्यधियोनि मैथुनं प्रकुर्वतां वा त्यजतां रतिक्रियाम्॥ ३॥
अतीव रूक्षं लवणं तथाऽम्लमुष्णं कषायं बहुशश्च तिक्तम्।
पदार्थजातं च समश्नतां नृणां निषेवणाच्चाप्यरसज्ञयोषिताम्॥ ४॥
तथा च शुक्रस्रवणाज्जरातोऽथवाऽतिशोकादपि चिन्तनाद् भृशम्।
किंवाऽग्निदाहादथ शस्त्रघातात् क्षाराभिपाताच्च भयाद्विशेषात्॥ ५॥
क्रोधादविश्वासत एव चातीसारात्तथा व्याधिसमुत्थकार्श्यात्।
वेगावरोधादधिकक्षताद्वा संदूषणाद् धातुगणस्य चापि॥ ६॥
पृथक् पृथग्वा मिलितास्तु दोषा रेतोवहाः प्राप्य सिराः प्रदुष्टाः।
द्रुतं च शुक्रं ननु दूषयेयुर्ब्रवीमि तद्दुष्टिमथो विभागशः॥ ७॥

अत्यन्त व्यायाम, अधिक मैथुन, निरन्तर असात्म्य पदार्थों का सेवन, अकाल मैथुन, मैथुन का पूर्ण त्याग, अत्यन्त रूक्ष, लवण, अम्ल, उष्ण, कषाय, तिक्त पदार्थों का अधिक सेवन, कामशास्त्र से अनभिज्ञ स्त्रियों के साथ सम्भोग, अति शुक्रस्राव, वृद्धावस्था, अत्यन्त शोक तथा चिन्ता, अग्नि से जल जाना, शस्त्र का आघात, क्षार से जल जाना, विशेष भय, क्रोध, अविश्वास, अतिसार, व्याधिजन्य कृशता, मल-मूत्रादि का वेगावरोध, अधिक क्षत, दूषित धातु इत्यादि कारणों से पृथक्-पृथक् वा मिलित वातादिक दोष पुरुषों के शुक्रवह सिराओं को प्राप्त होकर उन्हें भी दूषित कर शुक्र को दूषित कर देते हैं॥ ३-७॥

तत्रादौ शुक्रस्याष्टौ दोषाः—

यत्फेनिलं तनु च रूक्षमतीव वाऽन्यधातूपसृष्टमवसाद्यपि पूतिगन्धि।
स्यात् पिच्छिलं प्रकृतितोऽपि विवर्णमद्धा तद् दुष्टशुक्रमिह वैद्यवरा वदेयुः॥ ८॥

जो शुक्र फेनयुक्त, पतला, अत्यन्त रूक्ष, अन्य धातुओं से उपसृष्ट, अवसादयुक्त, पूतिगन्ध वाला, पिच्छिल और विवर्णता इन ८ दोषों से युक्त होता है उसे 'दुष्ट शुक्र' कहते हैं॥ ८॥

वातदुष्टशुक्रलक्षणम्—

यत्फेनिलं तनु च रूक्षमथातिकृच्छ्रेणाल्पं स्रवेत्तदनिलेन विदूषितं स्यात्।
एवंविधं तु नहि शुक्रमुशन्ति वैद्या गर्भाय जातुचन योग्यमवश्यमेव॥ ९॥

जो शुक्र फेनिल, पतला, रूक्ष और अत्यन्त कष्ट के साथ थोड़ा-थोड़ा स्रवित होनेवाला होता है, वह वात से दूषित होता है। वह कभी भी गर्भस्थिति के लिये योग्य नहीं होता॥ ९॥

पित्तदुष्टशुक्रलक्षणम्—

शुक्रं भवेन्नीलमथापि पीतमत्युष्णमद्धा ननु पूतिगन्धि।
स्रवेच्च लिङ्गं प्रदहत्तु यत्तत् पित्तेन संदूषितमेव बोध्यम्॥ १०॥

जो शुक्र नील अथवा पीतवर्ण का, अत्यन्त उष्ण, पूतिगन्धयुक्त और स्राव के समय लिङ्ग में दाह पैदा करने वाला होता है उसे पित्त से दूषित समझना चाहिये॥ १०॥

कफदुष्टशुक्रलक्षणम्—

भवेत् पिच्छिलं चाधिकं बद्धमार्गं कफेनैव संदूषितं शुक्रमत्र।

ब्रुवन्तीत्थमायुर्विदामग्रगण्या वरेण्याश्च ये शुक्रदोषज्ञमध्ये ॥ ११ ॥

जो शुक्र अधिक पिच्छिल तथा बद्धमार्ग (ग्रथित) होता है उसे कफ से दूषित समझना चाहिये॥

रक्तान्वितशुक्रलक्षणम्—

अतीवाङ्गनासङ्गमाद्वाऽभिघातात् क्षताच्चापि संयुक्तमस्रेण नृणाम् ।
अपि प्रायशः संप्रवर्त्तेत शुक्रं तथा वेगसन्धारणान्मारुतेन ॥
स्वमार्गाऽवरुद्धं च कृच्छ्रेण रेतः सदा ग्रन्थियुक्तं स्रवेच्चावसादि ॥ १२ ॥

अत्यन्त स्त्री-सम्भोग करने से तथा अभिघात या क्षत होने से एवं वेगावरोध करने से प्रकुपित वायु द्वारा अपने मार्ग में रुका रह कर बड़ी कठिनाई से निकलने वाला ग्रन्थियुक्त एवं अवसाद उत्पन्न करने वाला रक्त से युक्त शुक्र निकलता है ॥ १२ ॥

शुद्धशुक्रलक्षणम्—

घनं स्निग्धमद्धाऽथ माधुर्ययुक्तं तथा पिच्छिलं चाविदाहीह शुक्रम् ।
सदा स्फाटिकं वर्णमाप्तं तु शुक्रं विशुद्धं विशेषेण बोध्यं सुवैद्यैः ॥ १३ ॥

घन, स्निग्ध, माधुर्ययुक्त, पिच्छिल तथा विदाह न करने वाला शुक्ल वर्ण का स्फटिक के समान जो शुक्र बनता है उसे विशुद्ध समझना चाहिए ॥ १३ ॥

अथ क्लैब्यनिदानम्

तत्रादौ क्लैब्यप्रकाराः—

बीजोपघातात्तदनु ध्वजोपघाताज्जरातोऽपि च शुक्रसंक्षयात् ।
इत्थं प्रजायेत चतुर्विधं हि क्लैब्यं पुराणैर्ऋषिभिः प्रदिष्टम् ॥ १ ॥

बीजोपघात, ध्वजोपघात, जरा और शुक्रक्षय इन ४ कारणों से उत्पन्न होने से नपुंसकता ४ प्रकार की होती है। ऐसा प्राचीन ऋषियों ने कहा है ॥ १ ॥

क्लैब्यस्य सामान्यलक्षणम्—

यः स्यादशक्तः सुरते मनुष्यः स क्लीव उक्तः किल वैद्यवृन्दैः ।
क्लैब्यं तु तद्भाव इहोपदिष्टं तल्लक्ष्म सामान्यमथो ब्रवीमि ॥ २ ॥
न यात्यधीनां प्रमदामपि स्वकामुपस्थशैथिल्यनिमित्ततः स्वयम् ।
अथो कदाचिद् यदि याति कुत्रचित् श्वासार्त्तिमान् स्विन्नतनुस्तदानीम् ॥ ३ ॥
संकल्पवैफल्ययुतोऽपि मोघ-संचेष्टितः संश्लथलिङ्गवीर्यः ।
तथा च निर्बीजतया समन्वितो भवत्यवश्यं प्रमदासमीपे ॥ ४ ॥

जो मनुष्य मैथुन करने में असमर्थ हो उसे नपुंसक और उसके भाव को 'क्लैब्य' (नपुंसकता) कहते हैं। उसके सामान्य लक्षण निम्न होते हैं—अपने अधीन रहने वाली स्त्री के पास भी संभोगार्थ नहीं जाता, यदि कभी स्त्री के पास जाता भी है तो उसके समीप श्वास से पीड़ित, पसीना से तर पड़ा रहता है और संकल्प की विफलता से युक्त, निष्फल चेष्टा वाला, शिथिल लिङ्ग तथा निर्बीज बना रहता है ॥ २-४ ॥

अथ बीजोपघातजक्लैब्यमाह—

शीतं रूक्षं वाऽल्पमन्नं विरुद्धं संक्लिष्टं चाजीर्णकालेऽपि भुक्तम् ।
शोकश्चिन्ताऽर्थादिजाताऽपि भीतिस्त्रासो भूरिस्त्रीप्रसङ्गः श्रमश्च ॥ ५ ॥
चाविश्वासोऽथाभिचारो रसादेः संक्षीणत्वं पञ्चकर्मापचारः ।
वातादीनां चापि वैषम्यमल्पाहारः स्त्रीणां चारसज्ञत्वमेव ॥ ६ ॥
प्रायेणैभ्यो नुर्हि बीजोपघातो जायेतास्मिन् कारणेभ्यो विशेषात् ।
यस्मात्स स्यात् कामिनीष्वल्पहर्षश्चाल्पप्राणो दुर्बलः पाण्डुवर्णः ॥ ७ ॥

हृत्कामलातमकपाण्डुगदश्रमाख्यैः शूलातिसारवमनज्वरकाससंज्ञैः।
रोगैर्निपीडिततनुश्च भवेन्मनुष्यो बीजोपघातजनपुंसकताऽभिजुष्टः ॥ ८ ॥

शीत, रूक्ष, अल्प, कठिन तथा विरुद्ध अन्न का सेवन एवं अजीर्ण में भोजन करने से तथा शोक, अर्थादिजन्य चिन्ता, शत्रुजन्यादि भय, त्रास (मिथ्या भय), अत्यन्त स्त्रीप्रसङ्ग, श्रम, अविश्वास, अभिचार, रसादि की क्षीणता, पञ्चकर्म का ठीक रीति से प्रयोग न होना, वातादिक की विषमता, अल्प भोजन और स्त्रीविषयक रसिकता का अभाव इन सब कारणों से विशेषतः मनुष्यों को बीजोपघात होता है। इससे यह स्त्रियों में अल्प हर्षवाला तथा अल्पप्राणवाला, दुर्बल, पाण्डुवर्ण, हृद्रोग, कामला, तमकश्वास, पाण्डुरोग, श्रम, शूल, अतीसार, वमन, ज्वर तथा कास आदि रोगों से पीड़ित हो जाता है ॥ ५–८ ॥

ध्वजभङ्गजक्लैब्यस्य कारणमाह—

क्लैब्यं पुनर्ननु पुरातनवैद्यजातैर्गीतं शृणु त्वमधुना ध्वजभङ्गजातम्।
अत्यम्बुपानविषमाशनपिष्टभोज्या लब्धान्नभोजनपरस्य नरस्य नूनम् ॥ ९ ॥
क्षारं तथा लवणमम्लमथो विरुद्धं द्रव्यं त्वनूपभवमांसमपि प्रकामम्।
दुग्धं दधि प्रतिदिनं त्वदतोऽतिलौल्याच्चासात्म्यभोजिन इहातिकृशस्य रोगैः ॥
कन्यास्वयोनिषु पुरातनरोगिणीपूत्सृष्टासु दीर्घसमयात् पुरुषैः प्रसङ्गे।
दुर्गन्धितास्वपि च पुष्पवतीषु दुष्टयोनिष्वनङ्गवशतो हि परिस्नुतासु ॥ ११ ॥
एतादृशीषु युवतीषु चतुष्पदासु प्रायः परं विदधतः सुरतं प्रमोहात्।
लिङ्गस्य शस्त्रनखदन्तकृतक्षताच्चाघातादधावनत इध्मप्रहारतोऽपि ॥ १२ ॥
निष्पेषणादपि परिच्युतरेतसः संरोधाच्च शूकपरिशीलनतश्च मेढ्रम्।
संजायतेऽधिपुरुषं ध्वजभङ्गनामा क्लीबत्वसंजननकारणमामयो वै ॥ १३ ॥

अधिक जलपान, विषम भोजन, पीठी के बने भोज्य पदार्थ गुरु अन्न, क्षार, लवण, अम्ल, विरुद्ध द्रव्य, आनूप जीवों का मांस तथा दुग्ध, दधि आदि प्रतिदिन अधिक रूप से सेवन करने तथा रसना-लोलुप होने से असात्म्य (अहितकर) पदार्थों के भोजन करने से रोगों से अत्यन्त कृश शरीर होने से एवं कन्या, अयोनि (गुदा आदि), रोगिणी, दीर्घकाल से पुरुषों के द्वारा नहीं संभोग की हुई, दुर्गन्धित, रजस्वला, परिस्नुता (स्रावयुक्ता) स्त्री की दुष्ट योनि में तथा पशु-योनि में कामवश होकर संभोग करने से तथा शस्त्र, नख एवं दन्तक्षत, आघात, शिश्न की गन्दगी, लकड़ी का प्रहार, निष्पेषण (मीजने), स्खलित होते हुए वीर्य का स्तम्भन (दबा कर रोकने) और लिङ्ग बढ़ाने के लिए शूक का प्रयोग करने से पुरुषों को लिङ्ग में ध्वजभङ्ग नामक रोग हो जाता है ॥ ९–१३ ॥

वातजध्वजभङ्गमाह—

मेढ्रेऽतिरुजा स्याद् ध्वजभङ्गे रागः श्वयथुर्वातसमुत्थे।

लिङ्ग में अत्यन्त पीड़ा, लालिमा और शोथ ये सब लक्षण वातज ध्वजभङ्ग के होते हैं।

पित्तजध्वजभङ्गमाह—

स्फोटाः प्रखराः स्युर्ननु लिङ्गे पाकः परमः पित्तसमुत्थे ॥ १४ ॥

प्रखर रूप से स्फोट (फोड़े) और अत्यन्त पाक यह पित्तज ध्वजभङ्ग के लक्षण हैं ॥ १४ ॥

कफजध्वजभङ्गमाह—

लिङ्गोपरि मांसस्य समृद्धिः क्षिप्रं व्रणजन्माऽमितवृद्धिः।
स्रावश्च पुलाकोदककल्पः श्यावारुणभः स्याद् यदनल्पः ॥ १५ ॥
वलयीकुरुते स्फीतो देशः शिश्ने कठिनः स्यात् सविशेषः।

कफजे ध्वजभङ्गे किल लक्षणमेतद्विद्धि निदानविचक्षण ! ॥ १६ ॥

लिङ्ग के ऊपर मांस का अधिक बढ़ जाना और शीघ्र ही व्रण की उत्पत्ति और उसकी अधिक वृद्धि तथा उससे पुलाक जल के समान श्याव और अरुण वर्ण का स्राव होना, लिङ्ग का वर्तुलाकार होना तथा उसका फैलाव कठिन होना, ये सब लक्षण कफज ध्वजभङ्ग के हैं ॥ १५-१६ ॥

रक्तजध्वजभङ्गमाह—

छर्दिज्वरमूर्च्छाभ्रमतृष्णाः स्युरिमे रोगाः पुंसि सतृष्णाः ।
लोहितमाविलनीलसवर्णं वहति हि कृष्णं रक्तमुदीर्णम् ॥ १७ ॥
शिश्नव्रणतो यस्य जनस्य ध्वजभङ्गो रक्तज इह तस्य ।
इति विज्ञेयं साधु सदैव श्रेष्ठेनायुर्वेदविदैव ॥ १८ ॥

वमन, ज्वर, मूर्च्छा, भ्रम और तृष्णा का विशेष रूप से होना, लिङ्ग के व्रणों द्वारा लाल, आविल (गंदला), नील तथा कृष्ण वर्ण का रक्त वहना। ये सब लक्षण यदि हों तो रक्तज ध्वजभङ्ग समझना चाहिये ॥ १७-१८ ॥

सन्निपातजध्वजभङ्गमाह—

अग्निदग्धसदृशोऽपि च दाहः सरुजश्चेत् स्यात् कृतसंनाहः ।
बस्तौ सीवन्यामधिवृषणं वङ्क्षणमध्ये स्वीकृतमरणम् ॥ १९ ॥
पाण्डुर्वा पिच्छिल आस्रावः कादाचित्कोऽप्येवंभावः ।
मन्दः स्तिमितः श्वयथुर्नूनं स्रावः स्यादिह संततमूनम् ॥ २० ॥
चिरकालादपि पाकं गच्छेत् संत्वरया या वा मुक्तिं यच्छेत् ।
जायेरन् क्रिमयोऽप्यधिलिङ्गं क्लेदि पूतिगन्धीति च लिङ्गम् ॥ २१ ॥
मणिर्विशीर्येतापि च यस्य मेढ्ं मुष्कौ वाऽथ विशिष्य ।
सन्निपातजनितध्वजभङ्गं विद्यात्तस्योदितमध्यङ्गम् ॥ २२ ॥
कथितं क्लैब्यं ध्वजभङ्गेत्थं चरकप्रोक्तमिदं हि मयेत्थम् ।
एतं ब्रुवते साङ्गोपाङ्गं केचित् पञ्चविधं ध्वजभङ्गम् ॥ २३ ॥

यदि वस्ति, सीवनी, अण्डकोश तथा वङ्क्षण के अन्दर पीड़ायुक्त ज्वर के साथ अग्नि से जले की भाँति दाह हो, कभी-कभी पाण्डु वर्ण का तथा पिच्छिल स्राव हो, मन्द एवं निश्चल शोथ हो तथा थोड़ा-थोड़ा स्राव हो, देर से पाक होकर शीघ्र ही शान्त हो जाता हो, लिङ्ग में क्रिमि उत्पन्न हों और वह क्लेद तथा मुर्दे के समान पूति गन्ध युक्त हो और लिङ्ग का मुण्ड विशीर्ण हो तथा अण्डकोश भी कभी-कभी फट जाता हो तो सन्निपातज ध्वजभङ्ग समझना चाहिये ॥१९-२३॥

जरासम्भवक्लैब्यमाह —

क्लैब्यं जराजातमथो ब्रवीमि स्वं साम्प्रतं तच्छृणु सावधानः ।
जघन्यमध्यप्रवरप्रभेदादुक्तं मुनीन्द्रैस्त्रिविधं वयोऽत्र ॥ २४ ॥
प्रायस्तत्र प्रवरवयसां मानुषाणामजस्रं शुक्रं क्षीणं स्वत इह भवत्यात्मना निर्विकल्पम् ।
तस्मिन् काले यदि न मनुजा वृष्यमासेवमानाः स्युस्तेषान्तु ध्रुवमनुदिनं सङ्क्षयाद्वा रसादेः॥
वीर्यस्याथेन्द्रियाणामपि तदनु बलस्य क्रमेण क्षयाद्वा
किञ्चायुःक्षीणतातोऽनशनविधिवशात् क्लान्तितोऽपि श्रमाच्च ।
जायेत क्लीवताऽसावधिधरणि जराऽवाप्तजन्मा जनानां
तेनातिक्षीणधातुर्भृशमबलतनुर्विह्वलो वर्णहीनः ।।
दीनः सन् पूरुषः स द्रुततरमुदितं वृद्धतातो गदं तु
प्राप्य प्रायो रमण्या सह रमणविधावक्षमः स्यादवश्यम् ॥ २६ ॥

मुनियों ने मनुष्यों की जघन्य, मध्य, प्रवर भेद से तीन प्रकार की अवस्था कही है। प्रायः वृद्धावस्था में मनुष्यों का शुक्र स्वभावतः क्षीण हो जाता है, उस समय यदि मनुष्य वृष्य पदार्थों का सेवन नहीं करता है तो निश्चय प्रतिदिन रसादि का क्षय होने पर यथाक्रम वीर्य, इन्द्रियों की शक्ति और बलका क्षय होने से एवं आयु की क्षीणता, अनशन, क्लान्ति तथा श्रम से जराजन्य क्लीवता उत्पन्न होती है और धातु अति क्षीण हो जाती है तथा शरीर में बल नहीं रह जाता। ऐसा पुरुष विह्वल, वर्णहीन तथा दीन होता हुआ अत्यन्त शीघ्र ही वृद्धता से उत्पन्न रोग को पाकर रमणियों के साथ रमण करने में असमर्थ हो जाता है॥ २४-२६॥

शुक्रक्षयजक्लैव्यमाह—

क्लैव्यं संकथ्यमानं त्वमिह शृणु तुरीयं च शुक्रक्षयोत्थं
चिन्ताऽऽधिक्याच्च शोकादपि च बहुभयात्क्रोधतो वा मनुष्यः॥ २७॥
उद्वेगादीर्ष्यया वा युवतिजनमुपेयात्समुत्कण्ठया चेत्
किं वा कार्श्यं श्रितः सन्ननुदिनममितं रूक्षमन्नादिजातम्।
भैषज्यं वा भजेद्प्यशनविरहितो दुर्बलः स्यात् प्रकृत्या
किञ्चासात्म्यान्नपानं समधिकरसनाऽधीनतातः सदाऽद्यात्॥ २८॥
मुख्यो धातू रसाख्यः स्थित इह हृदये यस्तदीये स आशु
क्षीयेताथो मनुष्यः स्वयमपि बहुशः क्षीयमाणो भवेद्धि।
शुक्रान्ता लोहिताद्यास्तदनु ननु परं धातवस्तु क्रमेण
क्षीयेरंस्तस्य जन्तोर्मतमधिकवरं तत्र शुक्रस्य धाम॥ २९॥

अधिक चिन्ता, शोक, अत्यन्त भय या क्रोध, उद्वेग, ईर्ष्या या उत्कण्ठावश हो कर जो मनुष्य युवतियों के साथ सम्भोग करता है तथा कृश होते हुये भी प्रतिदिन रूक्ष अन्न-पान या ओषधि भक्षण करता है या स्वभावतः दुर्बल होते हुये भी भोजन नहीं करता है और रसनेन्द्रिय के अधीन होने से असात्म्य अन्न-पान का सेवन करता है, उसका हृदय में स्थित रसरूप प्रधान धातु शीघ्र क्षीण होने लगता है जिससे वह भी स्वयं क्षीण हो जाता है। उसके बाद रक्त से लेकर शुक्र पर्यन्त जितनी धातुयें हैं सभी क्रम से क्षीण हो जाती हैं॥ २७-२९॥

यः सेवेत ग्राम्यधर्मं प्रहर्षाच्चित्तस्यातीवाथवा स्त्रीषु नित्यम्।
क्षीयेताथो तस्य रेतोऽपि नूनं स प्राप्नोति क्षीणतां सर्वतोऽरम्॥ ३०॥
घोरं व्याधिं चान्ततो वाऽपि मृत्युं प्रायोऽवाप्नोत्येव शुक्रक्षयी सः।
सार्द्धं हेत्वाद्येन शुक्रक्षयोत्थं क्लैव्यं कृत्स्नं प्रोक्तमित्थं चतुर्द्धा॥ ३१॥

जो मनुष्य अत्यन्त प्रहर्षित चित्त होकर अधिक मैथुन किया करता है उसका शुक्र शीघ्र क्षीण हो जाता है और वह शुक्रक्षयजनित घोर व्याधि को प्राप्त करता हुआ अन्त में मृत्यु को भी प्राप्त कर लेता है॥ ३०-३१॥

मतान्तरमाह—

क्षयोद्भवं च ध्वजभङ्गजातं क्लैव्यद्वयं चैतदसाध्यमेव।
समामनन्तीति भिषग्जनेज्याः केचिन्निदानायनरीतिविज्ञाः॥ ३२॥
उत्पाटनाद्धि वृषणस्य तथैव शेफः-संछेदतोऽधिगतजन्म नपुंसकत्वम्।
चासाध्यमेव निगदन्ति निदानविज्ञाः पूर्णं कृतं प्रयतनं किल तत्र चोनम्॥३३॥

कोई २ आचार्य क्षय तथा ध्वजभङ्गजात क्लीवता को असाध्य मानते हैं और कोई अण्डकोश के निकाल लेने और लिङ्ग के कटजाने से भी उत्पन्न नपुंसकता को असाध्य मानते हैं॥३२-३३॥

बीजदोषाद्गर्भजक्लैब्यमाह—

मातापित्रोर्बीजदोषात्तथा चापुण्यैः कृत्यैः प्राक्तनैर्देहिनोऽस्य ।
गर्भस्थस्यावाप्य दोषा यदाऽरं नाडी रेतोवाहिनीः शोषयन्ती ॥ ३४ ॥
तस्माद्रेतः शुष्कतां तर्हि यातं जातं बालं पूर्णसर्वाङ्गयुक्तम् ॥
कन्यारूपेणाथवा पुत्ररूपे-णाशक्तं च स्वस्वकृत्ये प्रकुर्यात् ॥ ३५ ॥

जिस मनुष्य के दोष माता-पिता के बीज-दोष से तथा प्राक्तन पाप कर्मों के फल से गर्भावस्था में ही शुक्रवाहिनी नाडी को सुखा देते हैं उसका शुक्र शुष्कता को प्राप्त हो जाता है । इससे बालक अथवा कन्या रूप शिशु उत्पन्न होकर भी अपने अपने कृत्यों के करने में अशक्त हो जाते हैं ॥

आसेक्यलक्षणमाह—

अत्यल्पवीर्यत्वत एव तातस्य क्लीब आसेक्यपदाभिधो हि ।
संजायते ना स निजध्वजोत्थानं प्राप्नुयात् प्राश्य किलान्यशुक्रम् ॥ ३६ ॥

पिता का वीर्य अत्यन्त अल्प होने से आसेक्य नामक नपुंसक बालक उत्पन्न होता है जो युवा होने पर अन्य मनुष्य या प्राणी के शुक्र को चाट करके ही अपने लिङ्ग की उत्थान-शक्ति को प्राप्त करता है ॥ ३६ ॥

सौगन्धिकलक्षणमाह—

जायेत यो ना यदि पूतियोना-वजस्रमाघ्राय स शेफसो वै ।
भगस्य वा गन्धमतिप्रहर्षं योषित्प्रसङ्गे प्रलभेत लोके ॥ ३७ ॥

जो पुरुष दुर्गन्धित योनि वाली स्त्री में उत्पन्न होता है वह सौगन्धिकसंज्ञक नपुंसक होता है। वह लिङ्ग वा भग की गन्ध को सूँघने पर ही मैथुन में उत्साह को प्राप्त करता है ॥ ३७ ॥

कुम्भीकलक्षणमाह—

यः स्वे गुदे मैथुनमन्यपुंसा विधाप्य पुंवत् प्रमदासु सर्वदा ।
यदि प्रवर्त्तेत तदा भिषग्भिर्ज्ञायेत कुम्भीकनपुंसकः सः ॥ ३८ ॥

जो अपनी गुदा में दूसरे पुरुष द्वारा प्रथम मैथुन करा कर ही स्त्रियों से मैथुन करने में समर्थ होता है वह कुम्भीकसंज्ञक नपुंसक कहलाता है ॥ ३८ ॥

ईर्ष्यकलक्षणमाह—

दृष्ट्वा व्यवायं यदि चान्यदीयं स्वयं भवेद् यः सुरते प्रवृत्तः ।
स ईर्ष्यकक्लीब इह प्रदिष्टो विशिष्टतः शिष्टतमैर्भिषग्भिः ॥ ३९ ॥

जो दूसरे को मैथुन करते देख कर ही स्वयं मैथुन करने में प्रवृत्त होता है वह ईर्ष्यकसंज्ञक नपुंसक कहलाता है ॥ ३९ ॥

षण्ढलक्षणमाह—

ऋतौ प्रवर्त्तेत यदाऽङ्गनावद् मोहात् स्त्रियां यः खलु तस्य नूनम् ।
स्त्रीचेष्टिताकारयुतस्तु षण्ढाभिधः प्रजायेत नपुंसकस्तदा ॥ ४० ॥
किंवाऽङ्गना काऽपि यदि प्रवर्त्तेतर्त्तौ रतौ पुंवदपीह पुंसि ।
ततः प्रजायेत सुता क्वचिच्चेत् पुंचेष्टिताकारयुता भवेत्सा ॥ ४१ ॥

जो पुरुष ऋतु काल में मोहवश स्त्री की भाँति स्वयं नीचे रह कर ऊपर से स्त्री द्वारा मैथुन क्रिया करवाता है उस समय जो पुत्र होता है वह देखने में स्त्री के समान चेष्टा तथा आकार वाला षण्ढसंज्ञक नपुंसक होता है उसी प्रकार उससे यदि कन्या की उत्पत्ति हो तो वह चेष्टा तथा आकार में पुरुष की भाँति होती है ॥ ४०-४१ ॥

द्विरेतःक्लीबमाह—

समांशभागादुपतप्तशुक्रात् सशोणिताद्यो नियतः प्रजातः।
क्लीबो द्विरेताः स तु संज्ञया स्यात् स्त्रीपुंसलिङ्गयाकृतिचेष्टिताभ्याम् ॥ ४२ ॥

रज और उपतप्त शुक्र यदि सम भाग में मिलित हो और उससे सन्तान उत्पन्न हो तो वह द्विरेतःसंज्ञक नपुंसक कहलाता है। उसके आकार तथा चेष्टा में स्त्री तथा पुरुष दोनों के मिश्रित लक्षण होते हैं ॥ ४२ ॥

पवनेन्द्रियत्वं लक्षयति—

वायुर्यदा गर्भगतस्य हन्याद्बालस्य शुक्राशयमत्र दैवात्।
तदा प्रकुर्यात्पवनेन्द्रियत्वं नपुंसकत्वप्रदमेव निश्चितम् ॥ ४३ ॥

जब गर्भगत बालक के शुक्राशय को दैवात् वायु नष्ट कर देता है तब नपुंसकता को देने वाली पवनेन्द्रियता हो जाती है अर्थात् शिश्नोत्थान होने पर भी उससे शुक्र का स्राव नहीं होता ॥४३॥

यदा मारुतः कस्यचित् पूरुषस्य प्रदुष्टः परं घट्टनं च प्रकुर्वन्।
प्रदुष्येत्तु शुक्राशयद्वारमद्धा विदध्यात्तदा तं हि संस्कारवाहम् ॥ ४४ ॥

जब वायु दुष्ट हो कर किसी पुरुष के शुक्राशय द्वार को अधिक विघट्टित करता हुआ दूषित करता है तो उसे संस्कारवाह समझना चाहिये अर्थात् उसकी योग्य चिकित्सा करने पर नपुंसकता नष्ट हो सकती है ॥ ४४ ॥

मन्दवेगाल्पहर्षयोर्लक्षणमाह—

यदा मन्दबीजाल्पबीजौ तथा चाबलौ वाऽप्यहर्षौ भवेतां कदाचित्।
तदा क्लैब्ययुक्ताविमौ कारणं वै विकारद्वयस्येति विज्ञेयमत्र ॥ ४५ ॥

अवस्थाकृत मन्दवेग तथा अल्प हर्ष वाली नपुंसकता का कारण मन्दबीज तथा अल्पबीज है ॥ ४५ ॥

वक्रिलक्षणमाह—

यदा विदध्याज्जननी तु मैथुने निजाङ्गजातं विषमं कदाचित्।
स्याद्बीजदौर्बल्ययुतः पिता चेत् तदा भवेद्बालजनो हि वक्री ॥ ४६ ॥

जब मैथुन के समय स्त्री अपने अङ्गों को विषम रूप में रखती है और पुरुष दुर्बल बीज वाला होता है। उनसे जो बालक उत्पन्न होता है वह वक्री होता है ॥ ४६ ॥

ईर्ष्यारतेर्लक्षणमाह—

यौ स्त्रीपुंसौ मैथुनं मन्दहर्षौ कुर्यातां चेदीर्ष्यया चाभिभूतौ।
तौ तु प्रायो वैद्यवृन्दैर्निमित्तं संकथ्येतेर्ष्यारतेरेव लोके ॥ ४७ ॥

जब स्त्री-पुरुष मन्द हर्ष वाले होकर ईर्ष्या से युक्त होते हुये मैथुन में प्रवृत्त होते हैं और उस स्थिति में जो बालक होता है वह 'ईर्ष्यारतिसंज्ञक क्लीव' होता है ॥ ४७ ॥

वातिकपण्ढलक्षणम्—

वायोः पित्तस्यापि दोषाद् यदीयौ नष्टौ स्यातामण्डकोशौ कदाचिद्।
रोगाज्ञानावाप्तवैशिष्ट्यवैद्यैराख्यातोऽद्धा वातिकः षण्ढकः सः ॥ ४८ ॥

वायु तथा पित्त के दोष से जब दोनों 'अण्डकोष' कदाचित् नष्ट हो जाते हैं। तब उसे 'वातिकपण्ढ' रोग कहते हैं ॥ ४८ ॥

इत्थं विकृतिविकारा अष्टावेते नपुंसकाः कथिताः।
प्राक्तनदुष्कृतिजन्यास्ते विज्ञेया ध्रुवं विज्ञैः ॥ ४९ ॥

उक्त 'द्विरेतः क्लीव' आदि ८ प्रकार के क्लीवों को 'विकृतिविकार' कहते हैं और वे प्राक्तन पापों के फल से उत्पन्न होते हैं ॥ ४९ ॥

प्रकारान्तरेण क्लैब्यलक्षणानि

मानसक्लैब्यलक्षणम्—

यद् द्वेषपात्रप्रमदाप्रसङ्गात् पुंसा प्रजायेत नपुंसकत्वम् ।
तन्मानसं नाम सदा सुवैद्यैराम्नातमद्धाऽऽकलनीयमत्र ॥ ५० ॥

द्वेषपात्र स्त्री के प्रसङ्ग से जो नपुंसकता होती है उसे 'मानसक्लैब्य' कहते हैं ॥ ५० ॥

पित्तजक्लैब्यलक्षणम्—

येऽम्लं कटूष्णमथवा लवणं सदैव द्रव्यं नरोऽपरिमितं खलु भक्षयन्ति ।
शुक्रक्षयो भवति पित्तत एव तेषां क्लैब्यं ततो निगदितं ननु पित्तजं स्यात् ॥ ५१ ॥

जो पुरुष अम्ल, कटु, उष्ण अथवा लवण पदार्थों का अपरिमित रूप से सेवन करता है उसे पित्त के कुपित होने से शुक्रक्षय हो जाता है और उससे उत्पन्न क्लीवता को 'पित्तज क्लैब्य' कहते हैं ॥ ५१ ॥

शुक्रक्षयजक्लैब्यलक्षणम्—

नो सेवित्वा वाजीकरणं नित्यं विदधति रमणीरमणम् ।
शुक्रक्षयजं क्लैब्यं तेषां भवति नराणामत्र समेषाम् ॥ ५२ ॥

जो पुरुष वाजीकरण को विना सेवन किये ही स्त्री के साथ रमण करता है उसे 'शुक्रक्षयज क्लैब्य' होता है ॥ ५२ ॥

मेढ्ररोगजक्लैब्यलक्षणम्—

अतिशयकालव्यापिगदेन मेढ्रमध्यसंलब्धभवेन ।
क्लैब्यं जायत इह वै यस्य मेढ्ररोगजं ज्ञेयं तस्य ॥ ५३ ॥

लिङ्गगत दीर्घकालव्यापी रोग होने से जो क्लीवता होती है उसे 'मेढ्ररोगज क्लैब्य' कहते हैं ॥

उपघातजक्लैब्यलक्षणम्—

या सिरा भवति वीर्यवाहिनी लिङ्गनिम्नतलनित्यगेहिनी ।
छिन्नयाऽस्ति मनुजोऽन्वितस्तया तूपघातजनपुंसकाख्यया ॥ ५४ ॥

लिङ्ग के नीचे रहने वाली जो वीर्यवाहिनी सिरा होती है, उसके कट जाने से जो क्लैब्य होता है उसे 'उपघातज क्लैब्य' कहते हैं ॥ ५४ ॥

शुक्रस्तम्भजक्लैब्यलक्षणम्—

देहे यस्य स्यादतुल्यं बलं वै यस्य प्रायो ब्रह्मचर्यप्रसङ्गात् ।
प्राप्तक्षोभस्यापि चित्तस्य रोधात् क्लैब्यं शुक्रस्तम्भहेतूत्थमुक्तम् ॥ ५५ ॥

जिसके शरीर में पर्याप्त बल होता है उसको भी प्रायः ब्रह्मचर्य रखने से अर्थात् चित्त के चलायमान होने पर भी उसे रोक रखने से जो क्लैब्य होता है उसे 'शुक्रस्तम्भज क्लैब्य' कहते हैं ॥

सहजक्लैब्यलक्षणम्—

आजन्म स्याद् यत्तु नरस्य क्लैब्यं दुर्विधिवशतो यस्य ।
सहजं नाम च तन्निदिष्टं वैद्यवरैरिह तस्य विशिष्टम् ॥ ५६ ॥

जिसे दुर्दैववश आजन्म से क्लैब्य रहता है उसे 'सहज क्लैब्य' कहते हैं ॥ ५६ ॥

साध्यासाध्यत्वम्—

क्लैब्यमसाध्यं निगदितं सहजाख्यं तु यथैव ।
ज्ञातव्यं भिषजोपघातजमपि चात्र तथैव ॥ ५७ ॥

जिस प्रकार से सहज क्लैब्य असाध्य कहा गया है उसी प्रकार 'उपघातज क्लैब्य' भी असाध्य होता है ॥ ५७ ॥

अथोपदंशनिदानम्

तत्रोपदंशस्य परिचयः—

द्विधोपदंशो मृदुलोऽथ कर्कशः स्यातामुभौ वर्णितकारणैः पुरा।
डयूक्रेयदण्डाणुभिरुद्भवेन्मृदुस्त्रिपोनिमा पैलिडमैश्च कर्कशः ॥ १ ॥
व्रणस्तु गुह्येन्द्रियगो मृदुर्मृदौ युक्तो न लिङ्गैरपि सर्वदेहगैः।
व्रणः कठोरोऽथ भवेत्तु कर्कशे स्थानीयलिङ्गैरपि देहगैर्युतः ॥ २ ॥
मृदुर्भवेद्वर्णितपूर्वलिङ्गको विवक्ष्यतेऽग्रे कठिनस्य लक्षणम्।
संलक्षयेद्दोषकृतैस्तु चिह्नैस्तं वैद्यवर्योऽमुकदोषजुष्टम् ॥ ३ ॥
फिरङ्गाख्यदेशे यतोऽयङ्गदः स्याद् विशेषात्ततो भाषितो ज्ञैः फिरङ्गः।
असौ गन्धरोगः फिरङ्गो जनानां प्रजातः स्वदेशे फिरङ्गयङ्गसङ्गात् ॥ ४ ॥
द्विधा फिरङ्गः सहजोऽथ जातोत्तरस्तथाऽऽरम्भिकयुग्द्वितीयकः।
आरम्भिके गुह्यगमेव वैकृतं द्वितीयके चाखिलदेहसम्भवम् ॥ ५ ॥
संक्रामति प्रायश एष पुंसि स्त्रीतश्च तस्यां तत एव रोगः।
जायेत चापत्यजनेष्वतोऽसौ सुदारुणोऽद्धा कुलजः प्रकीर्तितः ॥ ६ ॥
व्रणाः प्रजायन्त इहाध्युपस्थं वहिःस्थलेऽथो रुधिरे गदाणवः।
प्रविश्य कुर्वन्ति च लक्ष्म नैकं सामान्यतो लक्षणमेतदूह्यम् ॥ ७ ॥

उपदंश रोग मृदु (Soft chancre) और कर्कश (Hard chancre) भेद से दो प्रकार का होता है। यह दोनों ही प्रकार पूर्ववर्णित (उत्त. पृ. १३९) कारणों से ही उत्पन्न होते हैं किन्तु मृदु का विशिष्ट उत्पादक कारण 'डयूक्रे' का दण्डाणु' (Ducrey's bacillus) और कठिन कारण 'ट्रपोनिया पैलिडम' (Treponema palidum) नामक जीवाणु होते हैं। मृदु उपदंश से गुप्त अङ्गों से जो व्रण उत्पन्न होता है वह मृदु होता है और सार्वदेहिक ज्वर आदि सार्वदेहिक लक्षण नहीं होते। कठिन प्रकार के उपदंश से उत्पन्न व्रण कठोर होता है और उसमें स्थानीय लक्षणों के साथ अनेक सार्वदेहिक लक्षण भी होते हैं। मृदु प्रकार के प्रायः वे ही लक्षण होते हैं जो (प्राचीन आचार्यों द्वारा) पहिले (उत्त. पृ. १३९) कहे जा चुके हैं। अतः आगे केवल कर्कश प्रकार के लक्षणादि बताए जायेंगे। दोषों के लक्षणों के अनुसार इस रोग में भी किस दोष का सम्बन्ध है यह समझ लेना चाहिए।

यह (कर्कश उपदंश) विशेषतः फिरङ्ग देश (यूरोप) में होता है अतः इसे फिरङ्ग रोग भी कहते हैं। यह संक्रामक रोग है और हमारे देश में भी इसका प्रसार फिरङ्गिनियों के साथ मैथुन करने से हुआ है। फिरङ्ग (जिसे अंग्रेजी में Syphilis 'सिफलिस' कहते हैं) सहज और जातोत्तर भेद से दो प्रकार का होता है। पुनः आरम्भिक (Primary) और द्वितीयक (Secondary) भेद से दो प्रकार का होता है। आरम्भिक में गुह्याङ्ग (या अन्य उपसर्गाङ्गों) में ही विकार होता है किन्तु द्वितीयक में समस्त शरीर में विकार उत्पन्न हो जाते हैं। इसका संक्रमण पुरुष से स्त्री में एवं स्त्री से पुरुष में होता है और (रोगी माता-पिता से उत्पन्न) सन्तान में भी हो जाता है अतः इसे 'कुलज' रोग मानते हैं।

इस रोग में लिङ्गेन्द्रिय के ऊपर व्रण उत्पन्न होते हैं और इसके कीटाणु रक्त में प्रविष्ट होकर अनेक प्रकार के लक्षण उत्पन्न करते हैं, यह इस रोग का सामान्य लक्षण समझना चाहिये ॥१-७॥

तस्य कारणम्—

'स्पाइरोकीटा पैलिडा' कीटाः। लोहिते विष्टाश्चक्षुषाऽदृष्टाः ॥ ८ ॥
कारणं शस्यमामयस्यास्य। कर्षिणीतुल्या रोगिणे शल्याः ॥ ९ ॥

'ट्रिपोनिमा या स्पाइरोकीटा पैलिडा' (Treponema or Spirochaeta Pallida) नामक कीटाणु रुधिर में प्रविष्ट होकर रहते हैं जो आँख से नहीं दिखाई पड़ते किन्तु 'अणुवीक्षण' यन्त्र से दिखाई पड़ते हैं। ये देखने में चिमटी के आकार के और शल्य की भाँति दुःखदायक होते हैं। ये ही इस रोग के उत्पादक मूल कारण हैं ॥ ८-९ ॥

अस्य संप्राप्तिस्तत्र च प्रथमावस्था—

प्रायेण चाक्रमणमस्य तु मैथुनेन जायेत च क्वचन संक्रमणैरथान्यैः ॥ १० ॥
जीवाणवोऽस्य हि गदस्य सदाऽध्युपस्थं स्पर्शस्थले विदधति व्रणमत्युदग्रम्।
पूर्वं भवेत्त्वचि तु वर्त्तुलसूक्ष्मकोषाणां वृद्धिरत्यधिकतासहिता विशेषात् ॥ ११ ॥
संजायते तदनु सौत्रिकतन्तुजालसंवर्द्धनं प्रतिदिनं ननु रोगिमध्ये।
शूना कला भवति रक्तधराऽतिवृत्तकोषाणुवृद्धिसहिताऽविरतं नितान्तम् ॥१२॥
हेतोरतो रुधिरधारिधराऽध्वसूक्ष्मत्वं जायते तदनु संनिधिवर्त्तिनोऽद्धा।
पूर्णाभिवृद्धिरुदिताऽपि भवेल्लसीकाग्रन्थिव्रजस्य किल तास्वणुकोषसंस्था ॥१३॥

विशेषतवात इस रोग का आक्रमण मैथुन द्वारा होता है। इस रोग के जीवाणु मूत्रेन्द्रिय के स्पर्श करने वाले स्थान में भयङ्कर व्रण उत्पन्न करते हैं। प्रथम त्वचा के ऊपर वर्त्तुलाकार सूक्ष्म कोषाणुओं (Cells) की वृद्धि होती है। उसके वाद रोगी में सौत्रिक तन्तु-समूह की वृद्धि प्रतिदिन होती है और रक्तधरा कला शोथयुक्त हो जाती है तथा उसमें गोल कोषाणुओं की अत्यधिक वृद्धि होती है जिससे रक्तवाहिनियों का मार्ग सकरा हो जाता है। उसके वाद उसके समीप में रहने वाली लसीकाग्रन्थियों और कोषाणुओं की पूर्ण वृद्धि हो जाती है ॥ १०-१३ ॥

अस्य द्वितीयाऽवस्था—

सप्ताहषट्केन ततः प्रयान्ति ग्रन्थिभ्य एवास्य गदाणवोऽस्रम्।
प्रकुर्वते च त्वचि तत्र संगतास्ते श्लेष्मलायां हि ततः कलायाम् ॥ १४ ॥
स्फोटांस्तथाऽद्धा पिडिका अवश्यं ततः प्रवृद्धिं विपुलां प्रयाति।
समस्तकायस्थितिमल्लसीका-ग्रन्थिव्रजोऽस्मिन्नुपदंशरोगे ॥ १५ ॥
पश्चाद्भवेद् ग्रन्थिषु कोषतन्तुप्रवर्धनं पूर्ववदेव नूनम्।
गदस्य चेत्थं गदिता द्वितीयाऽवस्था भिषग्भिर्बहुशो विविच्य ॥ १६ ॥

६ सप्ताह में इस रोग के जीवाणु लसीका-ग्रन्थियों से रक्त में पहुँच कर त्वचा एवं श्लेष्मल कला में पिडिकायें या स्फोट उत्पन्न कर देते हैं। इस उपदंश रोग में शरीरस्थित सारी लसीका-ग्रन्थियाँ अत्यधिक बढ़ जाती हैं उसके वाद उन ग्रन्थियों में पूर्वोक्त प्रकार से कोषाणुओं और सौत्रिक तन्तुओं की भी वृद्धि होती है। यह इस रोग की द्वितीयावस्था कहलाती है ॥ १४-१६ ॥

अस्य तृतीयाऽवस्था—

स्यानग्रन्थीनूर्ध्वमब्दद्वयात्तु प्रायः कुर्वन्त्यामयस्याणवोऽस्य।
रोगग्रस्तानां नृणां वै विशिष्टभागेष्वेवाथो शरीरस्य मध्ये ॥ १७ ॥
पश्चात्ते तु ग्रन्थयो मांसपेशीभिस्तत्रस्था आवृताः सन्त एव।
सूक्ष्माः स्थूलाः क्षुद्रवृत्तैश्च कोषैः किं वा कोषैः श्लैष्मिकैः सर्वथैव ॥ १८ ॥
नूनं सौत्रैस्तन्तुभिर्वा कृताः स्युः पश्चात्ते च ग्रन्थयो मध्यभागात्।
संयाताः स्युः शीर्णभावं विशेषात् पश्चाज्जायेत व्रणत्वं तु तत्र ॥ १९ ॥

तस्मिन् काले रक्तसंवाहिनाड्यो दार्ढ्यं प्राप्ता रज्जुवच्चातिमात्रम् ।
संदृश्यन्ते चातिसंकीर्णमार्गास्तत् संकीर्णत्वातिरेकाद् यदा तु ॥ २० ॥
तासां जायेताथ मस्तिष्कदेशे भूम्ना मार्गस्यावरुद्धत्वमेव ।
पक्षाघातो मूर्च्छनं वाऽपि मृत्युर्नूनं तेनास्मिन् गदे स्यात्तदा तु २१ ॥
इत्थं तासां हृत्प्रदेशे कदाचिच्चेत्स्यान्मार्गस्यावरुद्धत्वमद्धा ।
जायेताशु प्रायशो वै तदा तु हृत्कार्यस्यातीवरोधोऽप्यकस्मात् ॥ २२ ॥
किंवा तत्र स्याद्धृदो विस्मृतिश्च ह्येवंभूता अन्य एवोपसर्गाः ।
प्राणघ्ना वा दृश्यमाना भवेयुः प्रोक्ताऽवस्थाऽस्येत्थमेषा तृतीया ॥ २३ ॥

इस रोग के कीटाणु प्रायः दो वर्ष के बाद रोगियों के शरीर के विशिष्ट भागों में श्यान ग्रन्थियाँ (Gumma) उत्पन्न कर देते हैं। उसके बाद वे ग्रन्थियाँ वहाँ की मांसपेशियों से आवृत रहती हैं और सूक्ष्म वा स्थूल, क्षुद्र, गोलाकार किंवा श्लैष्मिक कोषाणुओं से या सौत्रिक तन्तुओं से निर्मित होती हैं। उसके बाद ग्रन्थियां मध्यभाग से विशीर्ण हो (फूट) जाती हैं, जिससे उनमें व्रण बन जाता है। उस समय रक्तवाहिनी नाडियाँ रज्जु (रस्सी) की भाँति दृढ़ (कठिन) हो जाती हैं और उनके मार्ग अत्यन्त संकीर्ण हो जाते हैं। इस प्रकार इनकी अत्यन्त संकीर्णता के कारण जब कभी मस्तिष्क देश में उनके रक्तमार्ग का अवरोध हो जाता है तब रोगी को पक्षाघात, मूर्च्छा अथवा मृत्यु तक भी हो जाती है। इसी प्रकार से जब कभी हृदय प्रदेश में रक्तवाहिनियों के मार्ग का अवरोध हो जाता है तब अकस्मात् हृत्कार्य का अवरोध (हृद्गति बन्द) उपद्रव उत्पन्न हो जाता है अथवा हृदय की विस्तृति किंवा इसी प्रकार के अनेक अन्य प्राणनाशक उपद्रव हो जाते हैं ॥ १७–२३ ॥

आसूत्तरोत्तरं जीवाणूनामल्पतानिर्देशः—

पुरोदितास्वासु दशासु तूत्तरोत्तरं भिषग्वृन्दमवैतु चाल्पताम् ।
व्रणेषु जीवाणुगणस्य चामयप्रदायिनो नूनमिहोपदंशे ॥ २४ ॥

उपर्युक्त तीनों अवस्थाओं में उत्तरोत्तर रोगी के व्रणों में रोगोत्पादक कीटाणुओं की कमी होने लगती है ॥ २४ ॥

अस्य लक्षणम्—

श्यानाभिधा ग्रन्थय आमयेऽस्मिंस्तनौ भवेयुर्ननु यत्र तत्र ।
वर्णस्तु तेषां पललोपमो वा ताम्रोपमो वा परिदृश्यतेऽत्र ॥ २५ ॥
त उद्भवेयुश्च समानरूपतो भूयः शरीरस्य च पार्श्वयोः सदा ।
यदा ह्यनेके मिलिताः परस्परं तदा तु दध्युर्ननु मण्डलाकृतिम् ॥ २६ ॥
मन्दज्वरः स्यादिह कण्ठपाकता न्यूनत्वमस्रस्य तथेन्द्रलुप्तता ।
शिरोव्यथा नक्तमथास्थिमध्ये रुजा सशोथाऽभ्यधिका प्रदृश्यते ॥ २७ ॥
मुखेऽधिनासं रदनच्छदेऽथो श्लेष्मच्छदे योनिगते विशेषात् ।
भवेद् व्रणोत्पत्तिरपीह संशयो विधेय ईषन्न कदाऽपि कोविदैः ॥ २८ ॥
श्यानाभिधग्रन्थिसमुद्भवोऽस्थिन यकृत्यथो प्लीह्न्यधिफुफ्फुसं हृदि ।
संदृश्यते तत्स्फुटनं ततश्च तथा च तत्र स्फुटितेऽथ रूढे ॥ २९ ॥
समुद्भवेत्सौत्रिकतन्तुता तदा गदेऽत्र योषित्स्वपि गर्भपातः ।
आदौ भवेच्च क्रमतस्ततः स बिलम्बतो दृश्यत एव लोके ॥ ३० ॥
तदन्वपातश्च ततोऽल्पजीविनः शिशोर्भवेदुद्भव एव सर्वथा ।

ततः क्रमेण ह्युपदंशरोगिणश्चिरायुषो बालजनस्य जन्म ॥ ३१ ॥
प्रजायते प्रायश एव चैषा रीतिर्भिषग्भिर्भुवनेऽनुभूता ।
ततस्तु तद्बालगतो ह्यवश्यं सदोपदंशः सहजः स बोध्यः ॥ ३२ ॥

इस रोग में शरीर में जहाँ-जहाँ श्यान-ग्रन्थियाँ (गुमा) होती हैं वहाँ का वर्ण मांस अथवा ताम्र के समान दिखाई देता है । वे ग्रन्थियाँ प्रायः शरीर के दोनों पार्श्वों में समान रूप से उत्पन्न होती हैं । जब वे बहुत सी एकत्र मिल जाती हैं तब उनका आकार मण्डल की भाँति हो जाता है । साथ में मन्द ज्वर, कण्ठ में पाक, रक्त की न्यूनता, इन्द्रलुप्त (बाल झड़ना), रात्रि में सिर में पीड़ा और अस्थियों में शोथ के साथ-साथ अधिक पीड़ा होती है मुख, नाक, ओ०, गुह्य तथा योनिगत श्लेष्मल कला में विशेषतः व्रण उत्पन्न हो जाते हैं । श्यान-ग्रन्थियाँ (गुमा), अस्थि, यकृत , प्लीहा, फुफ्फुस, हृदय इन स्थानों में उत्पन्न होकर फूट जाती हैं तथा जब वे भर जाती हैं तब उनमें सौत्रिक तन्तु उत्पन्न हो जाते हैं (और इन अंगों में संकोच आदि अनेक विकार उत्पन्न हो जाते हैं) । इस रोग में स्त्रियों को प्रारम्भ में जल्दी-जल्दी गर्भपात होता है फिर धीरे २ गर्भपात बन्द होकर कुछ दिन तक अल्पजीवी बालक और अन्त में बहुत दिनों के बाद दीर्घजीवी भी उत्पन्न होने लगते हैं । उन बालकों में जन्म से ही जो उपदंश होता है, वह 'सहज उपदंश' कहलाता है ॥ २५-३२ ॥

अत्रोपद्रवाः—

संकोचभावो ह्यधिफुफ्फुसं वा यकृत्यथो प्लीह्न्यपि पक्षघातः ।
अपस्मृतिर्मूर्च्छनमप्यवश्यमुन्मत्तता मारुतजा गदाश्च ॥
एते यदा ह्यप्युपदंशरोगमुपद्रवा वैद्यवरैर्विशिष्य ।
संकीर्त्तितास्तेन युतः स सद्यो रोगी लभेतान्तकलोकवासम् ॥ ३४ ॥

फुफ्फुस, यकृत् और प्लीहा में संकोच, पक्षाघात, मूर्च्छा, उन्माद और अन्य वातिक रोग जब उपदंश रोगी को उत्पन्न होने लगते हैं तब वह असाध्य होकर रोगी का प्राण ले लेता है ॥

अथ सहजोपदंशनिदानम्

जीवाणुयोगयुतशोणितशुक्रहेतुजातोपदंश उदितः सहजाभिधो हि ।
शुक्रे तथा रजसि दुष्ट इहोपदंशजीवाणुभिः सति तयोरवमेलनाद्वै ॥ १ ॥
जायेत कश्चन कदाचन दैवयोगाद्गर्भः स नाशमपि नूनमवाप्नुयाच्च ।
किंवा क्वचित्त्वभिनवेऽपि फिरङ्गरोगो नैवोद्भवेत्सुकृतितोऽथ च गर्भपातः ॥ २ ॥
एवं च जातुचन बालकजन्म चेत् स्यात् सद्वैद्यवृन्दपरिभाषित एव लोके ।
नूनं बुधैः स सहजेन गदेन चोपदंशेन पीडिततनुर्ननु बोधनीयाः ॥ ३ ॥
किं चोपदंशवशगा यदि गर्भिणी स्यात् तत्रोद्भवं त्वधिगतः शिशुरप्यवश्यम् ।
सांसर्गिकेण कलितः स इहोपदंशेनाभाषितो बुधजनैरपि वेदनीयः ॥ ४ ॥

जीवाणु (के विष) से युक्त रज-वीर्य के होने पर जो सन्तान होती है उसमें जो उपदंश होता है वह 'सहज उपदंश' कहलाता है । जब माता-पिता के रज तथा वीर्य उपदंश के कीटाणुओं से दूषित होते हैं उस समय दोनों का संगम होने से कदाचित् गर्भ रह जाता है तब उस गर्भ का निश्चय पात हो जाता है । कभी-कभी उपदंश रोगी के नवीन होने से भाग्यवश गर्भपात नहीं भी होता है किन्तु यदि वह बच्चा पैदा होता है तो 'सहज उपदंश' से पीड़ित शरीर वाला होता है, यदि गर्भिणी स्त्री को उपदंश रोग हो जाय तो उसके बच्चे को भी उपदंश होगा किन्तु वह 'सांसर्गिक उपदंश' कहलाता है ॥ १-४ ॥

सहजोपदंशस्य लक्षणम्—

न जातमात्रे हि शिशौ विलोक्यते गदस्य किंचित् क्वचिदेव लक्षणम् ।
परन्तु सप्ताहचतुष्टयात्परं तद्वर्ष्मणि प्राय अनावृतेषु वै ॥ ५ ॥
नासामुखादिष्वखिलेषु चाङ्गेषु पाटलाभाः पिडिका भवेयुः ।
परस्परं ता मिलिता व्रणत्वं प्रसारिणोऽद्धा बहुधा हि दध्युः ॥ ६ ॥
ततस्त्विमां प्राप्य दशामवश्यं सङ्क्षीयमाणाः शिशवः सदेहशाः ।
वलीविशेषाकलिताननाः ध्रुवं विलोक्यमाना इह वै भवेयुः ॥ ७ ॥
पतिष्णुता वाऽथ विरूपता भवेन्नखेषु तेषामपि चेन्द्रलुप्तता ।
मुखोष्ठयोर्वा व्रणयुक्तताऽधिकाऽधिनासिकं वा स्वरयन्त्रमध्ये ॥ ८ ॥
श्लेष्मच्छदेऽति व्रणिता तयोर्ध्रुवं नासाऽस्थिमध्ये गलितिर्विशेषाद् ।
मिथो विलम्बेन तथाऽस्थिकेन्द्राणां मेलनं जायत एव नूनम् ॥ ९ ॥
समुद्गमश्चाथ विनाश आशु प्रदृश्यते बालतनौ रदानाम् ।
तथाऽऽश्रितेष्वप्यथ तेषु यौवनं पुरोदिताया उपदंशजायाः ॥ १० ॥
प्रायो दशायां बहुशस्तृतीयाया लक्षणानीह भवेयुरेव ।
अथोपदंशीयगदाणुदुष्टयोः पित्रो रजःशुक्रत आसजन्मसु ॥ ११ ॥
किञ्चित्प्रवृद्धेषु च तेषु नूनं कार्श्यं प्रदृश्येत च दुर्बलत्वम् ।
तथाऽधिकत्वं वयसोऽपि लक्ष्यते तदोपदेहस्थितलक्षणैर्ध्रुवम् ॥ १२ ॥
नासासेतुश्चिप्पिटः स्याच्च तेषां साम्यं शीर्ष्णि प्रायशः संभवेद्धै ।
मूर्ध्नो रन्ध्राण्यत्र नूनं चिरेण सम्पूर्णत्वं संभजन्ते विशेषात् ॥ १३ ॥
ऊर्ध्वस्था ये भेदकास्ते रदास्तु तीक्ष्णाः कीलौपम्ययुक्ता भवेयुः ।
चक्राकारा ओष्ठयोः प्रान्तभागे बाह्ये जायेरन् व्रणाः पूर्णरीत्या ॥ १४ ॥
दीर्घास्थ्ना च स्युः शिरांसि प्रकामं स्थूलान्येवं नेत्रयोः शुक्ररोगः ।
जायेताथो शोथ एवोपतारिकायामन्ये चाक्षिरोगा भवेयुः ॥ १५ ॥

तत्काल उत्पन्न हुये शिशु में प्रायः कुछ भी सहजोपदंश के लक्षण नहीं दिखाई देते हैं किन्तु चार सप्ताह व्यतीत होने पर बालक के नासिका और मुख आदि खुले अङ्गों पर गुलाबी रंग की पिडिकायें दिखाई पड़ने लगती हैं। जो बहुत प्रकार से फैलती हुई परस्पर मिलकर व्रण का रूप धारण कर लेती हैं। इस दशा को प्राप्त होकर बालक अत्यन्त क्षीण होने लगता है और उसके मुख पर झुर्रियाँ दिखाई पड़ने लगती हैं। उसके नख गिर जाते हैं अथवा विरूप हो जाते हैं, एवं इन्द्र-लुप्त होता है, मुख, ओष्ठ, नासिका तथा स्वरयन्त्र में अथवा उनकी श्लैष्मिक कला में व्रण हो जाते हैं, नासा की अस्थि गल जाती है, अस्थियों के केन्द्रों का परस्पर मिलन विलम्ब से होता है, दाँत निकल कर शीघ्र ही गिर जाते हैं। युवा हो जाने पर उसमें पूर्वोक्त उपदंश की तृतीयावस्था के संपूर्ण लक्षण दिखाई पड़ने लगते हैं। माता-पिता के रज-वीर्य फिरङ्ग के कीटाणुओं (के विष) से युक्त होने पर जिन बालकों का जन्म होता है उनमें बड़े होने पर कृशता तथा दुर्बलता आ जाती है, वह अवस्था में कम होने पर भी अधिक अवस्था के प्रतीत होने लगते हैं, प्रायः उसका नासावंश चिपटा और सिर सपाट हो जाता है, सिर के रन्ध्र देर में पूर्ण होते हैं, ऊर्ध्वस्थ भेदक दाँत तीक्ष्ण तथा कील के समान हो जाते हैं, ओष्ठों के बाह्य प्रान्त भाग में चक्राकार व्रण हो जाते हैं, लम्बी अस्थियों के सिरे (प्रान्त भाग) स्थूल हो जाते हैं, नेत्रों में कभी-कभी शुक्र रोग (फूला) हो जाता और उपतारिका में शोथ तथा अन्य नेत्र रोग भी हो जाते हैं ॥ ५-१५ ॥

फिरङ्गरोगस्त्रिविधो भिषग्भिः प्रोक्तस्तु तत्रादिम एष बाह्यः ॥ १६ ॥

आभ्यन्तरः स्यादपि च द्वितीयो बाह्यान्विताभ्यन्तरसंज्ञकोऽन्त्यः ।
लिङ्गानि चैषामथ संब्रवीमि क्रमेण कृत्स्नं कथितानि वैद्यैः ॥ १७ ॥
बाह्यः फिरङ्गो गदितस्तु तत्र विस्फोटतुल्योऽल्परुजाऽन्वितश्च ।
प्रदृश्यते च स्फुटितो भिषग्भिः प्रायेण लोके व्रणवत् सुसाध्यः ॥ १८ ॥
आभ्यन्तरो यः स इहामवातोपमन्यथां सन्धिषु चापि नूनम् ।
शोथं विशेषाज्जनयेत्ततोऽसौ ख्यातो भिषग्भिर्ननु कष्टसाध्यः ॥ १९ ॥

फिरङ्ग रोग ३ प्रकार का होता है । पहला बाह्य दूसरा आभ्यन्तर और तीसरा बाह्याभ्यन्तर । इनमें 'बाह्य फिरङ्ग' विस्फोट के तुल्य एवं अल्प पीडा वाला होता है और व्रण की तरह फूटता है तथा 'सुसाध्य' है । आभ्यन्तर संज्ञक दूसरे फिरङ्ग रोग में आमवात के समान सन्धियों में विशेष रूप से शोथ उत्पन्न होता है, यह 'कष्टसाध्य' है ॥ १६–१९ ॥

नासाभङ्गो वह्निमान्द्यं च कार्श्यं शोषश्चास्थ्नां वक्रता वा फिरङ्गे ।
तूपद्रुत्यो भाषिता वै बलस्य क्षीणत्वं चैता इहायुर्विदग्र्यैः ॥ २० ॥

नासाभङ्ग, अग्निमान्द्य, कृशता, अस्थिशोथ, अस्थिवक्रता तथा बल की क्षीणता ये सब फिरङ्ग रोग के उपद्रव कहलाते हैं ॥ २० ॥

उपद्रवैरेभिरनन्वितो यो गदः फिरङ्गोऽभिनवो बहिर्भवः ।
भवेत् स साध्योऽथ च कष्टसाध्य आभ्यन्तरोऽयं बहुशो भिषग्भिः ॥ २१ ॥
क्षीणजनस्योपद्रवसहितो व्याप्तो बहिरन्तःस्थल उदितः ।
भवेदसाध्यः फिरङ्गरोगः कथयन्त्येतद्वैद्यपुरोगः ॥ २२ ॥

बाह्यसंज्ञक फिरङ्ग रोग यदि नवीन तथा उपद्रवरहित हो तो वह साध्य होता है और आभ्यन्तर संज्ञक फिरङ्ग रोग कष्टसाध्य होता है तथा क्षीण मनुष्य का उपद्रवयुक्त, सर्वत्र व्याप्त, बाह्याभ्यन्तरसंज्ञक फिरङ्ग रोग असाध्य होता है ॥ २१–२२ ॥

विमर्श—पूर्वोक्त दोनों प्रकार के उपदंशों का स्पष्ट और विस्तृत वर्णन ग्रन्थ के उत्तरार्ध (पृष्ठ २२५ और १२७ से १३० तक) में भी देखिए ।

अथ चुल्लिकाग्रन्थिरोगनिदानम्

अस्य परिचयः—

ग्रीवायां स्वरयन्त्रसंनिधिभवो यश्चुल्लिकानामको
ग्रन्थिः स्यात् किल तत्समुत्थितरसो देहेऽतिलाभप्रदः ।
तस्य द्वौ गदितौ गदौ गदरहस्यज्ञानिभिः कोविदै-
स्तत्राद्यो रसवृद्धिहेतुजगदः संकीर्तितः सर्वथा ॥ १ ॥
अप्यन्यो रसहानिहेतुजगदोऽग्रे वर्ण्यते पूर्णत-
स्तत्रादौ रसवृद्धिहेतुजगदो नूनं बहिर्नेत्रयुग् ।
आख्यातो गलगण्डनामक इहैकः श्लैष्मिकार्द्रान्वितः
शोथो वामनता तथा च गलगण्डोऽन्यस्य भेदास्त्रयः ॥ २ ॥
तेष्वन्त्ये गलगण्डनामकगदे सर्वाधिका चुल्लिका-
ग्रन्थेर्वृद्धिरवेक्ष्यतेऽथ सकलानां वर्णनं कृत्स्नशः ।
अप्यस्माभिरिह क्रमेण विधिवत् संपाद्यते सांप्रतं-
तत् प्रीत्या रसवृद्धिहानिजगदानां त्वं समाकर्णय ॥ ३ ॥

ग्रीवा में स्वरयन्त्र के समीप रहने वाली जो चुल्लिका[1] नाम की ग्रन्थि होती है उससे जो रस निकलता रहता है वह शरीर के लिये अत्यन्त लाभप्रद होता है। रोग के रहस्यवेत्ता लोग उक्त ग्रन्थिसंबन्धी दो रोगों का वर्णन करते हैं। उसमें रस की वृद्धि के कारण होने वाला पहला रोग 'बहिर्नेत्र गलगण्ड,[2] नामक होता है और दूसरा रस की कमी से होने वाला रोग तीन प्रकार का होता है—१. श्लैष्मिकार्द्रशोथ,[3] २. वामनता[4] (बौनापन) और ३. गलगण्ड[5]। इनमें अन्तिम जो 'गलगण्ड' रोग है उसमें सबसे अधिक चुल्लिकाग्रन्थि की वृद्धि दिखाई पड़ती है ॥ १-३ ॥

बहिर्नेत्रगलगण्डनिदानम्—

चिन्ताशोकक्रोधभीतिप्रकर्षादुष्णप्रायेष्वेव देशेष्वसौ स्यात्।
भूम्ना तत्रातीव सभ्येषु चैवं प्रायः पुंसोऽपेक्षया स्त्रीषु रोगः ॥ ४ ॥
आ पञ्चदशशरद्भ्यो विंशतिवर्षाण्यभिव्याप्य। जायेत हि बहिर्नेत्रगलगण्डाख्यो विशेषेण ॥

चिन्ता, शोक, क्रोध तथा भय की अधिकता से उष्णप्राय देशों में यह रोग अधिकतर सभ्य लोगों में १५ वर्ष की अवस्था से लेकर २० वर्ष की अवस्था तक विशेषतः उत्पन्न होता है, उनमें भी पुरुषों की अपेक्षा स्त्रियों में विशेष रूप से होता है ॥ ४-५ ॥

अस्य संप्राप्तिः—

अन्त्राद्विषं चापि विलीय पीडोपेत्योपवृक्कद्वितये निरन्तरम्।
प्रक्षोभयेन्नन्विह पिङ्गलायाः सर्वं सिरायाः किल चक्रवालम् ॥ ६ ॥
ततो बहिर्नेत्रपदान्वितोऽयं प्रजायते वै गलगण्डरोगः।
संप्राप्तिरित्थं गदिता भिषग्भिर्निदानविद्भिर्बहुशो विविच्य ॥ ७ ॥

अन्त्र से विष विलीन होकर दोनों उपवृक्कों में विकार उत्पन्न कर पिङ्गला नाड़ीमण्डल को प्रक्षुभित कर देता हैं जिससे 'बहिर्नेत्रगलगण्ड' रोग उत्पन्न हो जाता है ॥ ६-७ ॥

अस्य स्वरूपम्—

श्रमो मानसः क्षोभ एवं कदाचिद् रुजा चाधिका जातुचिद्धृत्प्रकम्पः।
अथो चुल्लिकाग्रन्थिवृद्धिश्च चक्षुर्युदासस्तथा कामशक्तेश्च ह्रासः ॥ ८ ॥
इतीमे विकाराः समुद्भूय नूनं नरान् पीडयेयुर्गदेऽस्मिन् विशेषात्।
अतो यत्नतः सद्य एवावलोच्य क्रिया रोगनाशिन्यवश्यं विधेया ॥ ९ ॥

श्रम, मानसिक क्षोभ, पीड़ा, हृत्कम्प, चुल्लिकाग्रन्थि की वृद्धि, आँखों का बाहर आजाना तथा कामशक्ति का ह्रास ये सब विकार इस बहिर्नेत्रगलगण्ड रोग में उत्पन्न होकर मनुष्यों को पीड़ित करते हैं। इसलिये शीघ्र चिकित्सा करनी चाहिये ॥ ८-९ ॥

अस्य साध्यासाध्यत्वम्—

दशायां मृदौ चास्य रोगस्य नूनं भवेत् स्वस्थताऽब्दात् परं सर्वदैव।
तथा तीव्रतामास्थितायां तु वर्षद्वयादेव पञ्चत्वमेतीह रोगी ॥ १० ॥

इस रोग की मृदु अवस्था होने पर १ वर्ष के बाद रोगी स्वस्थ हो जाता है और रोग की तीव्र अवस्था होने पर दो वर्ष के बाद मर जाता है ॥ १० ॥

अत्रारिष्टम्—

बहिर्नेत्रयुक्ते गदेऽस्मिन् यदा गलगण्डाभिधे रोगिदेहे कदाचित्।
प्रदृश्येत शक्तेर्व्ययस्याधिकत्वं तदाऽरिष्टमत्यर्थमद्धाऽवगच्छेत् ॥ ११ ॥

इस 'बहिर्नेत्रगलगण्ड' नामक रोग में रोगी के शरीर में यदि शक्ति का अधिक व्यय होता हो तो उसे अरिष्टसूचक समझना चाहिये ॥ ११ ॥

---

१. Thyroid २. Exophthalmic goitre ३. Myxoedema ४. Cretinism ५. Goitre.

श्लैष्मिकार्द्रशोथनिदानम्

तस्य परिचयः—

गदे श्लैष्मिकार्द्राख्यशोथे विशेषाद् भवेच्चुल्लिकाग्रन्थिजातस्य नूनम् ।
रसस्याधिका हीनताऽथो त्वचायां तथा श्लेष्मलायां कलायां नरेषु ॥ १२ ॥
अपि स्थूलता गौरवं चेन्द्रलुप्तोद्भवो मानसस्यापि कायस्य शीघ्रम् ।
क्रियायां भृशं मन्दता मन्दभाग्यादितीमानि चिह्नानि संक्षेपतः स्युः ॥ १३ ॥

श्लैष्मिकार्द्र शोथ (Myxoedema) रोग में चुल्लिका ग्रन्थि के रस की अधिक हानि होती है और त्वचा तथा श्लेष्मल कला में स्थूलता तथा गौरव होता है एवं इन्द्रलुप्त की उत्पत्ति तथा शारीरिक और मानसिक क्रियाओं में अत्यन्त मन्दता उत्पन्न हो जाती है ॥ १२–१३ ॥

तस्य च कारणम्—

भवेत् कारणं श्लैष्मिकार्द्राख्यशोथामयस्योद्भवे दृश्यमानं विशेषात् ।
परं चुल्लिकाग्रन्थिनिष्कासनं वै स्वयं नाश एवाथवाऽस्या अकस्माद् ॥ १४ ॥
तथा पूरुषापेक्षया स्त्रीषु सप्तगुणाधिक्यवद् दृश्यते रोगजन्म ।
भिषग्भिश्च कैश्चिन्मतोऽयं कुलोत्थस्तथैति प्रकाशं भृशं प्रौढतायाम् ॥ १५ ॥

चुल्लिका ग्रन्थि का एक दम निकाल देना या स्वयं उसका अकस्मात् नष्ट हो जाना श्लैष्मिकार्द्र शोथ नामक रोग के विशेष कारण हैं । यह रोग पुरुषों की अपेक्षा स्त्रियों में ७ गुना अधिक होता है ॥ १४–१५ ॥

विमर्श—कुछ विद्वान् इसे कुलज मानते हैं । यह रोग प्रायः प्रौढ़ावस्था (३०–५० वर्ष) में ही प्रकट होता है ।

तस्य संप्राप्तेरवतारः—

अन्तःस्था रसकारकाः प्रकथिता ये चुल्लिकाया ध्रुवं
भागा ग्रन्थिभवास्त एव हि गदे गच्छन्ति च क्षीणताम् ।
श्लेष्मा यस्त्वगधः स्थितोऽपि च भवेत् सोऽत्यन्तवृद्धिं वियात्
तस्मात्त्वक् प्रविलोक्यते प्रकृतितः स्थूला कला श्लेष्मला ॥ १६ ॥

चुल्लिका ग्रन्थि के अन्तःस्थित रसकारक अवयव श्लैष्मिकार्द्रशोथ में क्षीणता को प्राप्त हो जाते हैं और त्वचा के नीचे जो श्लेष्मा (मेद) रहता है वह अत्यन्त वृद्धि को प्राप्त हो जाता है जिससे त्वचा और श्लेष्मल कला स्थूल दिखाई पड़ने लगती है ॥ १६ ॥

तस्य लक्षणम्—

गदारम्भकाले सदैवावसादो भृशं मानसे भ्रष्टताऽपि स्मृतेश्च ।
ततः सर्वशाखासु पीडोद्भवोऽथो भवेद् गौरवं वर्त्मनो मण्डलेऽपि ॥ १७ ॥
त्वचा स्थूलभावं गता चातिशुष्का खरस्पर्शयुक्ता प्रदृश्येत नूनम् ।
विकृत्याऽन्विताः स्थौल्यमाप्ता विशुष्काः परिभ्रंशिनश्चापि केशा भवेयुः ॥ १८ ॥
ततोऽतिप्रवृद्धे गदे रोगिदेहे गुरुत्वं च मूढत्वमुत्पद्यतेऽद्धा ।
मुखं चायतं स्थूलता दीर्घताऽपि प्रजायेत दन्तच्छदद्वन्द्वमध्ये ॥ १९ ॥
तथा गण्डयो रक्तिमा कर्णपाल्यां गुरुत्वं च रोम्णां परिक्षीणताऽपि ।
अथ स्थूलता हस्तयोः पादयोश्च द्विजानां तु पातो मतेर्मन्दता स्यात् ॥ २० ॥
भवेदिन्द्रियाणां ह्रदः क्षीणताऽपि प्रजाते भृशं दारुणेऽस्मिन् गदे तु ।
तनुस्थायितापस्य मानस्य तद्वत् क्षुधो मन्दभावोऽपि भूम्ना विबन्धः ॥ २१ ॥

रोग की प्रारम्भावस्था में मन में अवसाद और स्मृति का भ्रंश हो जाता है। इसके बाद सभी शाखाओं (हाथ-पैरों) में पीड़ा होने लगती है और पलकों में भारीपन हो जाता है। त्वचा मोटी होकर अत्यन्त शुष्क तथा खर स्पर्श युक्त दिखाई पड़ने लगती है। केश विकृत, स्थूल, शुष्क और पतनशील हो जाते हैं। रोग के अधिक बढ़ जाने पर शरीर में गुरुता और मूढता उत्पन्न हो जाती है एवं रोगी का मुख चौड़ा और ओठ मोटे तथा बड़े हो जाते हैं। कपोलों पर रक्तिमा, कर्णपाली में गुरुता, रोमों की क्षीणता, हाथ-पैरों की स्थूलता, दाँतों का गिरना, बुद्धि की मन्दता और इन्द्रियों तथा हृदय की क्षीणता होती है। इस रोग की दारुण अवस्था होने पर शरीर का स्थायी तापमान तथा भूख दोनों मन्द हो जाते हैं और विबन्ध (बद्धकोष्ठता) हो जाता है॥ १७–२१॥

उग्रदशायामस्य गदस्य वन्ध्यात्वं योषित्सु विशिष्य।
सर्वत्रैवं बहुशो दृष्टं तस्माद्वैद्यैरिह निर्दिष्टम्॥ २२॥

स्त्रियों में इस रोग की उग्रता होने पर अधिकतर वन्ध्यापन हो जाता है॥ २२॥

वामनरोगनिदानम्

तस्य परिचयः—

शरीरमानहीनता तथाऽतिबुद्धिमन्दता। उपस्थसूक्ष्मता भवेत् सदा गदे तु वामने॥२३॥

शरीर की लम्बाई में कमी, बुद्धि की अत्यन्त मन्दता, लिङ्गेन्द्रिय का छोटा होना ये प्रधान लक्षण वामन (Cretinism) रोग में होते हैं॥ २३॥

तस्य कारणनिर्देशः—

आ जन्मनो भवति यस्य न चुल्लिकाख्यो ग्रन्थिस्तनावथ च तद्भवदुर्बलत्वम्।
तस्मिन्नरे नियमतो ननु वामनत्वं तस्मान्निमित्तत इहोदितमेव विद्यात्॥ २४॥
गलगण्डगदेन रोगिणः कुलबीजस्य च दुष्टता सदा।
अपि देशविशेषताऽस्य वै जनने स्यात् सहकारि कारणम्॥ २५॥

जिसके शरीर में जन्म से ही चुल्लिका नामक ग्रन्थि नहीं होती किंवा वह दुर्बल होती है उस मनुष्य में वामन रोग नियमतः उत्पन्न होता है। इस रोग में गलगण्ड रोग से कुल के बीज का दूषित होना और आनूपादिविशिष्ट देश की विशेषता ये दोनों सहकारिकारण होते हैं॥२४–२५॥

तस्य लक्षणम्—

गदे श्लैष्मिकार्द्राख्यशोथे तु यानि पुरोक्तान्यशेषाणि लक्ष्माणि तानि।
विशेषादिह स्युर्ध्रुवं वामनत्वे ह्यभिव्यक्तिमाप्तानि विद्वन्मतानि॥ २६॥
सदा मेदसा गर्भितानीह सर्वाणि चाङ्गानि ह्रस्वानि नूनं भवेयुः।
पुनश्चात्र वैशिष्ट्यमाभाति यत्तत् समस्तं मया साम्प्रतं कथ्यतेऽग्रे॥ २७॥
भवेज्जङ्घयोर्वक्रता चापि बाहुद्वयेऽथोदरे पूर्णरीत्या गुरुत्वम्।
खरस्पर्शयुक्ताऽतिशैथिल्यमाप्ता तथा स्थौल्यवत्यत्र जायेत च त्वक्॥ २८॥
प्रशूने च नासापुटे वर्त्तुलं वै भवेदाननं नासिका चायताऽपि।
ललाटं विशालं तथैवौष्ठयुग्मं सदा पीवरं पीवराऽथो रसज्ञा॥ २९॥
मतेर्मन्दता प्रायशश्च प्रणाशः स्मृतेरेवमुग्रत्वमाप्ते गदे तु।
प्रभेदः स्वरस्यात्र मेदःसमुत्थः प्रजोत्पत्तिकारीन्द्रियक्षीणता च॥ ३०॥
तथा जायते कामशक्तेश्च मान्द्यं विशेषाद्गदे वामने नूनमेव।

पूर्व में श्लैष्मिकार्द्र शोथ नामक रोग के जितने लक्षण कहे हुये हैं, वे ही सब वामन रोग में

भी व्यक्त होते हैं। विशेषतः इसमें सभी अङ्ग मेद से भरे हुये तथा छोटे २ हो जाते हैं, और दोनों जाँघों तथा बाहुओं में टेढ़ापन तथा उदर में अत्यधिक गुरुता, त्वचा पर स्पर्शवाली, अत्यन्त शिथिल तथा स्थूल, दोनों नथुने फूले हुये, मुख गोलाकार, नाक चौड़ी, ललाट चिपटा, दोनों ओठ और जिह्वा मोटी होती है बुद्धि की मन्दता और स्मृति का नाश हो जाता है। इस रोग की उग्रता होने पर मेदोज स्वरभेद हो जाता है (पू. पृ. ३०४)। सन्तान को उत्पन्न करने वाली इन्द्रिय में क्षीणता तथा कामशक्ति की मन्दता विशेष रूप से इस रोग में उत्पन्न होती है ॥ २६-३० ॥

गलगण्डविषये कथनम्—

गलगण्डगदो गदितो मुनिभिर्यत एव ततोऽस्य च रूपमलम्।
अवबोध्यमिहाखिलमुक्तमतो न हि किंचन तुल्यतया तु मया ॥ ३१ ॥

पूर्व में जो गलगण्ड रोग का लक्षण कहा गया है उसी से इस गलगण्ड का भी लक्षण समझ लेना चाहिये। यहाँ पर दोनों गलगण्डों की समानता होने से लक्षण का निर्देशन नहीं किया गया है॥

विमर्श—गलगण्ड रोग और चुल्लिका ग्रन्थि के विकारों का वर्णन उत्तरार्ध पृष्ठ ६२ एवं ६४ पर भी देखिए।

अथ मस्तिष्करोगनिदानम्

शीर्षकम्पस्य निदानम्—

यदा भवेन्मूर्ध्न्यभिघात उच्चकैस्तदा तदीयानुगुणैः स्वलक्षणैः।
सुलक्ष्यमाणः खलु शीर्षकम्पामयो भवेद्वैद्यजनाभिभाषितः ॥ १ ॥

जिस समय मस्तक में भारी आघात हो जाता है उस समय आघातानुरूप लक्षणों से युक्त शीर्षकम्प रोग होता है ॥ १ ॥

शीर्षकम्पस्य लक्षणम्—

हृल्लासमूर्च्छे वमनं जडत्वं चित्तस्य चाञ्चल्यमतीव वेपथुः।
स्यात् कर्णनादो मलिनास्यता च प्रविस्तृतिर्नेत्रकनीनिकायाः ॥ २ ॥
नाड्यास्तथा स्पन्दनमल्पमात्रं शैत्यं तनोर्दुर्बलताऽधिकाऽपि।
वाचो विकारः खलु पक्षहानी रोगे प्रजायेत हि शीर्षकम्पे ॥ ३ ॥

हृल्लास (उबकाई), मूर्च्छा, वमन, जड़ता, चित्त की चञ्चलता, अत्यन्त कंपकपी, कर्णनाद (कर्ण में शब्द सुनाई देना), मुख की मलिनता, नेत्र की कनीनिका की अधिक विस्तृति, नाडी के स्पन्द की स्वल्पता, शरीर की शीतलता, अधिक दुर्बलता, वाणी में विकार, पक्षाघात ये सब लक्षण शीर्षकम्प रोग में उत्पन्न होते हैं ॥ २-३ ॥

विमर्श—देखिये पूर्वार्ध पृष्ठ ३३१

अथ मस्तिष्कचयापचयनिदानम्

तत्र मस्तिष्कचयस्य निदानादिकमाह—

प्रायः शिशूनां क्वचिदेव यूनां दुर्भाग्यतोऽजस्रमपि स्वभावात्।
कपालमत्यर्थमुपैति वृद्धिं मस्तिष्कवृद्धौ खलु मस्तुलुङ्गः ॥ १ ॥
वृद्धिः समाना यदि मस्तुलुङ्गकपालगा स्याद्धि तदा तु तत्र।
प्रायेण काचिन्न विकारजाता भीतिर्भिषग्भिः क्वचिदूहनीया ॥ २ ॥
स्वाभाविकी चेदथवाऽस्ववस्था क्वचित्कपालस्य तथा च वृद्धिः।
मस्तिष्कमध्ये तु तदाऽतिघोरा उपद्रवाः सन्तु तदीयपीडनात् ॥ ३ ॥

प्रायः शिशुओं के और कभी-कभी युवकों के कपाल की दुर्भाग्यवश या स्वभावतः वृद्धि होती है और उसकी वृद्धि होने पर मस्तुलुङ्ग की भी वृद्धि होती है। यदि सौभाग्यवश मस्तुलुङ्ग तथा

कपाल की वृद्धि समान रूप से हो तो किसी प्रकार के विकार का भय नहीं समझना चाहिये। किन्तु यदि केवल कपाल की और कभी केवल मस्तिष्क की ही वृद्धि हो तो मस्तिष्क के पीड़ित होने से अत्यन्त घोर उपद्रव होते हैं ॥ १-३ ॥

उपद्रवानाह—

शिरोऽर्त्तिर्भ्रमो मूर्च्छनं पक्षनाशो वलस्यापि हानिस्तथाऽऽक्षेपरोगः।
तथाऽन्तेऽपि मृत्युश्च मस्तिष्कवृद्धावुपद्रुत्य एता भिषग्भिर्विभाव्याः ॥ ४ ॥

सिर में पीडा, भ्रम, मूर्च्छा, पक्षाघात, वल की हानि, आक्षेप रोग और अन्त में मृत्यु ये सब उपद्रव मस्तिष्क-वृद्धि होने पर होते हैं ॥ ४ ॥

मस्तिष्कह्रासमाह—

वृद्धिस्तु मस्तिष्कभवा तथा स्याद्ध्रासस्तथैवाप्युपजायते हि।
ह्रासोऽपि मस्तिष्कगतः कपाले प्रवर्द्धमानेऽतिभयङ्करः स्यात् ॥ ५ ॥
ह्रासो यदा स्यात् क्वचिदेकपार्श्वे मृत्युर्भवेन्नैव तदाऽऽतुरस्य।
चेन्मस्तुलुङ्गस्य समन्ततो वा ह्रासस्तदाऽऽश्वस्तु मृतिस्तदीया ॥ ६ ॥
स्यान्मस्तुलुङ्गस्य सदैव वृद्धिर्ह्रासोऽपि नूनं मरणाय लोके।
व्यर्थो भवेदत्र यदप्युपायस्तथाऽपि रासायनिको विधेयः ॥ ७ ॥

जिस प्रकार मस्तिष्क की वृद्धि होती है उसी प्रकार ह्रास भी होता है। ह्रास भी यदि मस्तिष्क का हो कपाल की वृद्धि हो तो यह अत्यन्त भयङ्कर होता है। और जब कभी एक पार्श्व में मस्तिष्क का ह्रास हो तो उससे रोगी की मृत्यु नहीं होती। किन्तु यदि चारो तरफ से मस्तुलुङ्ग का ह्रास हो तो अवश्य मृत्यु हो जाती है। मस्तुलुङ्ग की वृद्धि और ह्रास दोनों ही सदा मृत्युप्रद होते हैं। इस समय रासायनिक चिकित्सा करनी चाहिये ॥ ५-७ ॥

अथ शीर्षाम्बुरोनिदानम्

शीर्षाम्बुरोगस्य निदानसंप्राप्त्यादिकमाह—

दुष्टाम्बुपानादतिशैत्यतो वाऽऽन्त्रेषु क्रिमेरुद्भवतोऽभिघातात्।
असात्म्यभोज्याशनतः सुराया अत्यर्थपानात् पवनप्रदोषात् ॥ १ ॥
संचीयते यत्क्रमतः शिरःस्थस्नेहस्य भूमौ बहुलं जलं हि।
तदेव वैद्यैर्गदितस्तु शीर्षाम्बुरोग एषोऽस्त्वतिदुश्चिकित्स्यः ॥ २ ॥
प्रायः शिशूनामुपजायतेऽसौ वाल्ये वयस्येव गदो विशेषात्।
दन्तोद्गमेऽनेकविधाहितानां निषेवणात्सद्भिषजां मतेन ॥ ३ ॥

दूषित जल के पीने से, अत्यन्त शीत लगने से, आँतों में क्रिमि उत्पन्न होने से, अभिघात से, असात्म्य (प्रकृतिविरुद्ध) भोजन से, मद्य के अधिक पीने से, वायु के प्रकोप से, शिरःस्थित स्नेह के स्थान में क्रमशः बहुत सा जल एकत्र हो जाता है, उसी को शीर्षाम्बुरोग कहते हैं। यह अत्यन्त दुश्चिकित्स्य होता है। यह रोग प्रायः बाल्यावस्था में बच्चों को हो जाता है। जब कि वे दाँत निकलने के समय अनेक प्रकार के अहितकर पदार्थों का सेवन करते हैं ॥ १-३ ॥

शीर्षाम्बुरोगस्य पूर्वरूपम्—

जिह्वाऽऽवृता गाढपुरीषताऽथो दौर्बल्यनिद्राऽधिकते तथा च।
निःश्वासमध्येऽपि च पूतिगन्धः शीर्षाम्बुरोगेऽस्त्विति पूर्वरूपम् ॥ ४ ॥

जिह्वा के ऊपर मल का जम जाना, विष्ठा का गाढा होना, दुर्बलता, अधिक निद्रा का होना और निश्वास के अन्दर पूतिगन्ध होना ये सब लक्षण शीर्षाम्बुरोग के पूर्वरूप के हैं ॥ ४ ॥

शीर्षाम्बुरोगस्य लक्षणम्—

तीव्रा व्यथा शिरसि कृष्णपुरीषताऽथो मूत्राल्पता श्रुतिगताऽक्षिण च तीक्ष्णता स्यात्॥
वेगं समाश्रितवती धमनी त्वचायां रूक्षोष्णते च वमनं विषमाऽक्षितारा ॥ ५ ॥
कण्डू रदच्छदगताऽपि च नासिकाया लौहित्यमक्षियुगले च विवर्णताऽऽस्ये।
आक्षेपकः प्रलपनं खलु पक्षनाशः शीर्षाम्बुरोग इति लक्ष्म विभावनीयम् ॥ ६ ॥

सिर में तीव्र पीड़ा, विष्ठा का वर्ण काला, मूत्र की कमी, श्रवण तथा दृष्टि की शक्ति का तीक्ष्ण हो जाना, नाडी की गति वेगयुक्त होना, त्वचा में रूक्षता तथा उष्णता, वमन, आँखों की पुतलियों का विषम हो जाना, ओष्ठ में खुजली, नासिका तथा आँखों का लाल हो जाना, मुख में विवर्णता, आक्षेपक, प्रलाप तथा पक्षाघात ये सब लक्षण 'शीर्षाम्बुरोग' में होते हैं ॥ ५-६ ॥

विमर्श—अंग्रेजी में इसे 'हाइड्रोकेफलस' (Hydrocephalus) कहते हैं। मस्तिष्क का संकोच, वृद्धावस्था, कृशता एवं रक्तस्राव आदि कारणों से मस्तिष्क और कपालास्थियों के बीच द्रव सञ्चय होने पर इसे 'बाह्य' (H. Externus) एवं मस्तिष्क के विभिन्न कोष्ठों को ब्रह्मवारि (C. S. Fluid) के सञ्चय से उत्पन्न होने पर 'आभ्यन्तर' (H. Internus) कहते हैं। इसी को मस्तिष्कचय भी कहते हैं। और जब 'बाह्य' प्रकार के कारणों से अथवा कोष्ठगत द्रव की कमी से मस्तिष्क संकुचित हो जाता है तो उसे मस्तिष्कापचय (Atrophy of brain) कहते हैं।

अथ योनिकण्डूनिदानम्

योनौ प्रायः श्लेष्मवैगुण्यहेतोरर्शःकोपाद्वस्तिजातेऽर्बुदेऽपि।
योनिस्थानां संप्रसारात् सिराणां किं वा नारीणां विकाराज्जरायोः ॥ १ ॥
पुंसा सार्द्धं सर्वदाऽतिप्रसङ्गात् प्रायः काले चार्त्तवस्य प्रवृत्ते।
गर्भस्य प्रागुद्भवे वातलत्वाद् योनेः कण्डूर्जायते योनिमध्ये ॥ २ ॥
एवं नारीवृद्धतातो विशेषात् प्रोक्तं वैद्यैर्योनिकण्डूनिदानम् ॥ ३ ॥

कफ की विगुणता, अर्श के कोप एवं बस्ति में अर्बुद रोग से, योनिगत सिराओं के प्रसार, जरायु में विकार, अति मैथुन, आर्तव-प्रवृत्ति का काल, अनुत्पन्न गर्भ के दबाव से वाताधिक्य होने पर और विशेषतः स्त्री की वृद्धावस्था आने पर योनि में खुजली होती है, इसे 'योनिकण्डू' कहते हैं ॥ १-३ ॥

योनिकण्डूलक्षणम्—

योनौ कण्डूर्योनिकण्डूगदे स्यात् तोदो रौक्ष्यं शुष्कता चापि नूनम्।
वृद्धिर्व्याधेरुष्णतातोऽपि शैत्याच्छान्तिर्लोके वैद्यवर्यैः प्रदिष्टा ॥ ४ ॥

योनिकण्डू रोग में योनि में कण्डू (खुजली), सुई चुभोने जैसी पीड़ा, रूक्षता और शुष्कता होती है, उष्णता से व्याधि की वृद्धि और शीतलता से शान्ति होती है ॥ ४ ॥

अथ योन्याक्षेपनिदानम्

योनौ यदा विगुणता पवनस्य नूनं स्पर्शस्य वृद्धिरमिता तु तदोदिता स्यात्।
विक्षेपणं भवति योनिमुखे च तस्य स्पर्शे व्यथाऽपि गहना प्रमदाजनस्य ॥ १ ॥
एतद्गदेन कलिता न सहेत नारी पुंसा कृतं रतिविलासमथो बलाच्चेद्।
भर्त्ता रमेत हि तया सह तर्हि पीडाऽऽक्रान्ता भवेत्तु तरुणी विकलेन्द्रियाऽद्धा ॥ २ ॥
भयन्यथाभीतिसमन्विता सा यतो न कान्तं प्रति याति कामिनी।
ततः प्रियेणातितिरस्कृता क्वचित् समीहते मर्त्तुमतीव दुःखिता ॥ ३ ॥

योनि में जब वायु की विगुणता होती है तब स्पर्श-शक्ति की अमित वृद्धि होती है और योनि के मुख में विक्षेपण होता है तथा स्पर्श करने पर भयङ्कर पीड़ा होती है। इस रोग से

आक्रान्त होने पर स्त्री मैथुन नहीं सहन कर सकती। यदि उसका स्वामी बलपूर्वक उसके साथ रमण करता है तो स्त्री विकल हो जाती है और भय से वह स्वामी के पास नहीं जाती। अत एव वह स्वामी से अत्यन्त तिरस्कृत होती हुई मारे दुःख के मर जाना चाहती है॥ १-३॥

योन्याक्षेपस्य लक्षणम्—

योन्याक्षेपे वह्निमान्द्यं तथा चोद्वेगो निद्राऽल्पत्वमुक्तं क्रमेण।
वस्तौ दाहः पृष्ठदेशे व्यथा च स्यात्संचारेऽङ्घ्रिद्वयेनाप्यशक्तिः॥ ४॥
उत्साहस्य क्षीणता दुर्बलत्वं वैवर्ण्यं चेमानि चिह्नानि नूनम्।
आयुर्वेदज्ञानवृद्धैर्विशेषात् सद्भिः प्रोक्तानीति विज्ञेयमत्र॥ ५॥

योन्याक्षेप रोग में अग्नि की मन्दता, उद्वेग, निद्रा की स्वल्पता, वस्ति स्थान में दाह, पृष्ठदेश में पीडा, दोनों पैरों में चलने की शक्ति का अभाव, उत्साह की क्षीणता, दुर्बलता और विवर्णता ये सब लक्षण होते हैं॥ ४-५॥

अथ योनिव्यापत्सु बाधकरोगनिदानम्

बाधकभेदानाह—

बाधकत्वेन ये लोके प्रजोत्पत्तौ विशेषतः। विख्याता बाधका रोगा वक्ष्ये ताञ्छृणु सादरम्॥
प्रथमा रक्तमाद्री स्यात् षष्ठी नाम्न्यपरा स्मृता। उक्तोऽङ्कुरस्तृतीयो वै तुर्यो जलकुमारकः॥

सन्तानोत्पत्ति में रक्तमाद्री, षष्ठी, अङ्कुर और जलकुमार ये ४ बाधक रोग हैं॥ १-२॥

रक्तमाद्रीलक्षणम्—

कट्यां व्यथा यदि भवेदथ नाभिदेशस्याधःस्थले स्तनयुगेऽपि च पार्श्वभागे।
नारी तदा तु कलिता ननु रक्तमाद्रीदोषेण किञ्च तत एव फलेन हीना॥ ३॥
मासैकं वा मासयुग्मं कदाचिच्चेन्नारीणामार्त्तवस्रावयोगः।
तर्हि स्युस्ता रक्तमाद्रीतिदोषेणैव ग्रस्तत्वेन हीनाः फलेन॥ ४॥

कटि, नाभिदेश के नीचे का भाग, दोनों स्तनों और पार्श्वभाग में भी यदि व्यथा हो तो नारी रक्तमाद्री दोष से पीड़ित और गर्भस्थिति से शून्य होती है। इस रोग में कभी-कभी एक या दो मास तक आर्तवस्राव का संबन्ध बना रहता है जिससे स्त्री गर्भस्थिति से हीन रहती है॥ ३-४॥

षष्ठीलक्षणम्—

षष्ठीरोगग्रस्तनार्यास्तु नेत्रे हस्ते ज्वाला स्याद्विशेषाद्भगेऽपि।
एवं जुष्टं लालयाऽप्यार्त्तवं तु प्रोक्तं चिह्नं चेति वैद्यैरभिज्ञैः॥ ५॥
स्याच्चेत् षष्ठीबाधकाख्यामयेनोपेता नारी तर्हि वारद्वयं सा।
स्नायान्मासे चार्त्तवस्रावयोगाद् योनिस्तस्या रक्तमालिन्ययुक्ता॥ ६॥

षष्ठी रोग से ग्रस्त हुई स्त्री के नेत्रों तथा हाथों में विशेषतः भग में ज्वाला सी बनी रहती है और आर्त्तव लाला से युक्त रहता है तथा महीने के अन्दर दो बार आर्त्तवस्राव (ऋतुधर्म) होता है। स्त्री की योनि रक्त की मलिनता से युक्त होती है॥ ५-६॥

अङ्कुरलक्षणम्—

स्यादुद्वेगो गौरवं चापि देहे रक्तस्रावश्चाधिकश्चेत्तरुण्याः।
शूलं नाभेर्निम्नभागे तदा सा ज्ञेया वैद्यैरङ्कुरेणैव युक्ता॥ ७॥
युक्ताऽङ्कुराख्येन हि बाधकेन मासत्रयं मासचतुष्टयं वा।
नारी भवेदप्यृतुना विहीना कराङ्घ्रिदाहेन युता कृशाङ्गी॥ ८॥

उद्वेग, शरीर में गुरुता, अधिक रजःस्राव और नाभि के नीचे शूल ये सब लक्षण यदि स्त्री

को प्रगट हों तो वह अङ्कुरसंज्ञक घातक रोग से पीड़ित होती है। उस रोग से पीड़ित स्त्री ३-४ मास तक ऋतुधर्म से रहित होती है, उसके अङ्ग कृश हो जाते हैं तथा हाथ-पैरों में जलन भी होती है ॥ ८ ॥

जलकुमारलक्षणम्—

भवतु शूलयुताऽपि च गर्भिणी यदि हि शुष्कतनुस्तनुरक्तिका।
प्रकटिता किल तत्फलहीनता जलकुमारकदोषतया तदा ॥ ९ ॥
जलकुमारकदोषनिपीडिता कृशतनुः प्रमदा खलु पीवरा।
बहुदिनं च भवेदृतुमत्यथो गुरुकुचा क्षतजाल्पतयाऽन्विता ॥ १० ॥

यदि गर्भिणी स्त्री शूल से युक्त हो, शरीर सूख गया हो और रक्त थोड़ा हो तो उसे 'जलकुमारक' संज्ञक बाधक रोग होने से सन्तान होने में बाधा होती है अर्थात् वह गर्भ निष्फल हो जाता है। इस रोग से कृश शरीर वाली हो तो मोटी हो जाती है, बहुत दिनों पर उसे ऋतुधर्म होता है तथा उसके स्तन भारी हो जाते हैं और रक्त की कमी हो जाती है ॥ ९-१० ॥

अथ जरायुरोगनिदानम्[1]

प्रायेणाधानाद्धि गर्भस्य नैरन्तर्येणाद्धा स्रावतस्तस्य वाऽपि।
शैत्यात्तद्वच्चार्द्रभूमौ निवासाद्रोगाद्वा पापोपदंशाद्विशेषात् ॥ १ ॥
अत्यर्थं वा मैथुनस्य प्रयोगात् किंवा संगात्पूयमेहार्दितेन।
संजायेत स्त्रीजने वै जरायुरोगस्तस्याकर्णयापि स्वरूपम् ॥ २ ॥

निरन्तर गर्भ का आधान तथा स्राव हो जाने से, किंवा शीतलता से, वा आर्द्रभूमि में निवास करने से, विशेषतः पापोपदंश रोग से वा अत्यन्त मैथुन से वा पूयमेह से युक्त पुरुष के साथ संभोग करने से स्त्री में 'जरायु रोग' हो जाता है ॥ १-२ ॥

तस्य स्वरूपम्—

ज्वरोऽग्निमान्द्यं त्रिकतोदनं तथा व्यथाऽतिनिम्नोदरमध्यगाऽपि।
अथोष्णता बस्तिगता गुरुत्वं मुहुर्मुहुर्मूत्रप्रवृत्तिरेव ॥ ३ ॥
भगादपि क्लेदपरिस्रुतिस्तथा मलस्य शश्वच्च प्रवृत्तिरप्यथो।
ततोऽवरोधो मुखनीलिमाऽर्शः सुदुर्बलत्वं वमथुः शिरोव्यथा ॥ ४ ॥
आविर्भवेयुर्निखिलाङ्गनासु जरायुरोगस्य तु लक्षणानि ॥ ५ ॥

ज्वर, अग्नि की मन्दता, त्रिकस्थान में सूई चुभोने की सी पीड़ा, उदर के नीचे पीड़ा, बस्ति स्थान में उष्णता, गुरुता, बारंबार मूत्रस्राव, भग से क्लेद का स्राव, मलोत्सर्ग की बारंबार प्रवृत्ति वा एकाएक रुक जाना, मुख का वर्ण नीला हो जाना, अर्श, दुर्बलता, वमन और सिर में पीडा ये सब लक्षण जरायु (गर्भाशय=Uterus) की विकृति से उत्पन्न जरायुरोग में होते हैं ॥ ३-५ ॥

अथाण्डाधाररोगनिदानम्[2]

अतिव्यवायादतिशीतसेवनात्तथाऽभिघाताद्विषभोजनादपि।
अथो कुपथ्याशनतो गदोऽण्डाधारः प्रजायेत सदाऽङ्गनासु ॥ १ ॥

अत्यन्त मैथुन से, अत्यन्त शीत लगने या शीतल वस्तु के सेवन से, चोट लगने से, विषभक्षण करने से, सदा कुपथ्य भोजन करने से, स्त्रियों में अण्डाधार रोग उत्पन्न होता है ॥ १ ॥

तस्य लक्षणम्—

उरुव्यथोरूदरमध्यसंस्था कृच्छ्राल्पते मूत्रगते सरक्तता।
अरोचकत्वं स्वरतिर्बलक्षयो ज्वरश्च हृल्लास इहोद्भवेयुः ॥ २ ॥

---

१. Diseases of uterus. २. Diseases of fallopian tube.

क्षुद्रा सवेगा धमनी च जिह्वा रक्तोज्ज्वला स्यादनिशं गदिन्याः ।
बोध्यानि चिह्नानि भिषग्भिरण्डाधारामयस्येति सुभाषितानि ॥ ३ ॥

जङ्घा तथा उदर के मध्य में अधिक व्यथा, मूत्रकृच्छ्रता या मूत्र की अल्पता वा रक्त मिश्रित मूत्रस्राव, अरोचक, अरति (बेचैनी), बल की क्षीणता, ज्वर और हृल्लास (उबकाई) ये सब लक्षण अण्डाधार रोग में प्रकट होते हैं। इस रोग में नाडी क्षुद्र तथा वेगयुक्त हो कर निरन्तर फड़कती है। जिह्वा उज्ज्वल रक्तवर्ण की होती है ॥ २-३ ॥

अथ बन्ध्यारोगनिदानम्

बन्ध्याङ्गनानां नवधा प्रभेदाः प्रकीर्त्तिताः प्राक्तनवैद्यवर्यैः ।
तत्रादिबन्ध्या प्रथमा तु बोध्या तदुद्भवः स्यादतिपापकर्मभिः ॥ १ ॥
रक्तेन वातेन तथैव पित्तेन श्लेष्मणा चापि समस्तदोषैः ।
एवं भवेत् पञ्चविधाऽथ तिस्रो भूतेन दैवेन तथाऽभिचाराद् ॥ २ ॥
तथा प्रकारान्तरतोऽपि बन्ध्या चतुर्विधा संकथिता पुनश्च ।
तत्रादिमा वै गदिता तु गर्भस्राविण्यथाऽन्या मृतपुत्रिका च ॥ ३ ॥
कन्याप्रसूः स्याच्च मता तृतीया सकृत्प्रसूर्या नियतं चतुर्थी ।
एषैव लोके किल काकवन्ध्या निगद्यते वैद्यजनैरवश्यम् ॥ ४ ॥
तथैव बन्ध्या भवतीह नारी तथैव बन्ध्योऽपि पुमान् प्रकीर्त्तितः ।
तच्छुक्रमध्यस्थितदोषजातैः सर्वं सुधीभिः स्वधियैव बोध्यम् ॥ ५ ॥

बन्ध्या स्त्रियों के नव प्रकार के भेदों को प्राचीन वैद्यों ने कहा है। उसमें प्रथम 'आदि बन्ध्या' की उत्पत्ति अत्यन्त पाप कर्मों से होती है। इसके अतिरिक्त, रक्त, वात, पित्त, कफ और त्रिदोष भेद से ५ प्रकार की और भूत, दैव तथा अभिचार भेद से तीन प्रकार की और भी बंध्यायें होती हैं। मतान्तर से गर्भस्राविणी, मृतपुत्रिका, कन्याप्रसूता और सकृत्प्रसूता (काकवन्ध्या) ये ४ भेद होते हैं। जिस प्रकार से स्त्रियाँ बन्ध्या होती हैं उसी प्रकार से पुरुष भी अपने शुक्रगत दोषों से वन्ध्य (नपुंसक) होते हैं ॥ १-५ ॥

विमर्शः—योनिकण्डू से बन्ध्या पर्यन्त रोगों का समावेश प्राचीनों ने योनिव्यापदों में कर लिया है। कारण एवं लक्षणों में किञ्चित् अन्तर होने से तन्त्रान्तरों से भी इन रोगों का संग्रह यहाँ किया गया है, सभी का संक्षिप्त किन्तु बन्ध्या का विस्तृत विवेचन उत्तरार्ध पृष्ठ ३५३ से ३६१ तक में देखें।

अथ सोमरोगनिदानम्

अतिप्रसङ्गात्प्रमदाजनानामविश्रमादप्यतिसारयोगतः ।
गरप्रयोगादतिशोकतो वा क्षुभ्येत्स्रवेत्कृत्स्नतनुस्थवारि ॥ १ ॥
स्थानच्युतं तत्प्रतियाति मूत्रमार्गं स्त्रियास्तेन हि गन्धहीनम् ।
शीतं सितं रुग्रहितं प्रसन्नं मलेन रिक्तं बहुशः स्रवेत्तत् ॥ २ ॥
ततो न शक्नोति तदीयवेगं सुदुर्बला धारयितुं स्वयं सा ।
क्वचिन्न प्राप्नोति सुखं तथाऽलं मुखं विशुष्यत्यपि तालु तस्याः ॥ ३ ॥
त्वाचं रौक्ष्यं चातिमात्रं प्रलापः शैथिल्यं स्यान्मस्तकस्याथ मूर्च्छा ।
जृम्भा नूनं भक्ष्यभोज्यान्नपेयैस्तृप्तिं प्रायो न क्वचिद्विन्दतीह ॥ ४ ॥

अत्यन्त संभोग करने से, विश्राम न करने से, अतिसार होने से, कृत्रिम विष-सेवन से और अत्यन्त शोक करने से सम्पूर्ण शरीर का जल क्षुभित होकर अपने स्थान से च्युत होकर मूत्रमार्ग

में जाता है और गन्धहीन, शीतल, श्वेत, पीड़ा से रहित, स्वच्छ, बहुत अधिक मात्रा में स्रवित होने लगता है। उसके बाद अत्यन्त दुर्बल होने से वह स्राव के वेग को सम्भालने में असमर्थ हो जाती है। उसका मुख और तालु अधिक सूखने लगता है और त्वचा में रूक्षता, प्रलाप, मस्तक की शिथिलता, मूर्च्छा, जम्भाई तथा अन्न-पानादि से कभी भी तृप्ति न होना ये सब लक्षण सोम रोग में होते हैं॥ १-४॥

विमर्शः—इसका वर्णन विस्तृत रूप से पूर्वोक्त मूत्रातिसार रोग में देखें।

अथ जरारोगनिदानम्

पद्भ्यामतीव गमनेन तथाऽतिशीत-संसेवनेन च कदन्ननिषेवणाच्च।
वृद्धाङ्गनासततसंगमनाच्च चेतो दुःखादुदेति हि जरा समयाच्च नूनम्॥ १॥

अधिक पैदल चलना, अत्यन्त शीत सेवन, कदन्न भोजन, वृद्धा स्त्री के साथ निरन्तर मैथुन, मानसिक दुःख तथा अधिक अवस्था इन सब कारणों से जरा होती है॥ १॥

जरायाः पूर्वरूपम्—

क्षीणत्वमत्र समुदेति शरीरशक्तेरादौ क्रमेण तदनु स्मृतिनाश एव।
ग्लानिस्ततोऽप्यवयवेषु जनिर्वलीनां पालित्यमत्यधिकतो हि शिरोरुहेषु॥ २॥
दन्तस्य चापि शिथिलत्वमथ स्वभावे भूयान् विपर्यय इति प्रतिमानवं वै।
प्रायो जराऽऽगमनकालत एव पूर्वमव्यक्तमीक्ष्यत उपर्युदितं तु लक्ष्म॥ ३॥

शक्ति की क्षीणता, स्मृति का नाश, ग्लानि, अङ्गों में वली का प्रादुर्भाव, बालों का सफेद होना, दाँतों की शिथिलता और स्वभाव में अत्यधिक परिवर्तन ये सब लक्षण प्रत्येक मनुष्यों में जरा आने के पूर्व अव्यक्त रूप से प्रकट होते हैं॥ २-३॥

जरायाः स्वरूपम्—

प्राग्रूपसंकथितलक्ष्मचयप्रकाशो वह्नेश्च मान्द्यमथ साहसहीनताऽद्धा।
धैर्यप्रणाश उरुरप्यति संशयः स्यात् संपादने युवजनोचितकृत्यराशेः॥ ४॥
चिन्ता घृणाबहुलता कृशताऽतिरोषो वृद्ध्या कफस्य हि गले नितरां च सक्तिः।
निष्ठीवनेन सह तस्य च निर्गमो वा हस्ताङ्घ्रिमध्यगतवेपथुरप्यजस्रम्॥ ५॥
कम्पोऽधिजिह्वमपि च स्खलनं तु मूर्ध्नः पादद्वयस्य च धनुर्वदथाग्रतः स्यात्।
देहस्य चातिनमनं ह्यधिबुद्धि बाल्यं जायेत चातिखरता प्रकृतौ विशेषात्॥ ६॥
वातामयादिकगदा विविधा भवेयुः स्वल्पाऽपि शक्तिरवशिष्यत एव सोढुम्।
क्लेशं च कंचन कथंचन नैव देहे कासस्तथा श्वसनमप्यतिविस्मृतिश्च॥ ७॥
दण्डाश्रयेण गमनं रदहीनताऽऽस्ये चिह्नान्यमूनि गदितानि जरोत्थितानि।
वैद्योत्तमैर्बहु विविच्य च तानि तानि ज्ञेयानि संप्रति जराऽऽकृतिमीप्सुभिर्वै॥ ८॥
सत्पथ्यसेवनवशादपि यूनि रोगा ये यान्ति चाशु सुखसाध्यदशामवश्यम्।
ते याप्यतां दधति चात्र हि सच्चिकित्सानिःशेषपादसमुपस्थितिकाल एव॥ ९॥

जरा के पूर्वरूप में जो लक्षण कहे हैं उन्हीं सबों का पूर्ण रूप से प्रकट होना तथा अग्नि की मन्दता, साहस की हीनता, धैर्य का नाश, युवकजनों के योग्य कृत्यों के करने में अत्यन्त संशय, चिन्ता, घृणा की अधिकता, कृशता, अत्यन्त क्रोध, कफ की वृद्धि, गले में कफ का अटका रहना और खखारने पर थूक के साथ निकलना, हाथ-पैर में निरन्तर कम्प, जिह्वा में कम्पन, शिर और पैर का लड़खड़ाना, धनुष के समान शरीर को झुक जाना, लड़कों की सी बुद्धि हो जाना, स्वभाव में कठोरता, वातरोग आदि विविध रोगों का होना, किसी प्रकार के कुछ भी क्लेश सहन करने की शरीर में शक्ति का न रहना, कास, श्वास तथा अत्यन्त विस्मृति, दण्ड के सहारे

चलना और मुख में दाँतों का न रहना इत्यादि लक्षण होते हैं। युवावस्था में जो रोग अच्छे पथ्यों के सेवन से सुखसाध्य होते हैं वे ही रोग जरावस्था में चिकित्सा की उत्तमता होने पर भी याप्यावस्था को धारण करते हैं ॥ ४-९ ॥

अत्र साध्यतावर्णनम्—

सुसाध्ये तथा कृच्छ्रसाध्ये जराऽऽख्ये गदे तन्निवृत्त्यै तदुत्पादकानाम्।
शुभं वर्जनं वै निदानव्रजानां प्रयोगोऽपि रासायनः शोभनः स्यात् ॥ १० ॥

सुसाध्य तथा कृच्छ्रसाध्य जरारोग में निवृत्ति के लिये उसके उत्पादक कारणों का भलीभाँति त्याग करना तथा रासायनिक ओषधियों का प्रयोग करना हितकर होता है ॥ १० ॥

विमर्श—यद्यपि अवस्था कृत 'जरा' स्वाभाविक है किन्तु पूर्वोक्त कारणों से कुछ लोगों में यह अकाल में ही उत्पन्न हो जाती है एवं नियमित आहार करने वाले या रसायनसेवी व्यक्तियों में यह अधिक अवस्था होने पर भी जल्दी पास नहीं फटकने पाती है अतः इसे भी रोग रूप में वर्णित किया गया है।

अथ शैशवसंन्यासनिदानम्—

संदूषितस्य जननीपयसोऽतिपानाद् वातातपातिरहिते सततं च शीते।
दुर्वातदूषिततमे गहनान्धकारे गेहे शिशोरतिनिवासत एक लोके ॥ १ ॥
दन्तोद्गमामय इह क्रिमिबद्धकोष्ठव्याध्योश्च कुक्कुरपदाभिधकासरोगे।
किंवाऽन्यकष्टदगदे विपुलाभिघाते मिथ्याऽशनाचरणतो बहुदोषजातैः ॥ २ ॥
संन्यासलक्षणयुतः क्वचनार्भकश्चेत् संन्यासरोग उदितो ननु शैशवादिः।
प्रायेण बालकजनस्य निपीडकस्तु ज्ञेयो भवेद् गदनिमित्तविदा विशेषात् ॥ ३ ॥

माँ के अत्यन्त दूषित दूध पीने से तथा निरन्तर वायु तथा धूप से रहित शीत स्थान में और दूषित वायु एवं घने अन्धकार से युक्त गृह में बालक के अधिक निवास करने से और दन्त रोग, क्रिमि रोग, बद्धकोष्ठता, कुक्कुरखाँसी, अभिघात (चोट), मिथ्या आहार-विहारादि कारणों से यदि कभी कोई बालक संन्यास पीड़ित होता है तो उसे 'शैशवसंन्यास' कहते हैं ॥ १-३ ॥

शैशवसंन्यासलक्षणम्—

उत्तारमक्षियुगलं सकलेषु गात्रेष्वाक्षेपको भवति चेतनताविघातः।
संलक्ष्यते मृत इवापतितः स बालः संजायतेऽस्य च दृढा खलु दन्तपङ्क्तिः ॥ ४ ॥
अयं शिशूनां गदितो हि शैशवाभिधस्तु संन्यासगदोऽतिबाधकः।
चिकित्सितं तत्र विरेचनं भवेद् विशेषतस्तत्क्षणसत्फलप्रदम् ॥ ५ ॥

शैशव संन्यास में बालक के दोनों नेत्रों की पुतलियाँ चढ़ जाती हैं। सारे शरीर में आक्षेप हो जाता है। चेतनता नष्ट हो जाती है, बालक मुर्दे की भाँति पड़ा रहता है और उसके दाँतों पर दाँत बैठ जाते हैं—उनका उभाड़ना कठिन हो जाता है। यह रोग अत्यन्त कष्टप्रद 'शैशव संन्यास' नामक रोग कहलाता है। इसमें तत्काल फल देने वाली चिकित्सा करनी चाहिए ॥ ४-५ ॥

अथांशुघातनिदानम्[1]

अंशुघातकारणम्—

भूम्नाऽग्र्यसुग्रातपहेतुतः सदा स्यादंशुघातः खलु दुर्बलादिषु।
उष्णप्रदेशेषु तथैव भूमेरार्द्रत्वतः स्थैर्यत एव वायोः ॥ १ ॥
उष्णानि कार्याण्यनिशं प्रकुर्वतस्त्वेतत्प्रभावान्मनुजेषु नूनम्।

---

1. Sun stroke

ग्रीष्मप्रचण्डांशुनिषेविषूपानदातपत्रादिमनाश्रितेषु ॥ २ ॥
निर्वातकारालयमास्थितेषु प्राधान्यतो योद्‌घ्रजनेष्ववश्यम् ।
संजायते प्राणिवपुर्विमर्दी घोरो गदः सद्भिषजां मतेन ॥ ३ ॥

प्रायः दुर्बल व्यक्तियों में तीव्र धूप लगने से अथवा अत्यन्त गर्म या शीत प्रदेश अथवा स्थिर वायु में रहने से यह रोग हुआ करता है तथा उष्ण कार्यों को निरन्तर करनेवाले, ग्रीष्म ऋतु की प्रचण्ड धूप में रहने वाले तथा जूता आदि नहीं पहनने वाले और वायुरहित कारागार (जेल) की कोठरियों में रहने वाले प्राणियों को यह भयङ्कर अंशुघात रोग उत्पन्न होता है ॥ १-३ ॥

अंशुघातस्य संप्राप्तिः—

भवेच्छरीराणुककोषविश्लेषणं विशेषादतितीव्रतापात् ।
ततः समुत्पद्य विषं प्रकुर्याद्रक्तं विषाक्तं मिलितं च तेन ॥ ४ ॥
किंवा प्रचण्डाः किरणाः खरांशोर्नूनं सुषुम्णास्थिततापकेन्द्रम् ।
संकोपयेयुर्यत एव काले स्यादंशुधातस्य गदस्य जन्म ॥ ५ ॥

अत्यन्त तीव्र ताप से शरीर के कोषाणुओं का विश्लेषण हो जाने पर एक प्रकार का विष उत्पन्न होता है जो रक्त से मिल कर उसे विषाक्त कर देता है इसी प्रकार से अंशुघात रोग का जन्म होता है अथवा सूर्य की तीक्ष्ण किरणें सुषुम्णामूलस्थित तापकेन्द्र को अत्यन्त कुपित कर देती हैं जिससे अंशुवात रोग हो जाता है ॥ ४-५ ॥

अंशुघातस्य लक्षणम्—

अस्यांशुघातस्य गदस्य वैद्यैस्तिस्रस्त्ववस्थाः परिकीर्त्तिता वै ।
शीताऽभिधाऽऽद्या च ततो द्वितीया साधारणी चान्तगता हि तीव्रा ॥ ६ ॥
क्लिन्नत्वशीतत्वसमन्विता त्वग् मूर्च्छा श्रमः स्यादथ दुर्बलत्वम् ।
तीव्रत्वमुक्तं ननु नाडिकायास्तत्रादिमायां हि रुजो दशायाम् ॥ ७ ॥
अस्यां दशायां नहि जातु मृत्युः प्रदृश्यते रोगिजनस्य नूनम् ।
चिकित्सया जीवनमेव रोगी हृत्कार्यरोधात्तु लभेत मृत्युम् ॥ ८ ॥
तथा द्वितीयां हि दशां गतस्यांशुघातिनो मूर्ध्नि भवेद्धि शूलम् ।
पीडाऽपि शुष्कत्वमथोष्णता च त्वचो धमन्याश्चपलत्वमुक्तम् ॥ ९ ॥
क्षीणत्वमेवं बहु दुर्बलत्वं हृच्छ्वासयोरप्यतिनिश्चयेन ।
मूर्च्छाऽऽदिचिह्नानि भवेयुरत्र प्रायेण पूर्वोक्तदशासमानि ॥ १० ॥
एवं दशामाप्नुवतोऽन्तिमां च ज्वरस्तु तीव्रः श्वसनं प्रलापः ।
भवेद्गदार्त्तस्य च वर्णनीलता संन्यासरोगो मरणं तथाऽन्ते ॥ ११ ॥

वैद्यों ने शीता, साधारणी और तीव्रा इस भेद से अंशुघात रोग की तीन अवस्थायें बताई हैं। इनमें 'शीता' में त्वचा क्लेदयुक्त तथा शीतल रहती है और मूर्च्छा, थकावट, दुर्बलता एवं नाड़ी की गति में तीव्रता ये सब लक्षण प्रकट होते हैं। इस दशा में चिकित्सा करने से रोगी की जीवन-रक्षा हो जाती है। दूसरी 'साधारणी' दशा को प्राप्त हुए रोगी को सिर में शूल, पीड़ा और त्वचा में शुष्कता तथा उष्णता, नाड़ी की गति में चपलता, क्षीणता एवं दुर्बलता रहती है और हृदय तथा श्वास की भी अत्यन्त दुर्बलता होती है। पहली दशा की भाँति इसमें भी मूर्च्छा आदि लक्षण मिलते हैं। तीसरा 'तीव्रा' को प्राप्त हुये रोगी के तीव्र ज्वर, श्वास, प्रलाप, वर्ण का नीला हो जाना और संन्यास ये सब दारुण लक्षण होते हैं जिससे रोगी प्रायः मर जाता है ॥ ६-११ ॥

असाध्यलक्षणम्—

करद्वयेऽङ्घ्रिद्वितये च नीलिमा तथा धमन्याः क्षणलुप्तता च ।

विक्षेपणं चावयवस्य रोगिणोऽङ्गुघातिनो मृत्युकृते भवन्ति ॥ १२ ॥

दोनों हाथ तथा पैरों का नीलवर्ण हो जाना, नाड़ी की गति क्षण-क्षण भर में लुप्त हो जाना और अङ्गों में विक्षेपण ये सब लक्षण यदि अंगुघात रोगी में प्रकट हों तो असाध्य होता है ॥१२॥

अथोपान्त्रशोथनिदानम्[1]

उपान्त्रशोथस्य परिचयः—

प्रतिमानवं विभिन्ना मानेनान्त्रपुटेऽन्त्रनित्यलग्ना ।
एका नलिका वर्त्तत उपान्त्रपदनामिका विदिता ॥ १ ॥
तस्या मानं क्वचन स्यादङ्गुलिद्वयोन्मिता बहुधाऽपि ।
जातु च नातोऽप्यधिकं मानं क्वचिदष्टाङ्गुलोन्मितं भवति ॥ २ ॥
अतएव स्थितिरस्या भवति हि मनुजानुसारिणी नियतम् ।
जाते चात्र प्रदाहे तीव्रा पीडा प्रजायते नूनम् ॥ ३ ॥

हर एक मनुष्य में विभिन्न मान से अन्त्रपुट (उण्डुक) के पास आन्त्र से संबद्ध एक नलिका होती है जो 'उपान्त्र' नाम से विदित है। उसका प्रमाण प्रायः दो अङ्गुल का और कहीं-कहीं उससे अधिक आठ अंगुल तक होता है। इसलिए इसकी स्थिति मनुष्यों के अनुसार हुआ करती है। इसमें प्रदाह होने पर तीव्र पीड़ा निश्चित रूप से होती है (और इसी को 'उपान्त्रशोथ' कहते हैं।) ॥ १–३ ॥

अस्य प्रदाहे कारणम्—

यदाऽऽहारभागोऽत्र किंवाऽन्यदेवाविशेद्वस्तु काठिन्ययुक्तं कदाचित् ।
तदोपान्त्रमध्ये प्रदाहोऽतिघोरोऽनुभूयेत रोगार्दितेनैव नूनम् ॥ ४ ॥

जब आहार का भाग या कोई कठिन वस्तु दैवात् उपान्त्र के अन्दर चली जाती है तब अत्यन्त घोर प्रदाह का अनुभव रोगी करने लगता है ॥ ४ ॥

अस्य संप्राप्तिः—

उपान्त्रस्य भित्तौ यदा श्लेष्मणो वा कलायां प्रकुर्युर्हि कीटाः प्रशोथम् ।
ततो मन्दभावेन वृद्धः स शोथो व्रणस्य स्वरूपं तु नूनं सुदध्यात् ॥ ५ ॥

उपान्त्र की भित्ति अथवा श्लैष्मिक कला में जब कीटाणु शोथ उत्पन्न कर देते हैं तब वह शोथ धीरे-धीरे बढ़ता हुआ व्रणशोथ का स्वरूप धारण कर लेता है ॥ १५ ॥

उपान्त्रशोथस्य स्वरूपम्—

इह श्रोणिदेशे रुजा दक्षिणे स्याद् भृशं जातु देशे कपर्दाभिधे वा ।
समुत्पद्य पूर्वं ततश्चोदरं वै परिव्याप्य सा प्रायशश्चाभ्युदेति ॥ ६ ॥
स्थिरा श्रोणिमध्ये पुनः पूर्णरीत्या ततश्छर्दनाधिक्यमाटोप उग्रः ।
भवेन्मांसपेशीस्थितः स्पर्शनोत्था रुगुग्राऽप्युपान्त्रस्य मूलं तदानीम् ॥ ७ ॥
सदा दक्षिणं सक्थि संकोच्य रोगी स्वपित्यत्र यत्नादभीप्सुः प्रशान्तिम् ॥ ८ ॥
भवेद् द्व्युत्तरं तापमानं ज्वरस्यानिशं ह्येकसंख्यं शतं रोगिदेहे ।
विबन्धस्य संबन्ध एवात्र भूम्ना प्रदृश्येत वा जातुचिच्चातिसारः ॥ ९ ॥

इस रोग में दक्षिण श्रोणि देश में अत्यन्त पीडा होती है अथवा कौडी प्रदेश में पहले पीडा उत्पन्न होकर पश्चात् सारे उदर में व्याप्त हो जाती है। फिर दक्षिण श्रोणि में पूर्ण रीति से स्थिर

---

१. Appendicitis.

होकर पीडा बनी रहती है। वमन और आटोप एवं मांसपेशियों में स्पर्श करने से उग्र पीडा होती है। रोगी को सदा दक्षिण पैर सिकोड़ कर सोने में शान्ति मिलती है। रोगी के शरीर में १०२ डिग्री ज्वर निरन्तर बना रहता है। इस रोग में अधिकतर विबन्ध बना रहता है। कभी-कभी अतिसार भी होता है ॥ ६-९ ॥

अस्य साध्यत्वादिकम्—

दशायां तु साध्यस्य रोगोऽयमुक्तो मृदुश्च क्रमेण द्व्यहाद्वा त्र्यहाद् वै।
लभेतापि च न्यूनभावं च तेनामयी मानवः सौख्यमाप्नोति नूनम् ॥ १० ॥
यदा चाक्रमेदेष रोगस्तु शश्वन्नरन्त्वस्य कृच्छ्रत्वमूह्यं तदा तु।
प्रशस्तैः प्रयोगैश्चिकित्साऽतियत्नाद्विधेयेति सर्वैः सुवैद्यैरिहोक्ता ॥ ११ ॥
यदा चात्र योगो भवेद्विद्रधेर्वा प्रजायेत विस्फोट एवैतदीयः।
तथा चोदराच्छादिकायां कलायां भवेच्छोथसंदर्शनं दैवदोषात् ॥ १२ ॥
विना शल्यसंबन्धिनीं सच्चिकित्सामसाध्यत्वमस्येति बोध्यं तदा तु।
प्रजातेऽत्र योगे ध्रुवं विद्रधेर्वै ज्वरादीनि रूपाणि वृद्धान्यपि स्युः ॥ १३ ॥
तथा चोदराच्छादिकायां कलायां प्रजाते च शोथे भवेत् तापमानम्।
अपि स्वस्थतुल्यं ज्वरस्याथ शीताङ्गताच्छर्दनादीनि चिह्नान्यपि स्युः ॥ १४ ॥

साध्यदशा में यह रोग मृदु रूप में रहता है और क्रम से २ या ३ दिन के बाद कम हो जाता है जिससे रोगी सुख प्राप्त करता है। जब यह रोग मनुष्य को वारंवार आक्रान्त करे तब इसे कृच्छ्रसाध्य समझ कर सद्वैद्यों से अच्छी चिकित्सा करानी चाहिए। जब इस रोग में विद्रधि उत्पन्न हो जाती है अथवा उत्पन्न होकर फूट जाती है तब उदराच्छादिका कला में शोथ हो जाता है और बिना अच्छी शल्य चिकित्सा के यह असाध्य समझा जाता है। इस रोग में विद्रधि का संबन्ध होने पर ज्वरादिक की वृद्धि हो जाती है किन्तु उदर-कला में शोथ होने पर ज्वर का तापमान स्वस्थ के तुल्य या उससे भी कम हो जाता है और शीताङ्गता तथा वमन आदि चिह्न भी प्रकट होते हैं ॥ १०-१४ ॥

विमर्श—अन्तर्विद्रधि (उत्त० पृ० ८५) भी देखें।

अथ स्नायुकनिदानम्

अत्यन्तवृष्ट्यादिनिमित्ततो यदा सेवेत दुष्टं बहुशो जलं ना।
शाखासु दोषः कुपितो विसर्पवच्छोथं तदा तस्य विधाय भिन्द्यात् ॥ १ ॥
सोष्म स्नायुं तत्क्षते तत्र नूनं संशोष्याथो श्वेततन्तूपमं तु।
वृत्तं जीवं संविदध्याद् बहिश्च स्वैरं स्वैरं निःसरेत् स क्षताच्च ॥ २ ॥
कुप्येच्छेदान्निःसृते तत्र शान्तिः शश्वत् स्थानेऽन्यत्र तस्योद्भवोऽपि।
एवंरूपः स्नायुको नाम रोगः ख्यातो वीसर्पोदिता च क्रियाऽत्र ॥ ३ ॥
त्रुट्येत बाह्वोर्यदि जङ्घयोर्वा प्रमादतो यस्य नरस्य जातु।
तदा तु संकोचमसौ करोति खञ्जत्वमद्धा क्रमतोऽपि तस्य ॥ ४ ॥

अत्यन्त वृष्टि आदि कारणों से दूषित जल का अधिक सेवन करने पर उससे कुपित हुआ दोष (अथवा उसके द्वारा कोष्ठ में पहुँचा हुआ क्रिमि) विसर्प की भाँति हाथ-पैरों में शोथ पैदा करके उसका भेदन कर देता है और उससे उत्पन्न हुए क्षत में वहाँ की ऊष्मायुक्त स्नायु को सुखा कर श्वेत तन्तु के समान गोल जीव को उत्पन्न कर धीरे-धीरे त्वचा से बाहर निकलता है। यदि वह बीच से कदाचित् टूट जाता है तो रोग का प्रकोप बढ़ जाता है और यदि सम्पूर्ण निकल जाता है तो रोग की शान्ति हो जाती है। परन्तु पुनः दूसरे स्थान पर उक्त रीति से निकलना प्रारम्भ हो

जाता है। इसकी चिकित्सा विसर्प रोग की भाँति करनी चाहिए। जिस मनुष्य को कभी प्रमादवश बाहु तथा जङ्घा में वह स्नायुक टूट जाता है तो उस अङ्ग को संकुचित कर शनैः-शनैः खञ्जता को भी उत्पन्न कर देता है॥ १-४॥

वातादिभेदेन तस्य लक्षणमाह—

श्वासो रूक्षो वायुना चातिपीडायुक्तो नूनं तन्तुकः स प्रदिष्टः।
पित्तेनाथो नीलिमोपेतपीतोऽवश्यं दाहेनान्वितो दृश्यतेऽपि॥ ५॥
स्थूलः श्वेतः श्लेष्मणा स्याद्गरीयान् रोगो नाम्ना स्नायुको दुष्टरोगः॥ ६॥
स स्याद्दोषाणां त्रयेण त्रिलिङ्गश्चेत्थं रोगः स्नायुसंज्ञोऽष्टधा तु।
वैद्यैः प्रोक्तः प्राणहारी विशेषान्नानोपद्रुत्यन्वितोऽयं प्रमादात्॥ ७॥

वात दोष से वह तन्तुक कपिश वर्ण का रूक्ष तथा अत्यन्त पीड़ा युक्त होता है, पित्त से नीलिमा युक्त पीतवर्ण का तथा दाहयुक्त होता है, कफ से स्थूल, श्वेतवर्ण का तथा अत्यन्त गुरु होता है और रक्त से अत्यन्त दाहयुक्त, रक्त वर्ण का होता है तथा दो दोषों से दो दोषों के लक्षणों से युक्त और तीनों दोषों से तीनों दोषों के लक्षणों से युक्त होता है। इस भाँति १ वात, २ पित्त, ३ कफ, ४ वात-पित्त, ५ वात-कफ, ६ पित्त-कफ, ७ रक्त और ८ वात-पित्त-कफ से ८ प्रकार का स्नायुक रोग होता है। प्रमादवश टूट जाने से नाना प्रकार के उपद्रवों से युक्त विशेषतः प्राणनाशक होता है॥ ५-७॥

विमर्श—यह एक क्रिमिज रोग है। अंग्रेजी में इसे 'ड्रेकन्टिएसिस' या 'गिनी वर्म रोग' (Dracontiasis or guine worm disease) कहते हैं। दूषित जल के द्वारा मनुष्य में इसका संक्रमण होता है। यह क्रिमि आमाशय में पहुँचता है। सगर्भा होनेपर स्त्री क्रिमि आन्त्र का भेदन कर त्वचा के नीचे पहुँचती है। यहाँ इसकी वृद्धि होती रहती है और यह क्रमशः नीचे की ओर गमन करती हुई गुल्फ-सन्धि या पांव में पहुँचती है। वहाँ एक विस्फोट उत्पन्न होता है जो जल के सम्पर्क से फूट जाता है। इससे उत्पन्न क्षत द्वारा स्त्री-क्रिमि अपने मुख द्वारा (प्रायः उसके सम्पूर्ण शरीर में व्याप्त) गर्भाशय को उलट कर उसमें से अण्डों को बाहर जल में फेकती है। इस व्रण द्वारा सूत्र रूप में निकला हुआ क्रिमि का मुख पकड़ कर सावधानी से खींचा जा सकता है। इस स्त्री-क्रिमि की लम्बाई १५ से २० इञ्च तक और चौड़ाई लगभग $\frac{1}{20}$ इञ्च होती है। इस विस्फोट की उत्पत्ति के साथ ही उदर्द, ज्वर, वमन आदि अनेक उपद्रव होते हैं। यह विस्फोट कभी-कभी हाथ, पीठ या नितम्ब पर भी होते हैं। लोक में इसे 'नहरुआ' कहते हैं।

अथ पारदविकारनिदानम्[1]

यदा दोषहीनो भवेत् पारदो वै तदा सोऽत्र मृत्युज्वरघ्नः स्मृतः स्यात्।
अतोऽसौ विशुद्धः सुधासंनिभोऽथ विषाभो विशेषादशुद्धः प्रदिष्टः॥ १॥
अयुक्तिप्रयुक्तो रसो रोगमूलं सुयुक्तिप्रयुक्तो जराव्याधिशूलम्।
यतः संप्रदिष्टो विशिष्टैर्भिषग्भिस्ततः सेवनीयो यथाविध्यभिज्ञैः॥ २॥
विधिवदेष रसो ननु सेवितो हरति नुर्नियतं सकलामयान्।
अविधिना स हि भक्षित एव वै भुवि करोति गदान् विविधानिमान्॥ ३॥
नासाभङ्गः पीनसो दन्तपातो नेत्रास्योत्थो रोगजातो विसर्पः।
कोठः कण्डूर्मस्तके चातिपीडा त्वग्वैवर्ण्यं नासिकाऽऽदौ क्षतञ्च॥ ४॥
पीडायुक्तग्रन्थिवच्छोथकाठिन्यं जायेताप्यण्डकोशद्वये च।
पक्षाघातो ग्रन्थिवातोऽस्थिदाहोऽस्युग्रो जाड्यं चापि चेतोविकारः॥ ५॥

---

1. Mercury poisoning.

भगन्दरो नैकविधानि कुष्ठोपदंशचिह्नानि शरीरमध्ये ।
तथाऽपरे कृच्छ्रतमा गदाः स्युर्यथोचितं भेषजमत्र कल्प्यम् ॥ ६ ॥

पारा शोधनादि द्वारा विशुद्ध होने पर अमृत के समान गुणकारी तथा अशुद्ध होने पर विषतुल्य कहा गया है । यदि इसका विधिपूर्वक प्रयोग न किया जाय तो रोगों को उत्पन्न करने का प्रधान कारण बन जाता है और यही यदि सविधि प्रयोग में लाया जाय तो जरा एवं नाना प्रकार की व्याधि को दूर करने वाला होता है । अतएव इसका विधिपूर्वक ही प्रयोग करना चाहिये । अविधिपूर्वक सेवन करने से नासाभङ्ग, पीनस, दाँतों का गिरना, नेत्र तथा मुख के रोगों का उत्पन्न होना, विसर्प, कोठ रोग (चकत्ते होना), खुजली, मस्तक में अत्यन्त पीडा, त्वचा की विवर्णता, नासिका आदि में क्षत, दोनों अण्डकोषों के ऊपर पीडायुक्त गाँठ की भाँति शोथ, पक्षाघात, ग्रन्थिवात (गँठिया), अत्यन्त उग्र अस्थियों में दाह, जड़ता, मानसिक विकार, भगन्दर अनेक प्रकार के कुष्ठ, उपदंश तथा अन्यान्य भी अत्यन्त कृच्छ्रसाध्य रोगों की उत्पत्ति होती है । इनके होने पर यथोचित औषधों का प्रयोग करना चाहिये ॥ १-६ ॥

विमर्श—आयुर्वेद में रसौषधियों के प्रयोग का बहुशः विधान है । इन रसौषधियों में अधिकांश पारदयुक्त होती हैं, प्रमादवश इनमें कदाचित् अशोधित पारद का योग हो जाने पर अनेक विकारों की उत्पत्ति हो सकती है । अतः संक्षेप में पारदविकारों का उल्लेख कर दिया गया है । विशिष्ट विवेचन के लिए अर्वाचीन 'विषतन्त्र' का अवलोकन करें ।

अथ शीतलानिदानम्

शीतला-परिचयः—

देव्या शीतलयाऽऽक्रान्ता मसूर्यः शीतला बहिः । ज्वरयेयुर्यथा भूताधिष्ठितो विषमज्वरः ॥
ताश्च सप्तविधाः ख्यातास्तासां भेदान् प्रचक्ष्महे ॥ १ ॥

देवी शीतला से आक्रान्त मसूरिकायें शीतला कहलाती हैं । ये शरीर के बाह्य भाग में होती हैं । इसमें भूताभिषङ्गज विषम ज्वर की भाँति ज्वर होता है । ये ७ प्रकार की होती हैं ॥ १ ॥

बृहतीशीतलालक्षणम्—

ज्वरपूर्वा बृहत्स्फोटैः शीतला बृहती भवेत् ॥ २ ॥
सप्ताहान्निःसरत्येव सप्ताहात् पूर्णतां व्रजेत् । ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम् ॥ ३ ॥

१. इनमें प्रथम बृहती शीतला ज्वरपूर्वक बड़े २ स्फोटों से युक्त सात दिन में निकलती हैं और दूसरे सप्ताह में पूर्ण होकर तीसरे सप्ताह में सूख जाती हैं और स्वयं झड़ जाती है ॥ २-३ ॥

कोद्रवशीतलालक्षणम्—

वातश्लेष्मसमुद्भूता कोद्रवा कोद्रवाकृतिः । तां कश्चित् प्राह पक्वेति सा तु पाकं न गच्छति ॥
जलशूकवदङ्गानि सा विध्यति विशेषतः । सप्ताहाद्वा दशाहाद्वा शान्तिं याति विनौषधम् ॥

२. वात-कफ से उत्पन्न कोद्रव के आकार की जो शीतला होती है उसे 'कोद्रवशीतला' कहते हैं । यह पकी हुई सी दिखती है किन्तु वह पाकावस्था को नहीं प्राप्त होती है । यह अङ्गों को जलशूक से वेधनवत् पीडित करती है । सात अथवा दस दिन पर विना ओषधि के ही यह शान्त हो जाती है ॥ ४-५ ॥

पाणिसहालक्षणम्—

ऊष्मणा तूष्मजारूपा सकण्डूः स्पर्शनप्रिया ।
नाम्ना पाणिसहा ख्याता सप्ताहाच्छुष्यति स्वयम् ॥ ६ ॥

३. ऊष्मा से उत्पन्न अन्हौरी के समान खुजलाहट पूर्ण और जिसे स्पर्श करना रोगी को प्रिय मालूम पड़ता है वह 'पाणिसहा शीतला' कहलाती हैं । यह १ सप्ताह के बाद स्वयं सूख जाती है ॥

सर्षपिकाशीतलालक्षणम्—

चतुर्थी सर्षपाकारा पीतसर्षपवर्णिनी । नाम्ना सर्षपिका ज्ञेयाऽभ्यङ्गमत्र विवर्जयेत् ॥ ७ ॥

४. जो शीतला पीले सर्सों के समान पीले वर्ण की होती है उसे 'सर्षपिका शीतला' कहते हैं, इसमें तैल का अभ्यङ्ग (मालिश) करना वर्जित होता है ॥ ७ ॥

राजिकाकृतिमसूरिकालक्षणम्—

किञ्चिदूष्मनिमित्तेन जायते राजिकाऽऽकृतिः। एषा भवति बालानां सुखं शुष्यति च स्वयम्॥

५. किंचित् ऊष्मा के निमित्त से उत्पन्न राई की भाँति आकार वाली शीतला को 'राजिकाकृति शीतला' कहते हैं। यह बालकों को होती है और स्वयं सुखपूर्वक सूख भी जाती है ॥ ८ ॥

षष्ठी-मसूरिका लक्षणम्—

कोठवज्जायते षष्ठी लोहितोन्नतमण्डला। ज्वरपूर्वा व्यथायुक्ता ज्वरस्तिष्ठेद्दिनत्रयम्।
स्फोटानां मेलनादेषा बहुस्फोटापि दृश्यते ॥ ९ ॥

६. जो मसूरिका कोठ (चकत्ते) की भाँति उत्पन्न होती है और देखने में लाल वर्ण की एवं ऊपर की ओर विस्तारयुक्त मण्डल वाली होती है, जिसमें ३ दिन तक ज्वरपूर्वक व्यथा बनी रहती है वह 'षष्ठी मसूरिका' कहलाती है। बहुत से विस्फोटों के परस्पर मिल जाने से यह बहुत बड़े स्फोटों वाली भी होती है ॥ ९ ॥

सप्तमी-मसूरिका-लक्षणम्—

एकस्फोटा च कृष्णा च बोद्धव्या चर्मजाऽभिधा ॥ १० ॥

७. जो एक (अलग २ विकीर्ण) स्फोटों वाली कृष्ण वर्ण की होती है वह 'चर्मजा' नाम शीतला कहलाती है ॥ १० ॥

विमर्श—प्राचीन आचार्यों ने इनका वर्णन मसूरिका नाम से किया है। इनका प्राचीन और अर्वाचीन रीति से विस्तृत वर्णन उत्तरार्ध (पृ० १८२ से १९२ तक) में देखें।

अथाशीतिर्वातजरोगनामानि

ये चाशीतिर्वातजाता मुनीन्द्रैः ख्याता रोगास्तान् समस्तान् ब्रवीमि।
बाह्यायामश्चान्तरायाम ऊरुस्तम्भो जिह्वास्तम्भ उद्गार एव ॥ १ ॥
खल्ली पक्षाघात आक्षेपकोऽथो मन्यास्तम्भः पङ्गुता क्रोष्टुशीर्षः।
प्रत्यष्ठीलाऽष्ठीलिका वामनत्वं कम्पः कार्श्यं श्यावता च प्रलापः ॥ २ ॥
निद्रानाशः स्वेदनाशोऽपि रेतोनाशो रेतोऽतिप्रवृत्तिश्च तोदः।
कार्श्यं शुक्रस्यापि काठिन्यमाध्मानं भीरुत्वं दुर्बलत्वं च कण्डूः ॥ ३ ॥
प्रत्याध्मानं शीतता रोमहर्षः स्तम्भो विश्वाची हनुस्तम्भ एव।
सङ्कोचोऽथो गृध्रसी पादहर्षो मूकत्वं चातीव जृम्भा तथा च ॥ ४ ॥
शिरोग्रहश्चापि कटीग्रहोऽर्दितस्तथाऽपतानोऽथ कलायखञ्जता।
बलक्षयश्चाप्यनवस्थितात्मता रसाज्ञता मिन्मिनताऽथ कुब्जता ॥ ५ ॥
शब्दाज्ञता चाप्यपतन्त्रको व्रणायामः प्रसुप्तिर्विरसास्यता च।
दृशोः क्षयो विड्ग्रह एव कल्लताऽपबाहुकश्चापि कषायवक्त्रता ॥ ॥ ६ ॥
गन्धाज्ञत्वं क्षिप्रमूत्रत्वमङ्गशूलं तूनी चाङ्गपीडाऽङ्गभङ्गः।
पार्श्वे शूलं वातकण्ठोऽङ्गभेदः शोषश्चाङ्गस्यापि विभ्रंश एव ॥ ७ ॥

दण्डापतानको वातप्रवृत्तिश्चान्त्रकूजनम्। सिराणां पूरणं तद्वत् स्फुरणं बद्धविट्कता ॥८॥
खञ्जता रूक्षता चैव प्रतितूनी पुरातनैः। भिषग्भिर्गदिता एते ज्ञेया रोगास्तु कोविदैः ॥९॥

प्राचीन मुनीन्द्रों ने निम्न प्रकार से ८० वातज रोगों को कहा है—१ बाह्यायाम, २ अन्तरायाम, ३ ऊरुस्तम्भ, ४ जिह्वास्तम्भ, ५ उद्गार, ६ खल्ली, ७ पक्षाघात, ८ आक्षेपक, ९ मन्यास्तम्भ, १० पङ्गुता, ११ क्रोष्टुशीर्ष, १२ प्रत्यष्ठीला, १३ अष्ठीलिका, १४ वामनता, १५ कम्प, १६ कार्श्य, (कृशता), १७ श्यावता, १८ प्रलाप, १९ निद्रानाश, २० स्वेदनाश, २१ रेतोनाश (शुक्रनाश)

२२ रेतोऽतिप्रवृत्ति (शुक्रातिप्रवृत्ति), २३ तोद, २४ शुक्रकार्श्य, २५ काठिन्य, २६ आध्मान, २७ भीरुत्व, २८ दुर्बलत्व, २९ कण्डू, ३० प्रत्याध्मान, ३१ शीतता, ३२ रोमहर्ष, ३३ स्तम्भ, ३४ विश्वाची, ३५ हनुस्तम्भ, ३६ संकोच, ३७ गृध्रसी, ३८ पादहर्ष, ३९ मूकता, ४० अतिजृम्भा, ४१ शिरोग्रह, ४२ कटिग्रह, ४३ अर्दित, ४४ अपतानक, ४५ कलायखञ्जता, ४६ वलक्षय, ४७ अनवस्थितात्मता (अनवस्थितचित्तता), ४८ रसाज्ञता, ४९ मिन्मिनता, ५० कुब्जता, ५१ शब्दाज्ञता, ५२ अपतन्त्रक, ५३ व्रणायाम, ५४ प्रसुप्ति, ५५ विरसास्यता, ५६ दृक्क्षय, ५७ विड्ग्रह, ५८ कल्लता, ५९ अपबाहुक, ६० कषायवक्त्रता, ६१ गन्धाज्ञत्व, ६२ क्षिप्रमूत्रत्व, ६३ अङ्गशूल, ६४ तूनी, ६५ अङ्गपीड़ा, ६६ अङ्गभंग, ६७ पार्श्वशूल, ६८ वातकण्टक, ६९ अङ्गभेद, ७० शोष, ७१ अङ्गविभ्रंश, ७२ दण्डापतानक, ७३ वातप्रवृत्ति, ७४ अन्त्रकूजन, ७५ सिरापूरण, ७६ स्फुरण; ७७ बद्धविट्कता, ७८ खञ्जता, ७९ रूक्षता और ८० प्रतितूनी ॥ १–९ ॥

अथ चत्वारिंशत्पित्तरोगनामानि

चत्वारिंशत्संख्यकाः पित्तजाताः ख्याता रोगा ये मुनीन्द्रैः पुराणैः ।
संकथ्यन्ते चाधुना सावधानं श्रोतव्यास्तेऽवश्यमेवाप्यभिज्ञैः ॥ १ ॥
उष्णाङ्गत्वं कण्ठशोषो विदाहो धूमोद्गारः कान्तिहानिः क्लमश्च ।
तिक्तास्यत्वं चाल्पशुक्रत्वमम्लवक्त्रत्वं चाप्यास्यशोषोऽङ्गपाकः ॥ २ ॥
स्वेदस्रावो लोहगन्धास्यता चातृप्तिश्चाथो पीतविट्कत्वमेव ।
रक्तद्रावोऽथारतिः पीतमूत्रत्वं दौर्गन्ध्यं पीतगात्रत्वमद्धा ॥ ३ ॥
उष्णोच्छ्वासत्वं च कोपोऽथ गात्रसादः शीतेच्छाऽल्पनिद्रत्वमेव ।
तेजोद्वेषो भिन्नविट्कत्वमान्ध्यं मूत्रस्योष्णत्वं मलस्योष्णता च ॥ ४ ॥
मतिभ्रमोऽङ्गदरणं तथा पीतावलोकनम् । तमसो दर्शनं पीतनखता पीतदन्तता ॥ ५ ॥
निःसरत्वं तथा पीतमण्डलानां च दर्शनम् । अथो हरितवर्णत्वं पीतनेत्रत्वमित्यलम् ॥ ६ ॥

मुनियों ने निम्न प्रकार से पित्तरोग के ४० भेद कहे हैं :—१ उष्णाङ्गत्व, २ कण्ठशोष, ३ विदाह, ४ धूमोद्गार, ५ कान्तिहानि, ६ क्लम, ७ तिक्तास्यता, ८ अल्पशुक्रता, ९ अम्लवक्त्रता, १० आस्यशोष, ११ अङ्गपाक, १२ स्वेदस्राव, १३ लोहगन्धास्यता, १४ तृप्ति, १५ पीतविट्कत्व, १६ रक्तद्राव, १७ अरति, १८ पीतमूत्रत्व, १९ दौर्गन्ध्य, २० पीतगात्रत्व, २१ उष्णोच्छ्वासत्व, २२ कोप, २३ गात्रसाद, २४ शीतेच्छा, २५ अल्पनिद्रत्व, २६ तेजोद्वेष, २७ भिन्नविट्कत्व, २८ आन्ध्य, २९ मूत्रोष्णत्व, ३० मलोष्णता, ३१ मतिभ्रम, ३२ अङ्गदरण, ३३ पीतावलोकन, ३४ तमोदर्शन, ३५ पीतनखता, ३६ पीतदन्तता, ३७ निःसरत्व, ३८ पीतमण्डलदर्शन, ३९ हरितवर्णता और ४० पीतनेत्रता ॥ १–६ ॥

अथ विंशतिश्लेष्मरोगनामानि

ये विंशतिः श्लेष्मसमुद्भवा गदा उदीरिता रोगनिदानसंविदा ।
त एव संप्रत्यखिला विशेषतस्त्वाकर्णनीया ननु सावधानतः ॥ १ ॥
मुखमाधुर्यं शैत्यं गौरवमतिनिद्रता तन्द्रा । उष्णेच्छा मुखलेपः प्रसेकता तिक्तकामिता चापि॥
श्वेतावलोकनं चाचैतन्यं मन्दबुद्धिताऽतृप्तिः । श्वेताङ्गवर्णताऽथो बहुमूत्रत्वं मलाधिकता ॥
आलस्यं विण्मूत्रश्वेतत्वं चापि चेतनाविरहः । घर्घरवाक्यत्वं च ज्ञेया एते गदाः कफजाः ॥

रोगनिदान-वेत्ताओं ने निम्न प्रकार से २० प्रकार के कफज रोग कहे हैं :—१ मुखमाधुर्य, २ शैत्य, ३ गौरव, ४ अतिनिद्रता, ५ तन्द्रा, ६ उष्णेच्छा, ७ मुखलेप, ८ प्रसेकता, ९ तिक्तकामिता, १० श्वेतावलोकन, ११ अचैतन्य, १२ मन्दबुद्धिता, १३ अतितृप्ति, १४ श्वेताङ्गवर्णता, १५ बहुमूत्रता, १६ मलाधिकता, १७ आलस्य, १८ विण्मूत्रश्वेतता, १९ चेतनाविरह और २० घर्घरवाक्यता ॥ १–४ ॥

इति भिषग्रत्नब्रह्मशंकरमिश्रशास्त्रिप्रणीतं भाषाटीकोपेतं परिशिष्टं समाप्तम् ।

, एक वर्ग का नाम है
श्रेय भारत की 18वीं सदी
राजनीतिक परिस्थितियों को
गलियारे में विचरने वाले
द या उस पर आघात के लिए
हैं। अपने दबदबे और वैभव
तीकों को अपनाने के लिए

सार्वजनिक रूप से
एक सामान्य मनोरंजन था।
हरों में संभ्रांत भारतीयों का
स सांस्कृतिक अपमान से
लिए अपने को पाश्चात्य
यत्नशील था। व्यंग्य से इस
त किया गया। सांस्कृतिक
द की दीवार के कारण ये
से वंचित रह गये।
की यह पहली घटना नहीं
है और एक नहीं, कई बार
में भारतीयों के एक वर्ग ने
से ही 18वीं शताब्दी में
ने अपने आर्थिक स्वार्थों की
का जामा धारण किया। यह
त्कालीन शासक वर्ग तक

अपनाये जाने के विशेष
य पराभव की स्थिति में था।
होल्कर के घोड़े दौड़ रहे थे।
, न व्यापार। अर्थात
नहीं थी। मरहठाओं के

लिए एक फिरंगी रेजीमेंट भी खड़ी हो गयी जिसकी कमान एक फ्रांसीसी के हाथ में थी। इसने धर्म-परिवर्तन कर लिया था। मुसलमान बनने के बाद इसका नाम फरशिश खां हो गया। उस दौर में कई और फिरंगी सैनिकों ने भी ईसाई धर्म त्याग दिया था।

ऐसे सभी फिरंगी मुगल कुलीन मुसलमानों के लिबास में उन्हीं की तरह सजे-संवरे रहते थे। सभी फारसी और हिंदुस्तानी लिख-पढ़ और बोल सकते थे। जॉर्ज थॉमस ने, जिसे हिंदुस्तानी लोग जेहाज (जॉर्ज का बिगड़ा रूप) साहिब कहकर पुकारते थे, मेवात क्षेत्र में अपनी एक स्वतंत्र छोटी रियासत स्थापित कर ली। उसका इस हद तक मुगलीकरण हुआ कि वह अपनी अंग्रेजी भाषा पूरी तरह से भूल गया। अपनी आत्मकथा लिखने वाले को अपने संस्मरण वह फारसी में ही सुना पाया। उसका बेटा जॉन थॉमस बांके के वेश में दिल्ली के मोहल्लों में जगह-जगह शायरी सुनाता फिरता था।

कुछ अपवादों को छोड़कर इन फिरंगियों ने मुगल संस्कृति की उन्हीं विशेषताओं को अपनाया जिनसे समाज में उनके रुतबे की अभिव्यक्ति हो सके और जो तड़क-भड़क वाली आरामदेह जिंदगी और एय्याशी से जुड़ी थीं। मुगल संस्कृति की बारीकियों से उलझने की चेष्टा इन्होंने कभी नहीं की। तकरीबन सभी के पास अपने जनानखाने होते थे, जिनमें आठ-दस स्त्रियों का होना मामूली बात थी, जिनकी स्थिति रखैल से अधिक नहीं थी। जब ये लोग अपने देश वापस जाते तो जनानखाना यहीं छूट जाता था और बेसहारा स्त्रियां किसी और फिरंगी मुगल की तलाश में लग जातीं। तवायफों का नाच देखना फिरंगी मुगलों का सबसे प्रिय मनोरंजन था। तमाम राजनीतिक-सामाजिक परिवर्तनों के बाद भी गोरों के बीच मनोरंजन की यह परंपरा 19वीं शताब्दी तक लोकप्रिय रही। हुक्का पीना इनकी रोजमर्रा की जिंदगी का अनिवार्य हिस्सा था और मुगल अमीरजादों की तरह जुआ भी प्रमुख व्यसन था जो इन्हें अक्सर कर्ज में डुबो देता था। मुगल जागीरदारों की तरह कई लोग हाथों में मेंहदी लगाते और भारतीय शैली की मूंछें रखते थे।

ऐसा भी नहीं था कि भारतीय स्त्री केवल इनकी वासना पूर्ति

शासक वर्ग की संस्कृति ही काम आती है। भाड़े के सैनिकों के रूप में, व्यापारियों की हैसियत से और व्यापारी-कंपनियों के कर्मचारी के रूप में इंग्लैंड और यूरोप से अच्छी तादाद में गोरे लोग भारत आ गये थे। दिल्ली के बाहरी क्षेत्र में फिरंगीपुरा नाम की एक बस्ती भी बस गयी थी। मुगल सेना के लिए एक फिरंगी रेजीमेंट भी खड़ी हो गयी जिसकी कमान एक फ्रांसीसी के हाथ में थी

आकार देने का श्रेय लॉर्ड वेलेडली को है। इ
लगी और हर दिशा में फैल गयी। इस बदली
सबसे घातक वार हैदराबाद के रेजीडेंट जेम्स

जेम्स का प्रेम-प्रसंग एक उलझा हुआ कि
उसके कई कारण थे। मुस्लिम वेशभूषा में फा
वेलेजली और लॉर्ड वेलेडली को बहुत चिढ़ थी
सांस्कृतिक रुझान का महत्वपूर्ण योगदान था।
की बेटी थी। कोई सैयदा इस तरह इश्क करे
था। निजाम के उमरा राजनीति की बिसात प
बावजूद रेजीडेंट जेम्स कभी इसका तो कभी
प्रसंग के कारण जेम्स को चार बार जांच का
जेम्स पर बलात्कार और अपने बेटे की हत्या
था कि खैर की नानी और मां स्वयं उसकी
मानना था कि अपना लक्ष्य पाने के लिए जेम्
अंततः खैर के गर्भवती हो जाने के बाद जेम्
था इसलिए बिना गाजे-बाजे के गुपचुप शादी
इस्लाम स्वीकार करना पड़ा इसके बावजूद

खैर-उ-निसा ने एक बेटा और बेटी को
शिक्षा के लिए उनके बाबा के पास इंग्लैंड भे
को नहीं मिले न ही उसे उनकी कोई खबर
1805 में जेम्स की मृत्यु हो गयी। खैर-उ-नि
उसे रियासत से निकाल दिया गया। निराशा
वर्ष की आयु में देहांत हो गया।

उन्नीसवीं शताब्दी के आरंभ के साथ ही
दिन-प्रतिदिन चौड़ी होती गयी। ईसाई धर्म प्र
कि.या। हिंदू कॉलेज के संस्थापक डेविड हेयर
गया। उन पर आरोप था कि वह नाम भर
अंग्रेजों के लिए भारतीय संस्कृति में जो भी
जेम्स किर्कपैट्रिक के साथ ही रंगभेद से मुक्त
आपसी सौहार्द सदा के लिए विलीन हो गया